[1] Ch E D (text and schol.) मर्माणि. — [2] D (schol.) मर्माणि मंत्रोक्तानि ।... खादिरस्रुवः तेन गर्तं खनति; cf. Kāuç. 48. 4. — [3] ii. 12. 6. — [4] D (schol.) गर्तं शरैस्तापयति मंत्रलिंगात्. – [5] D (schol.) गर्तें कोशे प्रक्षिप्य । लोष्टं संचयनीकृत्य (Cod. लोष्टसंचनी°) गर्तें । खातान्पांसून् गर्तें कृत्वा. — [6] So (अमुमुन्नैषम्) only Bü; Ch E D (text) अममुन्नै°; K P Bi Bh (समोप्या)मुन्नैषम्. — [7] Bü E D (text) °लेखनी; D (text and schol.) अममुन्नैषमिति अनेन मंत्रेण (where?) । उक्त्वावलेखनीं । अस्य सूक्तस्य प्रतिकृतिमावलेखनीमिति वेधांतकर्म (see Kāuç. 35. 28; 49. 23). — [8] D (text and schol.) छायां वा द्वेष्यस्य (Cod. द्वेष्य) । छायां वा दार्भ्युषेण विध्यति; see Kāuç. 32. 8; 35. 28. — [9] D (text) उपनीयते; D (schol.) द्वेष्यसमीपेनोदकं मार्जयति. — [10] D (schol.) भरद्वाजप्रव्रस्केन (Cod. भार°), ii. 12; see sū. 13. — [11] ii. 18. 1. — [12] D (schol.) समिधः संज्ञानिर्देशात् । अश्वत्थबधकताजद्भंगाह्लखदिरशराणां समिधस्तत्र विकल्पः; cf. Kāuç. 16. 14. — [13] D (schol.) जनस्थानमागत्य व्रीहियवतिलानावपति (Kāuç. 7. 5) । तंत्रविकल्पः । प्रत्यृचं दक्षिणाप्रवणादेव. — [14] iii. 6. 1. — [15] D (schol.) खादिराज्जातो (!) अश्वत्थमणिं बध्नाति । अभिहुतं कृत्वा अभिहवनं । स्रुवदंडे बध्वा (!) होमः । अलंकरणं घृतेन बंधनमभिचरतः. — [16] So emended; MSS. तावन्तः. — [17] Bh °स्राम्वा; D (text) च (!). —

निखनति[1]।४। नावि प्रैणान्नुदस्व कामेति[2] मन्त्रोक्तं[3] शाखया प्रणुदति[4]।५। ते ऽधराञ्च इति[5] प्रप्लावयति[6]।६। बृहन्नेषामित्यायन्तं[7] शप्यमानमन्वाह[8]।७। वैकङ्कतेनेति[9] मन्त्रोक्तम्[10] ।८। ददिहीति[11] साग्नीनि[12]।९। देशकपटु[13] प्रक्षिणाति।१०। ते ऽवदन्निति[14] नेतॄणां पदं वृश्चति[15]।११। अन्वाह[16]।१२। ब्रह्मगवीभ्यामन्वाह[17]।१३। चेष्टाम्[18]।१४। विचृतति[19]।१५।

---

[1] D (schol.) यावतामभिचारं (Cod. यावंताम॰) कर्तुमिच्छंति तावत्परिमाणान्पाशानिंगिडालंकृतान् संपातवत्कुर्यात्।... प्रकृतेनैव सूक्तेनानूक्तान्सह सूत्रेण संबंधं कृत्वा मर्माणि (!) निखनति (cf. Kāuç. 47. 51). — [2] iii. 6. 8; ix. 2. 4. — [3] D (text) मंत्रोक्ता. — [4] D (schol.) पूर्वसूक्तेन पाशात् सकृत् ... (the MS. has a lacuna). — [5] iii. 6. 7. — [6] D (schol.) ... अश्वत्थशाखया (Cod. ॰यां) प्रेरयति अनया ऋचा नावमुदकेन पूरयति. — [7] iv. 16. 1. — [8] D (schol.) द्वेष्यो यद्वाकृष्यमाणो अभिमुख आगच्छेत्ततः अन्वाह. — [9] v. 8. 1. — [10] D (text) joins the word मन्त्रोक्तम् to the next sūtra; Bi divides explicitly as above; D (schol.) स्रुवेण होमः. — [11] v. 13. 1. — [12] So K E D (text); Bü P B Bh Ch साग्निं नि; D (schol.) कर्मातिदेशः कानि तानि। अत्रोपाध्यायवत्सशर्मणः पादाः पठंति। कृकलाशशरभृष्टिसपत्नचयणावारमणेः (!) पाशमंत्रोक्तहोमानां साग्नित्वात् (cf. Kāuç. 47. 39 to 48. 3). — [13] So K Ch P; Bi ॰कषटु; E ॰कपदु; Bü the same or ॰कपटु; D (text) दशकपटु; D (schol.) यत्रायंतम् (Cod. यत्रयातम्) अहिछत्रकं तत्रैव विनाशयति सूक्तांतेन; see Bö. Lex. sub पटु 3. — [14] v. 17. 1. — [15] D (schol.) ब्राह्मण (!) गोनेतॄणां वृश्चति। उक्तेन विधानात्। भ्रष्ट्रे (Cod. भ्रष्टे) ऽभ्यस्यतीत्येवमंतं; cf. Kāuç. 47. 25-28. — [16] D (schol.) अथवान्वाह नेतॄन्. — [17] Here E inserts the passage यं ब्रह्मगवीभ्यामन्वाह. P Bi the same words without यं; D (schol.) नैतां ते देवा इति सूक्ते (v. 18. 1; 19. 1) एका ब्रह्मगवी। (Cod. omits the colon) श्रमेण तपसेत्यन्या (xii. 5. 1) । आभ्यां ब्रह्मगवीभ्यां नेतॄनन्वाह. — [18] D (schol.) अन्वाहेति त्रिशेषः (!for वाक्यशेषः?)। चेष्टा हननमारणकर्तनविशसना- (Cod. ॰विसना-) धिश्रयणपचनभक्षणाद्या द्वेष्यगवि या चेष्टा ब्रह्मगव्यायां (!for ॰गवीभ्यां?) चेष्टासमाख्यानात्। ब्रह्मगवीति (v. 19. 4?) मार्यमाणामिति (Cod मार्थं॰; is this a pratīka?) च तथा कल्पांतरे हतगव्यामनुवचनसंयोगः। जीवत्यजीवत्याः (Cod. ॰त्यानीवत्यः) भोगसंयोगात्. — [19] D (schol.) वध्ये हविः कृतत्यर्थः (!)। कः क्रिया अन्वाह. —

ऊबध्ये[1] । १६ । श्मशाने[2] । १७ । त्रिरमूंन्हनस्वेत्याह[3] । १८ । द्वितीययाश्मानमूबध्ये[4] [5] गूहयति[6] । १९ । द्वादशरात्रं सर्वव्रत उपश्राम्यति[7] । २० । द्विरुदिते स्तृतः[8] । २१ । अवाग्ग्रेण निवर्तयति[9] । २२ । उप प्रागादिति[10] शुने पिण्डं[11] पाण्डुं[12] प्रयच्छति । २३ । ताष्ठं[13] बध्नाति । २४ । जुहोति[14] । २५ । आदधाति । २६ । इदं तद्युजे यत्किं चासौ[15] मनसेत्याहिताग्निं प्रतिनिर्वपति[16] । २७ । मध्यमपलाशेन फलीकरणाञ्जु-

---

[1] D (schol.) द्वेष्यमनसि कृत्वा सप्तमीनिर्देशात्. — [2] D (schol.) पाकस्थाने ऊबध्यवत्. — [3] D (schol.) त्रिरिति क्रियाभ्यावृत्तौ प्रत्ययस्मृतेर्ब्रह्मगवीभ्यां वक्तव्यं (Cod. °व्य) कल्पजासबंधस्य त्रिरिति संख्यायाः पूर्वाभिधानादमूंन्हनस्वेति त्रिरित्येवं वक्तव्यं। कल्पजया सबंध एतानमूंन्हनस्वेति। आहरिति (! for आहुरिति?) सबंधः समं हनस्व रामं हनस्वेति प्रदर्शनं. — [4] Ch श्मशानम्; D (schol.) श्मशाने (see note 6); cf. sū. 17. — [5] Thus (°मूबध्ये) emended; MSS. °मूबध्य. — [6] Ch (sec. man.) गूहति; Bü गूहे; D (text and schol.) corruptly, ऊबध्यग्रहे (!) श्मशाने (!) चोभयंन्नानुवचनं (!); cf. schol. to sū. 22. — [7] D (schol.) अश्मानं प्राश्य (!for प्रास्य or प्रास्यति; cf. Kāuç. 47. 32 and note) सर्वव्रत इत्यर्थः । प्राप्तनिवृत्तिशक्त्यापेक्षा। नातिशक्तिर्विधीयते इति वचनं (cf. Kāuç. 74, end) । उपश्राम्यतीति वचनत्वात्; cf. Kāuç. 41. 2. — [8] So Bü; P Bi Bh K (prim. man.) स्त्रितो; K (sec. man.) स्मृतो; D (text) स्मृतेः; Ch सृतो; E ततो; D (schol.) द्वादशरात्रादूर्ध्वं द्विः सवितरि उद्गते (Cod. उद्गाते) नष्टः शत्रुरिति ज्ञेयं। ततश्चानुवचनं प्रयोजनाभावात्; cf. Kāuç. 47. 29 and 38. — [9] E Ch (sec. man.) निवर्तति; D (schol.) अवाग्ग्रेण दंडेनावपनपत्य-(!)श्मानमूबध्यग्रहाद् (? Cod. श्नान°; cf. schol. to sū. 19) द्विरुदितांते. — [10] vi. 37. 1. — [11] C P Bi Bh पिण्ड. — [12] P पांडु; D (text) पांडं; D (schol.) उप प्रागादित्युदितार्थं यथांतरवचनात् । पिंड (!) भक्तस्य पांडः (!) श्वेतलोकः (! for °गोलः?). — [13] E ताष्ठों; D (schol.) अस्थिकर्माणं बध्नाति । अभिशस्ते ऽभिचारो मंत्रलिंगात्. — [14] D (schol.) to this and the following sūtra, जुहोति अथ चांगिरसीरादधाति (Cod. °सिर°!) । न ताक्ष्ठं जुहोति व्यवधानात्. — [15] vi. 54. 1; vii. 70. 1. — [26] D (schol.) प्रतेर्लक्षणार्थत्वादहिताग्नेरुत्तरतो दक्षिणामुखत्वा (!) कल्पांतरे द्वेष्यस्योत्तरत इति तद्वत्. —

होति[1]।२८। निरमुमित्यङ्गुष्ठेन[2] त्रिरनुप्रस्तृणाति[3]।२९। शरं कद्विन्दुकोष्ठैरनुनिर्वपति[4, 5]।३०। लोहिताश्वत्थपलाशेन[6] विषावध्वस्तं[7] जुहोति[8]।३१। त्वं वीरुधामिति[9] मूत्रपुरीषं वत्सशेप्यायां[10] ककुचैरपिधाय[11] संपिष्य[12] निखनति[13]।३२। शेप्यानडे[14, 15]।३३। शेप्यायाम्[16]।३४। यथा सूर्ये[17] इत्यन्वाह।३५। उत्तरया यांस्तान्पश्यति[18]।३६। इन्द्रोतिभिरग्ने जातान्यो

---

[1] K Bü °करणां; Ch D (text) °करणान्. — [2] vi. 75. 1. — [3] D (schol.) अग्निपश्चात्त्रिगुणं स्तृणाति. — [4] Ch (prim. man.) ककिद्विन्दु°; E किद्विंदु°; D (text) कध्विंड°. — [5] Ch E Bü Bh D (text) °कोष्टैर°; D (schol.) शरबिंदुः (!) शरमयं प्रस्तरणं (cf. Kāuç. 47. 1) तुट्टीकेति (!for तुण्डकेति?) प्रसिद्धाभिधानात् । इंड (! for इंगिड?) ओडेककोष्टं (! for ओडिका°?) धान्यभाजनमेतेषामन्यतमेन निर्वर्तयति तमुत्तरवेदिस्थापनात् । पृथक् करोति पूर्वेण च होमस्तरणादृते (? Cod. °दृते) अनुप्रपूरणानुनिवर्तयोस्तु मंत्रे योगार्थं प्रत्यचं विधानं. — [6] E Ch (prim. man.) °श्वत्यस्य. — [7] So emended; Bü विषाववधस्तं; K Bi विषाबध्वस्तं; P Bh विषाबस्तं; Ch विषाबंध्वस्तं; E विषाबधस्तं; D (text) विषाबंधस्तं. — [8] D (schol.) अनुनिवर्तिते ऽग्नौ निरमुमिति (vi. 75. 1) प्रत्यृचं एवमंतमेकं कर्म लोहिताश्वत्थो लोहितावृश्चनं. — [9] vi. 138. 1. — [10] K Bü शेय्यायां; Ch (prim. man.) शेषायां; D (text) शंय्यायां; cf. note 13. — [11] E बकुचैर°; D (text and schol.) कक्रचै° (!for क्राक°?). — [12] K Ch E D (text) संपिष्य; so also D (schol.) to the next sūtra. — [13] D (schol.) वत्सस्य शेपसंवेष्टनं चर्म वत्सशेप्या (Cod. °शेष्याः) तस्या अंतः (!for अन्तर्) मूत्रपुरीषं कृत्वा कक्रचै (!) तिमिरफलैः । अजालेंडिकाभिर्वातस्याभिमुखं पूरयित्वा बाधकेन संपिष्य (Cod. संपिष्य!) संचूर्ण्य द्वेष्यस्य चर्मणि खनति (!for मर्मणि निखनति? cf. Kāuç. 47. 51; 48. 4) निखनने मंत्रः. — [14] K Bü D (text and schol.) शेय्या°. — [15] E °नेडे; D (schol.) मूत्रपुरीषचूर्णं (!for °पूर्णं?) शेय्यानडेति (!) प्रवेश्य बाधकेन संपिष्य (!) निखनतीति प्रकृतत्वात्. — [16] D (schol.) नडं च मूत्रपुरीषचूर्णं (!for °पूर्णं) शेय्यायां प्रवेश्य बाधकेन संपिष्य (!) निखनति. — [17] vii. 13. 1; D (schol.) यथा सूर्यो नक्षत्राणामिति अनया द्वेष्यानन्वाह. — [18] D (schol.) यावंतो मा सपत्नानामिति (vii. 13. 2) । अनया आगच्छेद्वेषामनुवचनं कृतं तां छत्रूमपश्यं (!for छत्रून°?) मंत्रोक्तेन. —

न स्तायद्दिप्सति यो नः शपादिति[1] वैद्युद्वतीः[2] ।३७। सांतपना[3] इत्यूर्ध्वश्रुषीः[4] ।३८। घ्रंसभृतं पुरोडाशं घ्रंसविलीनेन[5] सर्वहुतम् ।३९। उदस्य[6] श्यावावितीषीकाञ्जिमण्डूकं नीललोहिताभ्यां सूत्राभ्यां सकक्षं बद्ध्वोष्णोदके व्यादाय[7] प्रत्याहुति मण्डूकमपनुदत्यभिन्युब्जति[8] ।४०। उपधावन्तमसदन्गाव इति[9] काम्पीलं संनह्य क्षीरोत्सिक्ते[10] पाययति[11] लोहितानां चैक्कशम्[12] ।४१। अशिशिषोः[13] क्षीरौदनम्[14] ।४२। आमपात्रमभ्यवनेनेक्ति[15] ।४३। ॥२॥ ॥४८॥

---

[1] vii. 31. 1; 34. 1; 108. 1; 59. 1; vi. 37. 3. — [2] Thus emended; MSS. वैद्युद्वतीः; D (schol.) विद्युता हतो वृक्षो विद्युद्धतः तस्माद्विद्युद्धतीः (!) अरण्य आदधाति। ग्राममेत्यावपति (sū. 2)। इत्येवमनुलिंगसामान्यात्। यो नः शपादित्युभयोः समानादित्वात्. — [3] vii. 77. 1. — [4] D (schol.) ततो राजा ऊर्ध्वश्रुषोरादधाति । तिसृभिः. — [5] Ch E D (text and schol.) °विलीलेन; D (schol.) उष्णपक्कं पुरोडाशमातपविलीलेन (!) नवनीतेन इंगिडकार्यें घ्रंसविलीलेन (!) सर्वहुतं नावदानहोमः. — [6] vii. 95. 1. — [7] Bü व्याहाय. — [8] D (schol.) मुंजेषीकेव रेखा यस्य स इषीकांजिमंडूकः तं नीललोहितेन च सूत्रेण सह बहुभ्यां बध्वा (!) उष्णोदके क्षिपति।... आहुतीमग्नौ कृत्वानंतरं तयैवर्चा मंडूकं नुदति ततस्तयैवाभिन्युब्जत्युष्णोदकेन अदर्शनं करोति; cf. Kāuç. 32. 17; 40. 4. — [9] vii. 96. 1. — [10] Ch P Bi E D (text) क्षीरौसिक्ते. — [11] Bi and D (text) have a colon here. — [12] So emended, as vṛddhi-derivative from चिक्कश (see Kāuç. 21. 14); K P Bh चैक्तस; Ch Bü Bi चैक्तसं; E वैयक्तसं; D (text) चैक्क (!); D (schol.) प्रसादयंतं शत्रुं (Cod. °त्रु) यवानां प्रकृताभिचारशांतिरियं. — [13] K P असिशिषोः; D (text) अशिषोः. — [14] D (schol.) भोजयित्वोच्छिष्टानुच्छिष्टमित्यर्थः। कर्मैकदेशग्रहणात्। उदस्य श्यावावित्यस्य सूक्तस्याभिचारिकप्रकरणात् (sū. 39) । असदन्गाव इति चास्य प्रकृताभिचारशांत्यर्थत्वात्। त्रिप्रकरणत्वमिति. — [15] D (schol.) पार्थिवमपक्वभाजनं। उदस्य श्यावाविति शत्रुमभि चेन्निनेक्ति प्रक्षालयति। अस्य च प्रधानकर्मत्वे ज्ञापकमशिशिषोः क्षीरौदनादीनि (Cod. °नादी) क्षीणीति (Cod. °णिति; cf. Kāuç. 49. 20). Here ends the commentary of Dārila. —

सपत्नहनमित्यृषभं[1] संपातवन्तमतिसृजति।१। आश्वत्थीरवपन्नाः[2]।२। स्वयमिन्द्रस्यौज[3] इति प्रक्षालयति।३। जिष्णवे योगायेत्यपो[4] युनक्ति।४। वातस्य रंहितस्यामृतस्य योनिरिति प्रतिगृह्णाति।५। उत्तमाः प्रताप्याधराः[5] प्रदायैनमेनानधराचः[6] पराचो ऽवाचस्तपसस्तमुन्नयत[7,8] देवाः पितृभिः संविदानः प्रजापतिः प्रथमो देवतानामित्यतिसृजति।६। इदमहं यो मा प्राच्या दिशो ऽघायुरभिदासादपवादीदिषूगुहः[9,10] तस्येमौ प्राणापानावपक्रामामि ब्रह्मणा।७।दक्षिणायाः प्रतीच्या उदीच्या[11] ध्रुवाया व्यध्वाया ऊर्ध्वायाः[12]।८। इदमहं यो मा दिशामन्तर्देशेभ्य इत्यपक्रामामीति[13]।९।एवमभिष्ठ्वा[14]।१०।नापोहननिवेष्टनानि सर्वाणि खलु शश्वद्भूतानि।११। ब्राह्मणाद्वज्रमुद्यछमानाच्छङ्कन्ते[15,16] मां हनिष्यसि[17] मां हनिष्यसीति[18] तेभ्यो ऽभयं वदेच्छमग्नये शं पृथिव्यै शमन्तरिक्षाय शं वायवे शं दिवे

---

[1] ix. 2. 1. — [2] So Bü; the rest °वपन्ना before स्वयं. — [3] x. 5. 1 fg. — [4] x. 5. 1ᵇ fg. — [5] E Ch (sec. man.) °धरा. — [6] So K Bü Bi Bh; Ch E P °मेनाधराचः. — [7] K °वांचस्त°. — [8] So Bü; K तमूंनयत; Ch E तमूनयन्त; Bi तमून्नयत; P Bh तमून्नयत. — [9] Bh दिशाघायु°. — [10] P Bi Bh Bü as above; E इषुगूहः; Ch K (prim. man.) इषुगुहः; K (sec. man.) इषूगूहः. Bü has a colon after this word; is the passage up to this point metrical (eight syllables)? Cf. v. 10. 1; iv. 40. 1. — [11] E उदीच्यां प्रतीच्यां. — [12] Cf. v. 10. 2-6; iv. 40. 2-7; cf. Kāuç. 116. 3. — [13] K Bü Ch °पक्रामी°; E °त्युक्रामामी°; cf. AV. v. 10. 7; iv. 40. 8. — [14] So Ch P B; K Bü E °भिष्टा; is the word to be emended to एवमनिष्ट्वा? — [15] So emended; K Bü Ch P Bi उद्यच्छमानाः(शं); E उद्यछमाना; cf. the reading जनः शं for जनच्छं. Kāuç. 3. 14. E alone has a colon here. — [16] E त. — [17] Ch हनिष्यति. — [18] Ch E हनिष्यतीति. —

शं सूर्याय शं चन्द्राय शं नक्षत्रेभ्यः शं गन्धर्वाप्सरोभ्यः शं सर्पेतरजनेभ्यः[1] शिवं मह्यमिति ।१२। यो व आपो ऽपां यं वयमपामस्मै[2] वज्रमित्यन्वृचमुदवज्रान् ।१३। विष्णोः क्रमो ऽसीति[3] विष्णुक्रमान् ।१४। ममाग्ने वर्च[4] इति बृहस्पतिशिरसं पृषातकेनोपसिच्याभिमन्त्र्योपनिदधाति ।१५। प्रतिजानन्नानुव्याहरेत्[5] । १६ । उत्तमेनोपद्रष्टारम् । १७ । उदेहि वाजिन्नित्यर्धर्चेन[6] नावं मज्जतीम् । १८ । समिद्धो ऽग्निर्य इमे द्यावापृथिवी[7] अजैष्मेत्यधिपाशानादधाति । १९ । पदेपदे पाशान्वृश्चति[8] । २० । अधिपाशान्बाधकाञ्छङ्कूस्तान्संक्षुद्य संनह्य भ्रष्ट्रे[9] ऽभ्यस्यति[10] । २१ । आशिशिषोः क्षीरौदनादीनि त्रीणि[11] ।२२। गर्तेध्मावन्तरेणावलेखनी[12, 13] स्थाणौ निबध्य द्वादशरात्रं संपातानभ्यतिनिनयति ।२३। षष्ठ्योदवज्रान्प्रहरति[14] । २४ । सप्तम्याचामति[15, 16] । २५ । यश्च गामित्यन्वाह[17] । २६ । निर्दुर्मण्य[18] इति संधाव्याभिमृशति । २७ । ॥ ३ ॥ ॥ ४९ ॥

॥ इत्यथर्ववेदे कौशिकसूत्रे षष्ठो ऽध्यायः समाप्तः ॥

---

[1] Bi has a colon here. — [2] x. 5. 15, 42, 50; cf. Dārila to Kāuç. 38. 2; 47. 31. — [3] x. 5. 25. — [4] v. 3. 1. — [5] Ch E Bü P प्रतिजानंना°. — [6] xiii. 1. 1a. — [7] xiii. 1. 28 (et al.); 3. 1 (et al.); xvi. 6. 1. — [8] Cf. Kāuç. 47. 14, 25. — [9] K Bi भ्रष्टे; E भ्रष्टे वा (भ्यस्यति); Ch भ्रष्ट्रे वा; cf. Kāuç. 47. 28 and Dārila to 48. 11. — [10] K Bi (भ्रष्टे)भ्यः स्यति. — [11] Cf. Kāuç. 48. 42 and Dārila to 43. — [12] All MSS. गर्तेध्माव° for गर्त इध्माव° with double sandhi; see the introduction. — [13] For आवलेखनी see Kāuç. 35. 28; 47. 54. — [14] x. 5. 6; cf. Kāuç. 47. 31. — [15] x. 5. 7. — [16] Ch °चामयति. — [17] xiii. 1. 56. — [18] xvi. 2. 1. —

॥ ओं ॥

स्वस्तिदा ये ते पन्थान[1] इत्यध्वानं दक्षिणेन प्रक्रामति । १ । व्युदस्यत्यसंख्याताः[2] शर्कराः[3] । २ । तृणानि छित्त्वोपतिष्ठते । ३ । आरे ऽमूः पारे पातं नो य एनं परिषीदन्ति[4] यदायुधं दण्डेन व्याख्यातम्[5] । ४ । दिष्ट्या मुखं विमाय संविशति । ५ । त्रीणि पदानि प्रमायोत्तिष्ठति । ६ । तिस्रो दिष्टीः[6] । ७ । प्रेतं[7], पादावित्यवशस्य[8] । ८ । पाययति । ९ । उपस्थास्त[9] इति त्रीण्योष्यातिक्रामति । १० । स्वस्ति मात्र इति[10] निश्युपतिष्ठते[11] । ११ । इन्द्रमहमिति[12] पण्यं संपातवदुत्थापयति । १२ । निमृज्य[13] दिग्युक्ताभ्यां[14] दोषो गाय पातं न इति[15] पञ्चानडुद्भ्यो यमो मृत्युर्विश्वजि-

---

[1] i. 21. 1; vii. 55. 1 (xii. 1. 47). — [2] Bi has a colon here. — [3] Cf. Kāuç. 36. 22. — [4] i. 26. 1; 27. 1; vi. 3. 1; 76. 1; cf. the **स्वस्त्ययनगण**, Kāuç. 25. 36, note; E Bi have a colon here. — [5] This division in E; cf. Kāuç. 23. 11. — [6] Ch **दिष्टा**; E **दिष्टोः**. — [7] i. 27. 4. — [8] So emended: 'reciting down upon'? MSS. **अवसस्य**. — [9] xii. 1. 62. — [10] i. 31. 4. — [11] K Bü Bh **॰पतिष्ठते(न्द्रम॰)** with double sandhi. — [12] iii. 15. 1. — [13] Thus emended; MSS. **निमृज्यं**. — [14] D (schol.) to Kāuç. 14. 25: **ये ऽस्यां स्थ प्राच्यां दिशि प्राची दिगिति दिग्युक्ते** (iii. 26. 1; 27. 1); cf. the note ibid., and the **रुद्रगण**, Ath. Pariç. 34. 16. — [15] vi. 1. 1; the hymns vi. 3-7. —

च्छकधूमं भवाशर्वावित्युपदधीत[1] । १३ । उत्तमेन[2] सारू-पवत्सस्य रुद्राय त्रिर्जुहोति । १४ । उपोत्तमेन[3] सुहृदो ब्राह्मणस्य शकृत्पिण्डान्पर्वस्वाधाय शकधूमं[4] किमद्याहरिति पृच्छति । १५ । भद्रं सुमङ्गलमिति प्रतिपद्यते । १६ । युक्तयोर्मा नो देवा यस्ते सर्प[5] इति शयनशालोर्वराः[6] परिलिखति । १७ । तृणानि युगतर्द्मना संपातवन्ति द्वारे प्रचृतति । १८ । ऊबध्यं[7] संभिनत्ति । १९ । निखनति । २० । आदधाति । २१ । अपामार्गप्रसूनान्कुद्रीचीशफान्पराचीनमूलान्[8.9] । २२ । ॥ १ ॥ ॥ ५० ॥

उदित इति[10] खादिरं शङ्कुं[11] संपातवन्तमुद्गृह्णन्निख-

---

[1] vi. 59. 1; 93. 1; 107. 1; 128. 1; iv. 28. 1 (xi. 2. 1; 6. 9). The दिग्युक्ते सूक्ते (cf. p. 145, note 14), three of the pratīkas in this sūtra, one in sū. 18, and two in 51. 7 occur in the रौद्रगण, Ath. Pariç. 34. 17: रौद्रः । रुद्र जलाषभेषज ये ऽस्यां प्राची दिगुदितस्त्रयो (two MSS. °स्त्रयो वा) अक्रमन् भवाशर्वौ मन्वे वां ब्रह्म जज्ञानमनाप्ता ये सहस्रधार एव ग्रीष्मो हेमन्तो ऽनड्वांस्त्वं मह्यमापो वैश्वानरो यमो मृत्युर्या ते रुद्र (Bühler's Codex ends here: यां तेति रौद्रगणः!) यो अग्नौ रुद्रो (this word is wanting in the Chambers Codex) भवाशर्वौ मृडतं भवाशर्वाविदं ब्रूमो यस्ते सर्पस्तस्मै प्राच्या दिशो अन्तर्देशादिति रौद्रगणः ॥ १७ ॥. The pratīkas are: ii. 27. 6; iii. 26. 1; 27. 1; iv. 3. 1; 28. 1; v. 6. 1; v. 6. 2; v. 6. 3; vi. 55. 2; 59. 1; 61. 1; 62. 1; 93. 1; 90. 1; vii. 87. 1; xi. 2. 1; 6. 9; xii. 1. 46; xv. 5. 1. — [2] iv. 28. 1 (xi. 2. 1; 6. 9). — [3] vi. 128. 1. — [4] Dārila, fol. 42b, l. 4 (to Kāuç. 8. 17) शकधूम (!) ब्राह्मणः; cf. also Ath. Paddh. to Kāuç. 76. 19. — [5] iv. 28. 1; vi. 128. 1; vi. 56. 1; xii. 1. 46. For the last cf. the रौद्रगण, sū. 13, note. — [6] So all MSS.; is the text to be emended to शयनशालामुर्वराः? — [7] E P Bi ऊवध्यं. — [8] E alone reads °प्रसूनान्कु°; the rest °प्रसूनाकु°. Is the word to be emended to °प्रसूता°? — [9] E (prim. man.) गृहीची; E (sec. man.) गृहीवा? Is the word (कुद्रीची) to be emended to गुडूची? — [10] iv. 3. 1. — [11] K शंकून्; Bü शंकु. —

न्गा[1] अनुव्रजति । १ । निनयनं समुह्य चारे[2] साह्रपव-त्सस्येन्द्राय त्रिर्जुहोति । २ । दिश्यान्बलीन्हरति । ३ । प्रतिदिशमुपतिष्ठते । ४ । मध्ये पञ्चममनिर्दिष्टम् । ५ । शेषं निनयति । ६ । ब्रह्म जज्ञानं भवाशर्वावित्यासन्नमरण्ये[3] पर्वतं यजते । ७ । अन्यस्मिन्भवशर्वपशुपत्युग्ररुद्रमहादेवेशानानां पृथगाहुतीः । ८ । गोष्ठे च द्वितीयमश्नाति[4] । ९ । दर्भानाधाय धूपयति । १० । भूत्यै वः पुष्ट्यै व इति प्रथमजयोर्मिथुनयोर्मुखमनक्ति । ११ । तिस्रो नलदशाखा वत्सान्पाययति । १२ । शाखयोदकधारया गाः परिक्रामति[5] । १३ । अश्मवर्म[6] म इति[7] षडश्मनः संपातवतः स्रक्तिषु पर्यधस्तान्निखनति[8] । १४ । अलसालेत्यालभेषजम्[9] । १५ । त्रीणि सिलाञ्जालाग्याण्युर्वरामध्ये[10] निखनति । १६ । हतं[11] तर्दमित्ययसा सीसं कर्षन्नुर्वरां[12] परिक्रामति । १७ । अश्मनो[13] ऽवकिरति । १८ । तर्दमवशिरसं[14] वदनात्केशेन[15] समुह्योर्वरामध्ये निखनति । १९ । उक्तं

---

[1] K °न्निगनं गा; Bü निखनंन्गा; E निखन गा; P निखन् गा. — [2] E चोर. — [3] iv. 1. 1 (v. 6. 1); iv. 28. 1 (xi. 2. 1; 6. 9); cf. the रौद्रगण. Kāuç. 50. 13, note. — [4] For अश्नाति see Kāuç. 7. 1. — [5] Cf. Dārila, fol. 80ª l. 7 (to Kāuç. 23. 13) . . . संपातितया शाखया उदकधारां आनयति. — [6] E °मर्म. — [7] K Bü Bh मेति (with double sandhi); v. 10. 1. — [8] Bü स्रक्तिषूपर्य°. — [9] vi. 16. 4. For आल cf. Dārila fol. 86ª l. 9 (to Kāuç. 25. 18). आलं गोधूम- (Cod. °मो) व्याधिः. — [10] So (सिला°) emended in accordance with AV. vi. 16. 4; MSS. of the text शिला°. — [11] vi. 50. 1. — [12] K कखंनु°; Bü E कर्षंनु°; Bi कर्षनु°; Ch कर्षनुर्वरान्. — [13] K Bü अश्मन्नो. — [14] K Ch P तर्द्मम°. — [15] Ch E वननात्. —

चारे[1] । २० । बलीन्हरत्याशाया आशापतयेऽश्विभ्यां क्षेत्रपतये । २१ । यदेतेभ्यः कुर्वीत वाग्यतस्तिष्ठेदास्तमयात् । २२ । ॥ २ ॥ ॥ ५१ ॥

ये पन्थान इति[2] परीत्योपदधीत । १ । प्रयच्छति[3] । २ । यस्यास्ते यत्ते देवी विषाणा[4] पाशानित्युन्मोचनप्रतिरूपं[5] संपातवन्तं करोति । ३ । वाचा बद्धाय[6] भूमिपरिलेखम्[7] । ४ । आयन इति[8] शमनमन्तरा हृदं[9] करोति[10] । ५ । शाले च । ६ । अवकया[11] शालां परितनोति । ७ । शप्यमानाय प्रयच्छति । ८ । निदग्धं प्रक्षालयति । ९ । महीमू ष्विति[12] तरणान्यालम्भयति । १० । दूरान्नावं[13] संपातवतीं नौमणिं बध्नाति । ११ । प्रपथ इति[14] नष्टैषिणां प्रक्षालिताभ्यक्तपाणिपादानां दक्षिणान्पाणीन्निमृज्योत्थापयति[15, 16] । १२ । एवं संपातवतः । १३ । निमृज्यैकविंशतिं[17] शर्कराश्चतुष्पथेऽवक्षिप्यावकिरति[18] । १४ । नमस्कृत्येति[19] मन्त्रोक्तम् । १५ । अंहोलिङ्गानामापो[20] भोजनहवींष्यभिमर्शनोपस्थानमा-

---

[1] See sū. 2. — [2] vi. 55. 1. — [3] Ch has a colon here. — [4] vi. 84. 1; 63. 1; 121. 1. — [5] P °न्म्वोचन° (!). — [6] So P Bi Bh K (sec. man.) Ch (sec. man.); Bü E K (prim. man.) Ch (prim. man.) बधाय. — [7] K °लेखनं. — [8] vi. 106. 1. — [9] E Ch (prim. man.) हृदं; P Bh हृदयं. — [10] Bi has a colon here. — [11] D (schol.) to Kāuç. 40. 5, अवका शेषबालः (! for शेबालः; cf. शेफालि, शेफालिका, शैबाल, and Āçv. Gṛ. iv. 4. 8). — [12] vii. 6. 2. — [13] Ch दूरां; Bü दूरांन्न°. — [14] vii. 9. 1. — [15] K Bh दक्षिणात्प°. — [16] Ch Bh Bü K पाणीं. — [17] K P Bh निर्मृ°. — [18] Thus (ऽवक्षिप्या°) emended; E बदक्षिप्य; the rest च क्षिप्य. — [19] vii. 102. 1. — [20] For the अंहोलिङ्गगण see Kāuç. 32. 27, note; 58. 22, etc. —

दित्यस्य । १६ । स्वयं हविषां भोजनम् । १७ । विश्वे देवा[1] इत्यायुष्याणि । १८ । स्थालीपाके घृतपिण्डान्प्रतिनीयाश्नाति ।१९। अस्मिन्वसु यदाबध्नन्नव प्राणानिति[2] युग्मकृष्णलमादिष्टानां[3] स्थालीपाक आधाय बध्नाति । २० । आशयति । २१ । ॥ ३ ॥ ॥ ५२ ॥

आयुर्दा इति[4] गोदानं[5] कारयिष्यन्संभारान्संभरति[6] । १ । अमम्रिमोजोमानीं[7] दूर्वामकर्णमश्ममण्डलमानडुहशकृत्पिण्डं[8, 9] षड् दर्भप्रान्तानि कंसमहते[10] वसने शुद्धमाज्यं शान्ता ओषधीर्नवमुदकुम्भम्[11] ।२। बाह्यतः शान्तवृक्षस्येध्मं प्राञ्चमुपसमाधाय । ३ । परिसमुह्य पर्युक्ष्य परिस्तीर्य बर्हिरुदपात्रमुपसाद्य परिचरणेनाज्यं परिचर्य[12] । ४ । नित्यान्पुरस्ताद्धोमान्हुत्वाज्यभागौ च । ५ । पश्चादग्नेः प्रा-

---

[1] i. 30. 1; cf. the आयुष्यगण, Kāuç. 54. 11, note; also 59. 1. — [2] i. 9. 1; 35. 1; v. 28. 1; cf. the first वर्चस्यगण, Kāuç. 13. 1, note. — [3] Cf. D (schol.) to Kāuç. 11. 19. — [4] ii. 13. 1. — [5] Ath. Paddh. अथाब्दिके गोदानिकं कर्म; Daç. Kar. अथ संवत्सरे; both texts treat the गोदानं immediately after the अन्नप्राशनं (Kāuç. 58. 11). — [6] Ch करिष्यन्त्स°. — [7] So P Bh; Bü Bi and Ath. Paddh. अमंमृमो°; K अमंम्रिमो°; Ch अमंम्रीमो°; E अमम्रीमो°; cf. sū. 15, and 54. 19. — [8] For अकर्ण cf. Kāuç. 7. 25, and D (schol.) ibid. — [9] Ch E Bü °मानडुहं; cf. Kāuç. 7. 23, and D (schol.) ibid. — [10] E कंस्य°. — [11] Ath. Paddh. adds as follows: इध्माबर्हिः । व्रीहियवौ । शमीपर्णिका (cf. Āçv. Gr. i. 17. 3) एतान्संभारान्समुद्धृत्य । अव्यचसश्चेत्यादि (AV. xix. 68. 1; MSS. अव्यसश्चे°) गोदानिकं तन्त्रं. — [12] Ath. Paddh. ततः यदग्ने तपसा तपो ऽग्ने तपस्तप्यामह इति द्वाभ्यां (vii. 61. 1, 2) परिसमूहयति (see Kāuç. 57. 23) । सं मा सिंचन्त्विति (vii. 33. 1) त्रिः पर्युक्षति (see ibid. sū. 22). The passage contained in this and the next sūtra is repeated at Kāuç. 67. 20 fg.; 94. 11 fg.; 135. 4 fg., etc. —

ङ्मुख उपविश्यान्वारभ्याय[1] शान्त्युदकं करोति । ६ । तच्चैतत्सूक्तमनुयोजयति[2] । ७ । त्रिरेवाग्निं[3] संप्रोक्षति[4] त्रिः[5] पर्युक्षति । ८ । त्रिः[6] कारयमाणमाचामयति च संप्रोक्षति च । ९ । शकृत्पिण्डस्य स्थालरूपं[7] कृत्वा सुहृदे ब्राह्मणाय प्रयच्छति । १० । तत्सुहृद्दक्षिणतोऽग्नेरुदङ्मुख आसीनो धारयति । ११ । अथास्मा अन्वारभ्याय[8] करोति । १२ । आयुर्दा इत्यनेन[9] सूक्तेनाज्यं जुह्वन्मूर्ध्नि[10] संपातानानयति । १३ । दक्षिणे पाणावश्ममण्डल उदपात्र उत्तरसंपातान्स्थालरूप आनयति[11] । १४ । अमम्रिमोजोमानीं[12] चोदपात्रेऽवधाय । १५ । स्थालरूपे दूर्वां शान्त्युदकमुष्णोदकं चैकधाभिसमासिच्य[13] । १६ । आयमगन्सविता क्षुरेणेत्युदपात्रमनुमन्त्रयते[14] । १७ ।

---

[1] Ch E °न्वारभ्यायै; cf. Kāuç. 44. 3. — [2] Ath. Paddh. and Daç. Kar. आयुर्दा इति सूक्तेनानुयोजनं. — [3] Daç. Kar. °ग्नीन्सं°; K P Bh °ग्नीं. — [4] Ch प्रोत्तति; Daç. Kar. यन्मातली (etc., xi. 6. 23 in full) सर्वा इमा आप ओषधय इति (Kāuç. 9. 9) त्रिरेवाग्नीन्संप्रोत्तति (!). — [5] So K; the rest त्रिप्यु°. — [6] Bü त्रिष्क°. — [7] E स्थाली°. — [8] K Bh Ch (prim. man.) अथास्मान्वारभ्याय (with double sandhi). — [9] ii. 13. 1. — [10] Ath. Paddh. कुमारस्य मूर्ध्नि. — [11] Ath. Paddh. पुनस्तेनैव सूक्तेन जुहुयात् अश्ममण्डले । पुनस्तेनैव जुहुयात् उदपात्रे । . . . तस्मिन्स्थालरूपं कृत्वा उत्तरसंपातान्सर्वानानयति. — [12] So P Bh; Bü Bi अमंमृमो°; K अमंम्रिमो°; Ch E अमम्रोमो°; Daç. Kar. अमंमृमगलोसहित (?) उदपात्रे; Ath. Paddh. अमंमृमोजोमानीयसहिते (!) उदपात्रे; cf. sū. 2, and 54. 19. — [13] K P Bh चैकधाभिः°; cf. Kāuç. 54. 19. — [14] vi. 8. 1; Ath. Paddh. and Daç. Kar. आयमगन्सविता चुरेणेति तिसृभिः. But Daç. Kar. in citing the verses in full substitutes viii. 2. 17 for vi. 68. 3; cf. the following sūtras.

अदितिः श्मश्रु वपत्वित्युन्दति[1]।१८। यत्क्षुरेणेत्युदकपात्रं[2,3] क्षुरमद्भिः श्चोत्य[4] त्रिः[5] प्रमार्ष्टि । १९। येनावपदिति[6] दक्षिणस्य केशपक्षस्य दर्भपिञ्जूल्या केशानभिनिधाय[7] प्रछिद्य स्थालरूपे करोति । २० । एवमेव द्वितीयं करोति । २१ । एवं तृतीयम् । २२ । एवमेवोत्तरस्य केशपक्षस्य करोति[8] । २३ । ॥ ४ ॥ ॥ ५३ ॥

अथ नापितं समादिशत्यक्षण्वन्वप[9] केशश्मश्रुरोम परिवप नखानि च कुर्विति[10]।१। पुनः प्राणः पुनरैत्विन्द्रियमिति[11] त्रिर्निमृज्य[12]।२। त्वयि महिमानं सादयामीत्यन्ततो योजयेत्[13]।३। अथैनमुप्तकेशश्मश्रुं कृत्तनखमाप्लावयति[14]।४। हिरण्यवर्णा[15] इत्येतेन सूक्तेन गन्धप्रवादाभिरलंकृत्य[16]।५। स्वक्तं म[17] इत्यानक्ति[18]।६। अथैनमहतेन

---

[1] vi. 68. 1; K श्मश्रृत्यु°. — [2] viii. 2. 17. — [3] K Bü Bh Ch (sec. man.) उदकपत्रं; Bi P Ch (prim. man.) उदकपात्रं; E उदकपात्रं. — [4] So all MSS. except K, which reads °ड्भिः श्चोत्य; Ath. Paddh. क्षुरश्चोतनं करोति. — [5] So K; the rest त्रिष्प्र°. — [6] vi. 68. 3. — [7] Ath. Paddh. दर्भपिञ्जूलीसहितान्केशान्. — [8] Ath. Paddh. ततो दक्षिणस्य केशपक्षस्य उत्तरस्य केशपक्षस्य उंदनं पुनःपुनः तृप्तः (! for उप्तः?) । सकृत्सकृत्तंत्रः. — [9] Ath. Paddh. and Daç. Kar. अथ नापितप्रैषः. — [10] Cf. Pār. Gṛ. ii. 1. 21; Āçv. Gṛ. i. 17. 17. — [11] vi. 53. 2; vii. 67. 1. — [12] K P Bü Bh निर्मृज्य; Ath. Paddh. and Daç. Kar. अर्धमुण्डिते शिरसि एताभ्यां पुनः क्षुरसंस्कारः. — [13] Ath. Paddh. देवदत्तशर्मणि त्वयि महिमानं (MSS. मयिमानां!) सादयामि. — [14] Thus emended; KBüBhPCh and Daç. Kar. कृत°; E Bi कृंत°. — [15] i. 33. 1. — [16] Ath. Paddh. and Daç. Kar. हिरण्यवर्णा इति सूक्तेन कलशोदकमभिमंत्र्याप्लावयति यस्ते गन्ध इति तिसृभिः (xii. 1. 23-5) गन्धपुष्पाद्यभिमंत्र्य; cf. Kāuç. 13. 12. — [17] vii. 30. 1. — [18] Ch °त्यनक्ति; these two words are wanting in E; Daç. Kar. and Ath. Paddh. कज्जलमभिमंत्र्य (MSS. काजल°) अक्षिणी (!) अंजनं करोति. —

वसनेन परिधापयति परि धत्तेति द्वाभ्याम्[1] । ७ । एह्यश्मानमा तिष्ठेति[2] दक्षिणेन पादेनाश्ममण्डलमास्थाप्य प्रदक्षिणमग्निमनुपरिणीय।८। अथास्य वासो निर्मुष्णाति[3] यस्य ते वास इत्येतया[4] । ९ । अथैनमपरेणाहतेन वसनेनाछादयत्ययं वस्ते गर्भं पृथिव्या इति पञ्चभिः[5] । १० । यथा द्यौर्मनसे चेतसे धिय इति[6] महाव्रीहीणां स्थालीपाकं श्रपयित्वा शान्त्युदकेनोपसिच्याभिमन्त्र्य प्राशयति[7]।११। प्राणापानावोजो ऽसीत्युपदधीत[8] ।१२। तुभ्यमेव जरिमन्निति[9] कुमारं मातापितरौ त्रिः संप्रयछेते[10] । १३ । घृतपिण्डानाशयतः[11] ।१४। चूडाकरणं[12] च गोदानेन व्या-

[1] ii. 13. 2, 3. — [2] ii. 13. 4. — [3] Bi has a colon here; Daç. Kar. आचार्य (!) वस्त्रं समर्पयति; Ath. Paddh. उत्तरवास अदत्तं गृह्णात्युपाध्यायः. — [4] ii. 13. 5. — [5] xiii. 1. 16-20. — [6] ii. 15. 1; vi. 41. 1. For the first of these pratīkas and several others, following in this and the next four chapters, cf. the आयुष्यगण, Ath. Pariç. 34. 4: यथा द्यौः प्राणापानावोजो ऽसि तुभ्यमेवाचीभ्यां ते मुंचामि त्वोत देवा आवतस्त उप प्रियमन्तकाय मृत्यव आ रभस्व प्राणाय नमो (MSS. नम) विषासहिमित्यायुष्याणि ।४।. The pratīkas are: ii. 15. 1; 17. 1; 28. 1; 33. 1; iii. 11. 1 (i. 10. 4); iv. 13. 1; v. 30. 1; vii. 32. 1; viii. 1. 1; 2. 1; xi. 4. 1; xvii. 1-5; cf. Kāuç. 52. 18; 57. 31, etc. — [7] Daç. Kar. माणवकं (Cod. माणकं). — [8] ii. 16. 1; 17. 1; cf. the preceding note. — [9] ii. 28. 1; cf. note 6. — [10] Daç. Kar. परस्परं प्रयछेते (Cod. °यछति) । प्रथमं पिता मातुः । द्वितीयं माता पितुः तृतीयं पिता मातुः; Ath. Paddh. षट्सूक्तावृत्तिः. — [11] Daç. Kar. पुनरनेनैव सूक्तेन त्रीन्घृतपिण्डान्प्रत्येकंप्रत्येकं संपात्याभिमंत्र्य कुमारं प्राशयति । ततः पूर्वोक्तानि चत्वारि परिदानानि ददाति (cf. sū. 17, and the notes to Kāuç. 58. 16, 17, and 18) । इति गोदानं; Ath. Paddh. . . . . कुमारपित्रोः (Cod. कुमारं पि°) प्राश्नाति (!) . . . पूर्वोक्तानि च चत्वारि परिदानानि ददाति। इति गोदानं समाप्तं. Both paddhatis treat the नामकरणं, of which ceremony the परिदानानि form a part (see Kāuç. 58. 18, note), before the गोदानं. — [12] Ch K P B चूडकरणं. —

ख्यातम् । १५ । परिधापनाश्ममण्डलवर्जम्[1] । १६ । शिवे ते स्तामिति[2] परिदानान्तानि[3] । १७ । पार्थिवस्य मा प्र गामेति[4] चतस्रः सर्वाण्यपियन्ति । १८ । अमाम्रिमोजो- मानीं[5] च दूर्वां च केशांश्च शकृत्पिण्डं चैकधाभिसमा- हृत्य[6] । १९ । शान्तवृक्षस्योपर्यादधाति । २० । अधिकरणं ब्रह्मणः कंसवसनं गौर्दक्षिणा । २१ । ब्राह्मणान्भक्तेनोपेप्स- न्ति । २२ । ॥ ५ ॥ ॥ ५४ ॥

उपनयनम्[7] । १ । आयमगन्निति मन्त्रोक्तम्[8] । २ । यत्क्षुरेणेत्युक्तम्[9] । ३ । येनावपदिति[10] सकृदपिञ्जूलि[11] । ४ ।

---

[1] Ath. Paddh. adds: शेषं गोदानवत् । तुभ्यमेवेति (ii. 28. 1) अनुयोजनं शान्त्युदके (cf. Kāuç. 53. 6); Daç. Kar. treats the चूडाकरणं in full (अथ संवत्सरे द्विसंवत्सरे वा चूडाकरणमुच्यते), agreeing with the Ath. Paddh. in employing ii. 28. 1 in connection with the शान्त्युदकं. — [2] viii. 2. 14. — [3] Cf. Kāuç. 58. 18, note; Daç. Kar. इति चूडाकरणं. — [4] ii. 29. 1; xiii. 1. 59; cf. for the second pratīka the आयुष्यगण, sū. 11, note. — [5] So P Bh; K Bi Bü अममृमो°; Ch E अमस्रीमो°; cf. Kāuç. 53. 2, 15. — [6] Ch E °कधाभिः समाहृत्य; Bi °कधासिः; cf. Kāuç. 53. 16. — [7] Daç. Kar. and Ath. Paddh. गर्भपंचमे गर्भाष्टमे वा गोदानिकं तंत्रं। आज्यभागांते शान्त्युदकं करोति। आ यातु मित्र (iii. 8. 1; cf. sū. 18) इति सूक्तेनानुयोजनं । मातली (xi. 6. 23) अंते । ततो ऽभ्यातानानि जुहोति । तत्र माणवकं आत्मसमीपे प्राङ्मुख उपविश्य (!) । आयुर्दा इति सूक्तेन (ii. 13) आज्यं जुहोति । कुमारस्य मूर्ध्नि दक्षिणे पाणावश्ममण्डले उदपात्रे । उत्त- रसंपातान्स्थालरूपे आनयति । त्रिः सूक्तावृत्तिः; cf. Kāuç. 53. 6 fg. — [8] vi. 68. 1; Daç. Kar. and Ath. Paddh. दूर्वां शान्त्युदकमुष्णोदकं चैकधा कृत्वा आयमगन्निति उदपात्रमनुमंत्रयते; cf. Kāuç. 53. 16, 17. — [9] viii. 2. 17; Daç. Kar. and Ath. Paddh. क्षुरमार्जनं उष्णेनेति (vi. 68. 1^b) उदकं गृह्य । आदित्या इति (vi. 68. 1^{cd}) अदितिः श्मश्रु इत्येकया (vi. 68. 2) उंदनं; cf. Kāuç. 53. 17 fg. — [10] vi. 68. 3. — [11] Thus Bü alone; the rest °पिञ्जली; Daç. Kar. and Ath. Paddh. वपनं करोति (Ath. Paddh. केशच्छेदनं) सकृत् । दर्भपिञ्जूलीवर्जं; cf. Kāuç. 53. 20. —

लौकिकं च समानामा परिधानात्[1] । ५ । उपेतपूर्वस्य नियतं सवान्दास्यतो[2] ऽग्नीनाधास्यमानः[3] पर्यवेतव्रतदीक्षिष्यमाणानाम् । ६ । सोष्णोदकं शान्त्युदकं प्रदक्षिणमनुपरिणीय पुरस्तादग्नेः प्रत्यङ्मुखमवस्थाप्य[4] । ७ । आह ब्रूहि[5]।८। ब्रह्मचर्यमागमुप मा नयस्वेति[6]।९। को नामासि किंगोत्र इत्यसाविति[7] यथा नामगोत्रे भवतस्तथा प्रब्रूहि[8] । १० । आर्षेयं मा कृत्वा बन्धुमन्तमुपनय[9] । ११ । आर्षेयं त्वा कृत्वा बन्धुमन्तमुपनयामीति[10] । १२ । ओं भूर्भुवः स्वर्जनदोमित्यञ्जलावुदकमासिञ्चति[11]।१३। उत्तरोऽसानि ब्रह्मचारिभ्य इत्युत्तमं पाणिमन्वादधाति[12]।१४। एष म[13] आदित्यपुत्रस्तन्मे गोपायस्वेत्यादित्येन समीक्षते[14]।१५। अपक्रामन्पौरुषेयाद्वृणान[15] इत्येनं बाहुगृहीतं प्राञ्चमव-

---

[1] Daç. Kar. and Ath. Paddh. give the लौकिकं in full, as at Kāuç. 54. 1–7: अथ नापितप्रैषः (Ath. Paddh. अथ नापितं समादिशति) etc. — [2] E सवा; K Bü Ch P Bh सवां; cf. Kāuç. 60. 1; 67. 6. — [3] E Bh Ch (sec. man.) °धास्यमान. Is the passage to be emended to ऽग्नीनाधास्यमानस्य? Or are these words an interpolation from Kāuç. 60. 1 (अग्नीनाधास्यमानः सवान्वा दास्यन्संवत्सरं ब्रह्मौदनिकमग्निं दीपयति)? — [4] Ath. Paddh. उपवेशयति. — [5] Bh ब्रूउहि; Ath. Paddh. and Daç. Kar. तावदाचार्यो ब्रूयात् । आह ब्रूहि. — [6] Ath. Paddh. and Daç. Kar. ब्रह्मचारी वदति. — [7] Ath. Paddh. and Daç. Kar. पुनराचार्यो वदति. — [8] Daç. Kar. पुनः ब्रह्मचारी। अमुकगोत्र अमुकनाम (!) अमुकशर्मो ऽहं अमुकप्रवरो ऽहं. — [9] Ch (sec. man.) inserts मा between उप and नय, but this is again erased. — [10] Ch omits इति. — [11] Daç. Kar. and Ath. Paddh. ... अञ्जलिं पूरयित्वा। आदित्याय अर्घ्यं ददाति. — [12] Daç. Kar. ब्रह्मचारिणं पाणौ गृहीत्वा; Ath. Paddh. दक्षिणं पाणिं गृहीत्वा. — [13] So emended; all MSS. of the text and Ath. Paddh. मा; Daç. Kar. मादित्य°. — [14] So all MSS., except Ch (sec. man.): °दित्यमीक्षते; but this correction is again cancelled, so that °दित्येन समीक्षते is the final reading of the MS.; Daç. Kar. एष मादित्यपुत्रः। उद्वयं तमसस्परि (vii. 53. 7) आदित्यं निरीक्षते. — [15] vii. 105. 1. —

स्थाप्य दक्षिणेन पाणिना नाभिदेशे ऽभिसंस्तभ्य जपति[1]। १६। अस्मिन्वसु वसवो धारयन्तु विश्वे देवा वसव आ यातु मित्रो ऽमुत्रभूयादन्तकाय मृत्यव आ रभस्व प्राणाय नमो विषासहिमित्यभिमन्त्रयते[2]। १७। अथापि परित्वरमाण[3] आ यातु मित्र इत्यपि[4] खल्वेतावतैवोपनीतो[5] भवति[6] । १८ । प्रछाद्य त्रीन्प्राणायामान्कृत्वावछाद्य[7, 8] वत्सतरीमुदपात्रे समवेक्षयेत्[9]। १९। समिन्द्र नः सं वर्चसेति[10] द्वाभ्यामुत्सृजन्ति[11] गाम् ।२०। ॥६॥ ॥५५॥

श्रद्धाया दुहितेति द्वाभ्यां[12] भाद्रमौञ्जीं मेखलां बध्नाति[13] ।१। मित्रावरुणयोस्त्वा हस्ताभ्यां प्रसूतः प्रशिषा प्रयछामीति पालाशं दण्डं[14] प्रयछति[15]।२। मित्रावरुणयो-

[1] Ath. Paddh. तं ब्रह्मचारिणं बाहुं गृहीत्वा प्राङ्मुख उपविशति उपाध्यायः । दक्षिणेन पाणिना नाभिदेशे संस्तभ्य जपति । आचार्यः । दक्षिणेन हस्तेन ब्रह्मचारिनाभिदेशे (Cod. ब्रह्मचारी°) संस्पृश्य जपति. — [2] i. 9. 1; 30. 1; iii. 8. 1; vii. 53. 1; viii. 1. 1; 2. 1; xi. 4. 1; xvii. 1–5; cf. the आयुष्यगण. Kāuç. 54. 11, note; Ath. Paddh. पंचपटलिकायां यथादिष्टान्तथा पठितान्सूक्तान्. — [3] Ch °चरमाणो. — [4] iii. 8. 1. — [5] E °तावतो°; Ch (prim. man.) °तावती°. — [6] Ath. Paddh. and Daç. Kar. यद्याचार्यत्वरा भवति (Daç. Kar. अथ च आचार्यः प्रशक्यः)। तदा आ यातु मित्र इति सूक्तं गणस्थाने जपति। आचार्य उपनयमान इत्येकया (xi. 5. 3) जपति। अहं रुद्रेभिरिति सूक्तेन (iv. 30) पादंपादं वाचयति ब्रह्मचारिणं. — [7] E °प्राण°. — [8] K °वत्साद्य; Daç. Kar. °वसाद्य. — [9] So only E; the rest वत्सतर्युदपात्रे; Daç. Kar. अवसाद्य (!) उदपात्रे वत्सतरीमुखं निरीक्षयेत्; Ath. Paddh. अवछाद्य वत्सतरी (!) उदपात्रेण मुखं निरीक्षते (!) ब्रह्मचारी (!). — [10] vii. 97. 2; vi. 53. 3. — [11] Ath. Paddh. (both MSS.) उत्कृजन्ति. — [12] vi. 133. 4. 5. — [13] Ath. Paddh. and Daç. Kar. कटिप्रदेशे बध्नाति। पुनर्मैत्विन्द्रियमिति (vii. 67. 1) यज्ञोपवीतं ददाति. — [14] Wanting in K. — [15] Daç. Kar. treats this and the following two sūtras as follows: मित्रावरुणयोस्त्वा . . . प्रयछामि यज्ञोपवीतमसि यज्ञस्य त्वा यज्ञोपवीतेनोपन-

स्त्वा हस्ताभ्यां प्रसूतः प्रशिषा प्रतिगृह्णामि । सुश्रवः[1] सुश्रवसं मा कुर्ववक्रो ऽविथुरो ऽहं भूयासमिति प्रतिगृह्णाति । ३ । श्येनो ऽसीति[2] च । ४ । अथैनं व्रतादानीयाः समिध आधापयति[3] । ५ । अग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तत्समापेयं तन्मे राध्यतां तन्मे समृध्यतां तन्मे मा व्यनशत्तेन[4] राध्यासं तत्ते प्रब्रवीमि तदुपाकरोमि अग्नये व्रतपतये स्वाहा[5] । ६ । वायो व्रतपते । सूर्य व्रतपते । चन्द्र व्रतपते । आपो व्रतपत्न्यो । देवा व्रतपतयो । वेदा व्रतपतयो । व्रतानां व्रतपतयो व्रतमचारिषं[6] तदशकं तत्समाप्नं तन्मे राद्धं तन्मे समृद्धं तन्मे मा[7] व्यनशत्तेन राद्धो ऽस्मि तद्वः प्रब्रवीमि तदुपाकरोमि व्रतेभ्यो व्रतपतिभ्यः स्वाहेति[8] । ७ । अथैनं बद्धमेखलमा-

ह्यामोति माणवकस्य दक्षिणबाहुमुद्धृत्य वामस्कन्धौ वै धारय (!) श्येनो ऽसि . . . ब्रह्मचारी (Cod. ब्रह्मचारिणो) दंडं प्रतिगृह्णाति सुश्रव . . . भूयासम् । तूष्णीं कृष्णाजिनं ददाति; Ath. Paddh. . . . दण्डं प्रतिगृह्णाति ब्रह्मचारी असितचैलेनं (!both. MSS.) ददाति । प्रजापते न त्वदेतान्यन्य इति (vii. 80. 3). —

[1] Thus emended; MSS. and Daç. Kar. सुश्रव; cf. Pār. Gr. ii. 4. 2; Āçv. Gr. i. 22. 21; Gobh. Gr. ii. 10. 41. — [2] vi. 48. 1. — [3] E आदापयति; Ath. Paddh. and Daç. Kar. पुष्पाक्षितां अंजलिं (Daç. Kar. पुष्पोदकाञ्जलिं) पूरयित्वा । आज्येनाभिघार्य । ब्रह्मचारिव्रतं द्वादशवर्षिकं वा षड्वर्षिकं वा त्रिवर्षिकं वा एकवर्षिकं वा अहोरात्रं वा रोमनखधारणं । अक्षारक्षीरभोजनं । अधःशयनं । यथाशास्त्रविहितं यथा स्मर्यमाणधर्मकं । यथाशक्त्या चरिष्यामि तदग्नौ निवेदयामि । अग्नये स्वाहा । तत्र मे ऽविघ्नमस्तु तथा अस्तु इति ब्रूयात् । अग्नये स्वाहा । पुनरञ्जलिं पूरयित्वा उदकेनाभिघार्य । यथाप्राक्पठितं तद्गुरवे निवेदयामि तत्र मे ऽविघ्नमस्तु । एवं गुरवे नमः । अग्ने व्रतपत इत्यादि अष्टौ समिध आदधाति. — [4] Daç. Kar. (twice) व्यनशस्तेन. Are the words to be emended to विनशत्तेन or नीनशत्तेन? cf. sū. 7. — [5] Cf. VS. i. 5; ii. 28; Māitr. S. iv. 9. 24; TS 1. 5. 10. 3; Tāit. Ār. iv. 41. 3–6; Çāñkh. Çr. iv. 8. 6; 12. 8. — [6] Bi अचार्षं. — [7] Is the word to be emended to न? cf. sū. 6. — [8] Ch has

हितसमित्कं[1] सावित्रीं वाचयति ।८। पच्छः प्रथमम् ।९। ततो ऽर्धर्चशः ।१०। ततः संहिताम् ।११। अथैनं संशास्त्यग्नेश्चासि ब्रह्मचारिन्मम चापो ऽशान कर्म कुरूर्ध्वस्तिष्ठन्मा दिवा स्वाप्सीः[2] समिध आधेहि[3] ।१२। अथैनं[4] भूतेभ्यः परिददात्यग्नये[5, 6] त्वा परिददामि ब्रह्मणे त्वा परिददाम्युदङ्ग्राय[7] त्वा शूल्वाणाय[8] परिददामि शत्रुंजयाय त्वा क्षात्राणाय परिददामि मार्त्युंजयाय[9] त्वा मार्त्यवाय[10] परिददाम्यघोराय त्वा परिददामि तक्षकाय त्वा वैशालेयाय परिददामि हाहाहूहूभ्यां त्वा गन्धर्वाभ्यां[11] परिददामि यो-

---

the numbers २, ३ etc. before the colons; Daç. Kar. fills out as follows, in accordance with sūtra 6: वयो व्रतपते (Cod. °पतये) व्रतं चरिष्यामि वायवे (Cod. वायो) व्रतपतये स्वाहा ।२। सूर्य व्रतपते (Cod. °पतये) व्रतं च° सूर्याय व्रतपतये स्वाहा ।३। etc. इति अष्टौ व्रतानि; Ath. Paddh. . . . इत्यष्टौ मंत्राः कल्पजाः. Cf. TS. i. 6. 6. 3. —

[1] E °समित्तं. — [2] P Bi ष्वाप्सीः. — [3] Daç. Kar. अथाचार्य आचारं कथयति। स्वस्थाने उपविश्य अग्नेश्चासि ब्रह्मचारिन्मम गौरवों (!) कुर्याः (Cod. °यात्) । . . . मा दिवा स्वाप्सीः । नित्यं भोजनकाले अपो ऽशान कर्म कुरु। ऊर्ध्वस्तिष्ठन्मा कूपं निरीक्षयेः (Cod. °येत्)। मा वृक्षारोहणं कुरु । मा यज्ञायं (!) कुरु । बाढमिति । इत्येवमादि आचारान्कथयति । करवाणीति ब्रह्मचारी वदति. Cf. Āçv. Gr. i. 22. 2; Çāṅkh. Gṛ. ii. 4. 5; Gobh. Gṛ. ii. 10. 34; Pār. ii. 3. 2; Çat. Br. xi. 5. 4. 5. — [4] Ath. Paddh. अथैनं भूतेभ्यः परिददामीति षोडश परिदानानि ददातीति; Daç. Kar. ततः षोडश परिदानानि ददाति। अथैनं भूतेभ्यः परिददाम्यग्नये etc. as above. — [5] Thus emended. All MSS. and Daç. Kar. (cf. the preceding note) परिददाम्य°; it is probably an old error, due to the subsequent occurrences of the word in the formula. — [6] Ch °ग्ने; Bh °ग्नए. — [7] Daç. Kar. उदक्याय. — [8] KBü शूल्वबाणाय; Daç. Kar. शूक्ष्माणाय. — [9] So emended; K P Bh Bi मार्तुंजयाय; Ch E Bü and Daç. Kar. मार्तुंजयि; Pet. Lex. emends to मार्त्युंजय्यै (dative of मार्त्युंजयी). — [10] So emended; K P Bh Bi E मार्त्तव्यैः; Ch Bü and Daç. Kar. मार्त्तव्यै; this latter reading is emended to मार्त्यव्यै by the Pet. Lex. to match the emended मार्त्युंजय्यै; see the preceding note. Cf. also viii. 10. 23. — [11] Ch here inserts त्वा, above the line. —

गक्षेमाभ्यां त्वा परिददामि भयाय च त्वाभयाय[1] च[2] परिददामि विश्वेभ्यस्त्वा देवेभ्यः परिददामि सर्वेभ्यस्त्वा देवेभ्यः परिददामि विश्वेभ्यस्त्वा भूतेभ्यः परिददामि सर्वेभ्यस्त्वा[3] भूतेभ्यः परिददामि सप्रजापतिकेभ्यः[4] । १३ । स्वस्ति चरतादिहेति मयि रमन्तां ब्रह्मचारिण इत्यनुगृह्णीयात् । १४ । नानुप्रणुदेत् । १५ । प्रणीतीरभ्यावर्तस्वेत्यभ्यात्ममावर्तयति[5] । १६ ।

यथापः प्रवता[6] यन्ति यथा मासा अहर्जरम्[7] ।
एवा मा ब्रह्मचारिणो धातरायन्तु[8] सर्वदा ॥

स्वाहेत्याचार्यः समिधमादधाति[9] । १७ । ॥ ७ ॥ ॥ ५६ ॥

आङ्गाया दुहितेति द्वाभ्यां[10] भाद्रमौञ्जीं मेखलां ब्राह्मणाय बध्नाति । १ । मौर्वीं क्षत्रियाय धनुर्ज्यां[11] वा । २ । क्षौमिकीं वैश्याय । ३ । मित्रावरुणयोस्त्वा हस्ताभ्यां

---

[1] E and Daç. Kar. भवाय च त्वाभवाय. — [2] Wanting in K. — [3] Daç. Kar. reads the passage beginning here as follows: सर्वेभ्यस्त्वा भूतेभ्यस्त्वा । सुल्बाणाय (! for शूलबाणाय?) त्वा । सप्रजापतिकेभ्यः परिददामि । व्रीहियवशमीमिश्रोदकेन अभिमंत्र्य मूर्ध्नि दद्यात् । इति परिदानं. — [4] Cf. Çat. Br. xi. 5. 4. 3; Āçv. Gṛ. i. 20. 8; Çāṅkh. Gṛ. iv. 18. 2. — [5] vii. 105. 1; Daç. Kar. and Ath. Paddh. अर्धर्चेन आत्मसंमुखं करोति. — [6] Bü प्रपता; Daç. Kar. पर्वता. — [7] P °जुरं. — [8] Ch धारयन्तु; Daç. Kar. reads the last two pādas as follows: एवा वा ब्रह्मचारिणो धातरायूंषि कल्पतां (!); Ath. Paddh. यथापः प्रवता यंत्येकया कल्पजया. Cf. Tāitt. Ār. vii. 3. 3; Tāitt. Up. i. 4. 3. — [9] Daç. Kar. and Ath. Paddh. add here: ततः अभ्यातानानि जुहोति । वाताज्जात (iv. 10. 1; cf. Kāuç. 58. 9) इति शङ्खमणिं संपात्याभिमंत्र्य ग्रीवायां बध्नाति । ततः संध्यावदनं करोति; Ath. Paddh. संध्यालोकषट्करोति (! for संध्यां वषट्करोति?); cf. Kāuç. 57. 16, note. — [10] vi. 133. 4, 5. — [11] Ch Bi धनुर्या. —

प्रसूतः प्रशिषा प्रयच्छामीति पालाशं दण्डं ब्राह्मणाय प्रयच्छति । ४ । आश्वत्थं क्षत्रियाय । ५ । न्यग्रोधावरोहं वैश्याय।६। यद्यस्य दण्डो भज्येत यच्चृते चिदभिश्रिष[1] इत्येतयालभ्याभिमन्त्रयते । ७ । सर्वत्र शीर्णे भिन्ने नष्टे ऽन्यं कृत्वा पुनर्मैत्विन्द्रियमित्यादधीत[2, 3]। ८। अथ वासांसि।९। ऐणेयहारिणानि ब्राह्मणस्य।१०। रौरवपार्षतानि[4] क्षत्रियस्य । ११ । आजाविकानि वैश्यस्य । १२ । सर्वेषां क्षौमशाणकम्बलवस्त्रम्[5, 6] । १३ । काषायाणि । १४ । वस्त्रं चाप्यकाषायम्[7, 8] ।१५। भवति[9] भिक्षां देहीति ब्राह्मणश्चरेत्[10] ।१६। भिक्षां भवती ददात्विति क्षत्रियः।१७। देहि भिक्षां भवतीति वैश्यः । १८ । सप्त कुलानि ब्राह्मणश्चरेत्त्रीणि क्षत्रियो द्वे वैश्यः।१९। सर्वं ग्रामं चरेद्भैक्षं स्तेनपतितवर्जम् । २० । मय्यग्र इति [11]पञ्चप्रश्नेन जुहोति । २१ । सं मा सिञ्चन्त्विति[12] त्रिः[13] पर्युक्षति[14] । २२ । यदग्ने तपसा तपो ऽग्ने तपस्तप्यामह इति द्वाभ्यां[15] परि-

---

[1] xiv. 2. 47. — [2] vii. 67. 1. — [3] K E °ददीत. — [4] K P Bi Bh °पारिषतानि. — [5] E Ch (sec. man.) °शाणः. — [6] Ch °वस्त्र. — [7] K याघका°. — [8] K P Bh °काषायों (! for °काषायं ओं, the latter belonging to the next sūtra?). — [9] Ch P have a colon here, perhaps misunderstanding भवति as the verb, and joining it to the previous sūtra? — [10] Ath. Paddh. and Daç. Kar. अत्र स्थाने सन्ध्यालोकषट्करोति (cf. Kāuç. 56. 17, note) । भिक्षां च । माता प्रथमं भिक्षां ददाति । ओं स्वस्ति गृहीत्वा । भिक्षां ब्रह्मचारी गुरवे निवेद्य । भिक्षां भो इति मन्त्रेण । आचार्यः प्रतिगृह्णाति । सुभिक्षां भोरिति (!). — [11] vii. 82. 2. — [12] vii. 33. 1. — [13] Bü Ch E Bi त्रिष्प°. — [14] Ath. Paddh. and Daç. Kar. ततो अग्निकार्यं करोति। अव्यचसश्चेति (Cod. अव्यसश्चेति; xix. 68. 1) जपति । सं मा etc. as Kāuçika. — [15] vii. 61. 1, 2. —

समूहयति।२३। इदमापः प्रवहतेति[1] पाणी प्रक्षालयते[2]।२४। सं मा सिञ्चन्त्विति[3] त्रिः[4] पर्युक्षति[5]। २५। अग्ने समिधमाहार्षमित्यादधाति चतस्रः[6]। २६। एधो ऽसीत्यूष्मभक्षं भक्षयत्या निधनात्[7]।२७। त्वं नो मेध[8] इत्युपतिष्ठते[9]।२८। यदन्नमिति[10] तिसृभिर्भैक्षस्य जुहोति। २९। अहरहः समिध आहृत्यैवं सायंप्रातरभ्यादध्यात्।३०। मेधाजनन आयुष्यैर्जुहुयात्[11]।३१। यथाकामं द्वादशरात्रमरसाशी भवति[12]। ३२। ॥ ८ ॥ ॥ ५७ ॥

---

[1] vii. 98. 3. — [2] Bi °त्तालयति. — [3] vii. 33. 1. — [4] Bü Ch E Bi त्रिष्प°. — [5] Ath. Paddh. and Daç. Kar. पुनः त्रिः पर्युत्तति। अग्नये त्वा जुष्टं प्रोत्तामि. — [6] xix. 64. 1; Ath. Paddh. and Daç. Kar. चतसृभिः प्रत्येकं समिधमादधाति. Then follow in Daç. Kar. four verses corresponding to xix. 64. 1–4 with the following variants: Verse 1[d], यच्छति for यच्छतु; 2[c], भोजय for वर्धय, and at the end of the verse there is added दीर्घमायुः कृणोतु मे; 4[d], आचार्याय for आ शंसय. — [7] vii. 89. 4; E निधानात्. — [8] vi. 108. 1. — [9] Ath. Paddh. अग्निं. — [10] vi. 71. 1–3; Daç. Kar. cites the verses in full, substituting vi. 53. 2[cd] for vi. 71. 3[cd]: वैश्वानरो(नो) अदब्धस्तनूपा अन्तस्तिष्ठाति दुरितानि विश्वा. — [11] For the आयुष्यगण see Kāuç. 54. 11, note; for the मेधाजनन, Kāuç. 10. 1 fg. — [12] The Ath. Paddh. adds a chapter of वेदव्रतानि, to wit: त्रिषवनं। अनस्तमिते भोजनं। अधःशयित्वं। मैलव्रतं (! for मौन°?) द्वादशरात्रं चरेत्। तत्रभावात् द्विजानां नार्हं इति वचनात् ॥ अथाब्दिके वेदव्रतं करोति। . . . स्थण्डिले ऽग्निं स्थापयित्वा वपनं करोति। पुष्पाचिताञ्जलिं पूरयित्वा आज्येनाभिघार्य। वेदव्रतं सांवत्सरिकं रोमनखानि (!) धारणं यथाशास्त्रविहितं। यथास्मार्यमाणधर्मकं। यथाशक्त्या चरिष्यामि etc. (as in Kāuç. 56. 5, note) . . . तथास्त्वित्याचार्यो ब्रूयात्। अग्नये व्रतपतय इत्यष्टौ समिध आदधाति। इति वेदव्रतग्रहणं समाप्तं॥ अथ वेदव्रतदीत्तणमुच्यते। इदावत्सरायेति चतसृभिः कौशिकोक्तैः (42. 1) आज्यं जुहुयात्। समिधो ऽभ्यादध्यात्। एतदनन्तरं सर्वं पूर्ववत्करोति। अभ्यातानाद्युत्तरतंत्रं। इति वेदव्रतं समाप्तं॥ अथ कल्पव्रतं षण्मासिकं करोति। ग्रहणमुद्दीत्तणं वेदव्रतवत्करोति॥ अथ मृगारव्रतं (! both MSS.) उच्यते। षड्रात्रमध्ये अव्यचसश्च (MSS. अव्यसश्च; xix. 68. 1) जपति। स्थण्डिले ऽग्निं

भद्राय कर्णः क्रोशतु भद्रायाक्षि वि वेपताम् ।
परा दुःष्वप्न्यं[1] सुव यद्भद्रं तन्न आ सुव ॥
अक्षिवेपं[2] दुःष्वप्न्यमार्तिं पुरुषरेषिणीम्[3] ।
तदस्मदश्विना युवमप्रिये प्रति मुञ्चतम्[4] ॥
यत्पार्श्वादुरसो मे अङ्गादङ्गादववेपते ।
अश्विना पुष्करस्रजा तस्मान्नः पातमंहस[5]

इति कर्णं क्रोशन्तमनुमन्त्रयते।१। अक्षि वा स्फुरत्[6]।२। वि देवा जरसोत देवा आवतस्त उप प्रियमन्तकाय मृत्यव आ रभस्व प्राणाय नमो विषासहिमित्यभिमन्त्रयते[7.8]।३। ब्राह्मणोक्तमृषिहस्तश्च।४। कर्मणे वां वेषाय वां सुकृताय वामिति[9] पाणी प्रक्षाल्य।५। निर्दुरर्मण्य[10] इति संधाव्य।६। शुद्धा न आप इति[11] निष्ठीव्य जीवाभिराचम्य[12.13]।७। एहि[14] जीवमित्याञ्जनमणिं बध्नाति।८। वाताज्जात[15] इति

स्नापयित्वा वपनं करोति। मेखलायज्ञोपवीतदण्डादानं यथोक्तं करोति (Kāuç. 56. 1 fg.)। पुष्पाञ्चिताञ्जलिं पूरयित्वा। मृगारव्रतं अनस्तमिते भोजनं। अधःशयित्वं त्रिषवणं अस्तमिते भोजनं। अक्षीरभोजनं। रोमनखानि धारणं (!)। यथाशास्त्रविहितं etc. (like the वेदव्रत above)। इति मृगारव्रतं ॥ विषासहिव्रतं त्रिरात्रं वा चतूरात्रं ग्रहणं उद्दीक्षणं। मृगारव्रतवत्करोति॥ यमव्रतं द्वादशरात्रं मृगारवत्करोति। व्रतांते धेनुर्दक्षिणा। ब्रह्मचारी ददाति· —

[1] Ch E P Bi दुष्वप्नं. — [2] K ०वेषं. — [3] K Bh ०रेषणीं· — [4] K मुञ्चतां· — [5] K B Ch E Bi पातु०. — [6] Ch स्फरत्; E प्फुरत्. — [7] iii. 31. 1; iv. 13. 1; v. 30. 1; vii. 32. 1; viii. 1. 1; 2. 1; xi. 4. 1; xvii. 1-5; cf. the आयुष्यगण, Kāuç. 54. 11, note. — [8] E has a colon here. — [9] VS. i. 6; TS. i. 1. 4. 1; Tāitt. Br. iii. 2. 4. 1; Māitr. S. i. 1. 4; cf. Kāuç. 1. 36. — [10] xvi. 2. 1. — [11] xii. 1. 30. — [12] D (schol.) to Kāuç. 3. 4, जीवा स्थेति चतसृभिः (xix. 69. 1-4). — [13] MSS. ०चम्येहि, with Vedic sandhi (Whitney 127, end). — [14] iv. 9. 1. — [15] iv. 10. 1; cf. the Paddhatis, Kāuç. 56. 17, note. —

कृशनम्।९। नव प्राणानिति[1] मन्त्रोक्तम्।१०। घृतादुल्लुप्तमा त्वा चृतत्वृतुभिष्ट्वा मुञ्चामि त्वोत देवा आवतस्त उप प्रियमन्तकाय मृत्यव आ रभस्व प्राणाय नमो विषासहिमित्यभिमन्त्रयते[2. 3]।११। निर्दुरर्मण्य[4] इति सर्वसुरभिचूर्णैररण्ये ऽप्रतीहारं[5] प्रलिम्पति।१२। अथ नामकरणम्[6]।१३। आ[7] रभस्वेमामित्यविच्छिन्नामुदकधारामालम्भयति[8. 9]।१४। पूतुदारु[10] बध्नाति[11]। १५। पाययति[12]। १६। यत्ते वास[13] इत्यहतेनोत्तरसिचा प्रच्छादयति[14]। १७। शिवे ते स्तामिति

---

[1] v. 28. 1. — [2] v. 28. 14, 12, 13; iii. 11. 1; iv. 13. 1; vii. 13. 1; v. 30. 1; vii. 32. 1; viii. 1. 1; 2. 1; xi. 4. 1; xvii. 1–5; cf. the आयुष्यगण, Kāuç. 54. 11, note. — [3] Ch °मन्त्रयति. — [4] xvi. 2. 1. — [5] Ch E Bü प्रति°; cf. Kāuç. 28. 13. Or is प्रतीहारं the right reading as in Kāuç. 29. 22? — [6] Daç. Kar. and Ath. Paddh. एकादशे ऽहनि द्वादशे वा त्रयोदशे वा मासे वा प्रथमवदस्य मातुरुपस्थे। तालुनि संपातानानयति दधिमध्वाशयति (Daç. Kar. °शमयति; cf. Kāuç. 10. 17, 18) । शतरात्रं वा नामकरणमुच्यते। यथाकुलधर्मेण वा. — [7] viii. 2. 1; cf. the आयुष्यगण Kāuç. 54. 11, note. — [8] K °वच्छिनामु°. — [9] Ath. Paddh. and Daç. Kar. आ रभस्वेत्यर्थसूक्तेन माणवकस्य दक्षिणहस्ते °धारां निनयति।. Then follow in the Daç. Kar. verses 1–10 of viii. 2, in full. — [10] K Ch (prim. man.) पूत°; cf. Kāuç. 8. 15. — [11] Daç. Kar. and Ath. Paddh. देवदारुमणिं (Ath. Paddh. शालमणिं) संपात्याभिमंत्र्य निघृष्य बध्नाति. — [12] Daç. Kar. and Ath. Paddh. पाययति। ततः पुण्याहांते नाम करोति। द्व्यक्षरं चतुरक्षरं वा। मन्यसंयुक्तं (! for मनुष्य°?) देवतासंयुक्तं वा। हिरण्यमन्तर्धाय पिता माणवकस्य दक्षिणतस्करौ (! for °तः कर्णे ?) नाम कथयति. — [13] viii. 2. 16. — [14] Ath. Paddh. and Daç. Kar. यत्ते वास इत्यृचा यंत्रनिर्मुक्तवस्त्रेण उदग्दशेन आच्छादयति ततः चत्वारि परिदानानि ददाति। शिवे ते स्तामिति द्वाभ्यां (viii. 2. 14, 15; but Daç. Kar. cites in full only viii. 2. 14, 15ab, dividing the whole into two verses after ते हृदे, at the end of the second line of verse 14) पार्थिवस्येति द्वाभ्यां (ii. 29. 1, 2) मा प्र गामेति द्वाभ्यां (xiii. 1. 59, 60) व्रीहियवौ शमीप्रान्तानि उदकं च। द्यावापृथिवीभ्यां त्वा परिददामि (both MSS. of Ath. Paddh. °ददाति;

कुमारं प्रथमं निर्णयति[1] । १८ । शिवौ ते स्तामिति[2] व्रीहियवौ प्राशयति[3] । १९ । अह्ने[4] च त्वेत्यहोरात्राभ्यां परिददाति । २० । शरदे त्वेत्यृतुभ्यः[5] । २१ । उदस्य केतवो मूर्धाहं विषासहिमित्युद्यन्तमुपतिष्ठते[6, 7] । २२ । मध्यंदिनेऽस्तं यन्तं सकृत्पर्यायाभ्याम् । २३ । अंहोलिङ्गानामापो भोजनहवींष्युक्तानि[8] । २४ । उत्तमासु यन्मातली रथक्रीतमिति[9] सर्वासां द्वितीया । २५ । ॥ ९ ॥ ॥ ५८ ॥

---

cf. Kāuç. 54. 14, note; 54. 17) । कुमारस्य मूर्ध्नि ददाति पुनः । शिवौ ते स्तामिति द्वाभ्यां (viii. 2. 18, 19) पार्थिवस्येति द्वाभ्यां मा प्र गामेति द्वाभ्यां व्रीहियवाभ्यां त्वा परिददामि । अह्ने च त्वेत्येकया (viii. 2. 20) पार्थिवस्येति द्वे मा प्रगामेति द्वे अहोरात्राभ्यां त्वा परिददामि । शरदेत्येकया (viii. 2. 22) पार्थिवस्येति द्वे व्रीहियवौ शमीपत्रिका उदकं च । ऋतुभ्यस्त्वा परिददामि । माणवकस्य मूर्ध्नि ददाति । अभ्यातानाद्युत्तरतन्त्रं । . . . इति नामकरणं समाप्तं —

[1] viii. 2. 14; Ath. Paddh. and Daç. Kar. अथ चतुर्थे मासि निष्क्रमणमुच्यते । शिवे ते स्तामिति द्वाभ्यां कुमारस्य गृहाद्बहिर्निःक्रामयति । उद्वयं तमसस्परि इत्येकया (vii. 53. 7) आदित्यं निरीक्षते । एवं कुमारस्य पूर्वोक्तानि चत्वारि परिदानानि ददाति (cf. sū. 17, note) । अभ्यातानाद्युत्तरतंत्रं जुहोति । निर्णयनं समाप्तं — [2] viii. 2. 18. — [3] Daç. Kar. and Ath. Paddh. अथ षष्ठे (Ath. Paddh. अष्टमे) मासि अन्नप्राशनमुच्यते । अव्यचसश्च (MSS. अव्यसश्च; xix. 68. 1) इत्याद्यभ्यातानान्तं कृत्वा । भूमे मातरित्येकया (xii. 1. 63) कुमारं भूम्यामुपवेशयति । शिवौ ते स्ताम् etc. आभ्यां (viii. 2. 18, 19) व्रीहियवावभिमंत्र्य निघृष्य पाययति सर्वान्नाद्यं पूरयति । स्रुक्स्रुवं पुस्तकं द्रव्यं ददाति पूर्वोक्तानि चत्वारि परिदानानि ददाति (cf. sū. 17, note, and 20) स्वस्ति न इन्द्रोर्मिति (!) कुमारमन्नं प्राश्य । अभ्यातानाद्युत्तरतन्त्रं । इत्यन्नप्राशनं समाप्तं — [4] viii. 2. 20. — [5] viii. 2. 22; for this and the preceding sūtra cf. sū. 17, note. — [6] xiii. 2. 1; xvi. 3. 1; xvii. 1–5. — [7] P °तिष्ठंते. — [8] Cf. Kāuç. 52. 16. For the अंहोलिङ्गगण see Kāuç. 32. 27, note; cf. 52. 16. — [9] xi. 6. 23; cf. the end of the अंहोलिङ्गगण Kāuç. 32. 27, note. —

विश्वे देवा[1] इति विश्वानायुष्कामो यजते[2]। १। उपतिष्ठते। २। इदं जनास[3] इति द्यावापृथिव्यौ पुष्टिकामः। ३। संपत्कामः। ४। इन्द्र जुषस्वेतीन्द्रं[4] बलकामः। ५। इन्द्रमहमिति[5] पण्यकामः[6]। ६। उदेनमुत्तरं नय यो ऽस्मानिन्द्रः सुत्रामेति[7] ग्रामकामः। ७। ग्रामसांपदानामप्ययः[8, 9]। ८। यशसं मेन्द्र इति[10] यशस्कामः। ९। मह्यमाप इति[11] व्यचस्कामः। १०। आगछत इति[12] जायाकामः। ११। वृषेन्द्रस्येति[13] वृषकामः। १२। आ त्वाहार्षं ध्रुवा द्यौरिति[14] ध्रौव्यकामः। १३। त्यमू षु त्रातारमा मन्द्रैरिति[15] स्वस्त्ययनकामः। १४। सामास्त्वाग्ने ऽभ्यर्चतेत्यग्निं[16] संपत्कामः। १५। पृथिव्यामिति[17] मन्त्रोक्तम्। १६। तदिदास धीतो[18] वेतीन्द्राग्नी[19]। १७। यस्येदमा रजो ऽथर्वाणमदितिर्द्यौर्दितिः पुत्राणां बृहस्पते सवितरित्यभ्युदितं[20, 21] ब्रह्मचारिणं बोधयति[22]। १८। धाता दधातु प्रजापतिर्जनयत्यन्वद्य नो

---

[1] i. 30. 1; cf. Kāuç. 52. 18. — [2] Dārila, fol. 5ª l. 5, describing the contents of chapter 59, विश्वे देवा इति विश्वानायुःकाम इति काम्यानि. — [3] i. 32. 1. — [4] ii. 5. 1. — [5] iii. 15. 1. — [6] Ch (sec. man.) पुण्य°; cf. Kāuç. 50. 12. — [7] vi. 5. 1; 6. 1; vii. 91. 1. — [8] Ch ग्रामसंपदाम°; E °संपदानाम°. — [9] Cf. Kāuç. 11. 7. — [10] vi. 58. 1; cf. the first वर्चस्यगण, Kāuç. 13. 1, note. — [11] vi. 61. 1. — [12] vi. 82. 1. — [13] vi. 86. 1. — [14] vi. 87. 1; 88. 1. — [15] vii. 85. 1; 86. 1; 117. 1; cf. the स्वस्त्ययनगण, Kāuç. 25. 36, note. — [16] ii. 6. 1; vii. 82. 1. — [17] iv. 39. 1. — [18] v. 2. 1; vii. 1. 1. — [19] E °ग्निं. — [20] vi. 33. 1; vii. 2. 1; 6. 1; 7. 1; 16. 1; for vii. 6. 1, as also for vii. 46. 1 of the next sūtra cf. the पत्नीवंतगण (!), Ath. Pariç. 34. 19: अदितिर्द्यौः सिनीवालि कुहूं देवीमिति (vii. 47. 1) त्रीणि सूक्तानि पत्नीवंतः। इति पत्नीवंतगणः॥ १९॥. Cf. Vāit. sū. 1. 16. — [21] Bi has a colon here. — [22] E Ch (prim. man.) °ते. —

यन्न इन्द्रो ययोरोजसा विष्णोर्नु कमग्नाविष्णू सोमारुद्रा सिनीवालि बृहस्पतिर्नो यत्ते देवा अकृण्वन्पूर्णा पश्चात्प्रजापते ऽभ्यर्चत को अस्या न इति[1] प्रजापतिम् । १९ । अग्न इन्द्रश्चेति[2] मन्त्रोक्तान्सर्वकामः । २० । य ईशे ये भक्षयन्त[3] इतीन्द्राग्नी लोककामः ।२१। अन्नं ददाति[4] प्रथमम् । २२ । पशूपाकरणमुत्तमम् । २३ । सर्वपुरस्ताद्धोमा[5, 6] युज्यन्ते ।२४। दोषो गायेत्यथर्वाणं[7] समावृत्याश्नाति ।२५। अभयं द्यावापृथिवी श्येनो ऽसीति[8] प्रतिदिशं सप्तर्षीनभयकामः । २६ । उत्तरेण[9] दीक्षितस्य वा ब्रह्मचारिणो वा[10] दण्डप्रदानम् । २७ । द्यौश्च म इति[11] द्यावापृथिव्यौ विरिष्यति[12] ।२८। यो अग्नाविति[13] रुद्रान्स्वस्त्ययनकामः[14] स्वस्त्ययनकामः । २९ । ॥ १० ॥ ॥ ५९ ॥

॥ इत्यथर्ववेदे कौशिकसूत्रे सप्तमो ऽध्यायः समाप्तः[15] ॥

---

[1] vii. 17. 1; 19. 1; 20. 1; 24. 1; 25. 1; 26. 1; 29. 1; 46. 1; 51. 1; 79. 1; 80. 1; 80. 3; 82. 1; 103. 1; E has a colon here. — [2] vii. 110. 1. — [2] vii. 110. 1. — [3] ii. 34. 1; 35. 1. — [4] E has a colon here. — [5] K सर्व°; E सर्व. — [6] Ch °द्धोमाय्युज्यन्ते. — [7] vi. 1. 1; cf. Daç. Kar. and Ath. Paddh. to Kāuç. 42. 12, note. — [8] vi. 40. 1; 48. 1; cf. the first अभयगण, Kāuç. 13. 1, note. — [9] vi. 48. 1. — [10] Bi has a colon here. — [11] vi. 53. 1. — [12] So Ch Bü E Bi K (prim. man.); P Bh K (sec. man.) वरिष्यन्निति; cf. Kāuç. 72. 30. — [13] vii. 87. 1. — [14] Ch ends here; E inserts ओँ; cf. Kāuç. 25. 36, note. — [15] K P Bh here divide the text into two halves: इति पूर्वार्धः समाप्तः —

॥ ओं ॥

अग्नीनाधास्यमानः सवान्वा[1] दास्यन्संवत्सरं ब्रह्मौद-
निकमग्निं दीपयति । १ । अहोरात्रौ वा । २ । याथा-
कामी वा । ३ । संवत्सरं तु प्रशस्तम् । ४ । सवाग्निसे-
नाग्नी तादर्थिकौ निर्मथ्यौ वा भवतः । ५ । औपासनौ[2]
चोभौ हि विज्ञायेते[3] । ६ । तस्मिन्देवहेडनेनाज्यं[4] जुहुयात्
। ७ । समिधो ऽभ्याद्ध्यात् । ८ । शकलान्वा । ९ । तस्मि-
न्यथाकामं सवान्ददात्येकं[5] द्वौ सर्वान्वा । १० । अपि वै-
कैकमात्माशिषो दातारं वाचयति । ११ । पराशिषो ऽनु-
मन्त्रणमनिर्दिष्टाशिषश्च[6] । १२ । दातारौ कर्माणि कुरुतः
। १३ । तौ यथालिङ्गमनुमन्त्रयते । १४ । उभयलिङ्गैरुभौ
पुंलिङ्गैर्दातारं[7] स्त्रीलिङ्गैः पत्नीम् । १५ । उदहृत्संप्रेषव-
र्जम्[8, 9] । १६ । अथ[10] देवयजनम् । १७ । तद्यत्समं
समूलमविदग्धं[11] प्रतिष्ठितं प्रागुदक्प्रवणमाकृतिलोष्टव-

[1] Dārila, fol. 5ª l. 5: अग्नीनाधास्यमानः सवानिति सवाः (Cod. सर्वां इति सर्वाः). — [2] So Ch Bi Bü (prim. man.); K P Bh Bü (sec. man.) उपासनौ. — [3] K विज्ञायते. — [4] D (schol.) to Kāuç. 46. 30, यद्देवा देवहेडनमिति सर्वो ऽनुवाकः (vi. 114. 1 fg.). — [5] MSS. सवां. — [6] E has a colon here. — [7] Thus emended; MSS. पुल्लिंगै°. —. [8] Bh उदरहृत्सं°. — [9] Cf. sū. 25. — [10] E अथैतद्. — [11] Ch has a colon here. —

ल्मीकेनास्तीर्य दर्भैश्च लोमभिः पशूनाम् । १८ । अग्ने जायस्वेति[1] मन्थन्तावनुमन्त्रयते[2] । १९ । पत्नी मन्त्वं संनमयति । २० । यजमानं च[3] । २१ । कृणुत धूममिति[4] धूमम् । २२ । अग्ने ऽजनिष्ठा इति[5] जातम् । २३ । समिद्धो अग्न इति[6] समिध्यमानम् । २४ । परेहि[7] नारीत्युदहृतं[8] संप्रेष्यत्यनुगुप्तामलंकृताम् । २५ । एमा[9] अगुरित्यायतीमनुमन्त्रयते । २६ । उत्तिष्ठ नारीति[10] पत्नीं संप्रेष्यति[11] । २७ । प्रति कुम्भं गृभायेति[12] प्रतिगृह्णाति । २८ । ऊर्जो भाग इति[13] निदधाति । २९ । इयं महीति[14] चर्मास्तृणाति[15] प्राग्ग्रीवमुत्तरलोम[16] । ३० । पुमान्पुंस इति[17] चर्मारोहयति । ३१ । पत्नी ह्वयमानम्[18] । ३२ । तृतीयस्यामपत्यमन्वाह्वयति[19] । ३३ । ऋषिप्रशिष्टेत्युदपात्रं[20] चर्मणि निदधाति । ३४ । तदापस्पुत्रास इति[21] सापत्यावनुनिपद्येते[22] । ३५ । ॥ १ ॥ ॥ ६० ॥

प्राचींप्राचीमिति[23] मन्त्रोक्तम् । १ । चतसृभिरुदपात्रमनुपरियन्ति[24] । २ । प्रतिदिशं ध्रुवेयं[25] विराडित्युपतिष्ठन्ते । ३ । पितेव पुत्रानित्यवरोह्य[26] भूमिं[27] तेनोदकार्था-

[1] xi. 1. 1. — [2] Ch E मन्थन्तामनु°. — [3] च is wanting in K. — [4] xi. 1. 2. — [5] xi. 1. 3. — [6] xi. 1. 4. — [7] xi. 1. 13. — [8] E °दहृतं; Ch °हितं; Bi has a colon here. — [9] xi. 1. 14. — [10] xi. 1. 14^b. — [11] Ch संप्रेख्यति; E °प्रेन्त्यति. — [12] xi. 1. 14^d. — [13] xi. 1. 15. — [14] xi. 1. 8. — [15] E has a colon here. — [16] MSS. प्राग्रोव°. — [17] xii. 3. 1 (iii. 6. 1). — [18] E हृयमानं. — [19] तृतीयस्यां sc. ऋचि; xii. 3. 3? — [20] xi. 1. 15^b. — [21] xii. 3. 4. — [22] So only Bü; K °त्यावनुपद्यते; the rest °नुनिपद्यते. — [23] xii. 3. 7. — [24] xii. 3. 7–10. — [25] xii. 3. 11. — [26] xii. 3. 12. — [27] E has a colon here. —

न्कुर्वन्ति । ४ । पवित्रैः संप्रोक्षन्ते । ५ । दर्भाग्राभ्यां चर्महविः[1] संप्रोक्षति । ६ । आदिष्टानां सानजानत्यै[2] प्रयच्छति । ७ । तांस्त्रेधा[3] भाग इति[4] व्रीहिराशिषु निदधाति । ८ । तेषां यः पितॄणां तं श्राद्धं करोति । ९ । यो मनुष्याणां तं ब्राह्मणान्भोजयति । १० । यो देवानां[5] तमग्ने सहस्वानिति[6] दक्षिणं जान्वाच्यापराजिताभिमुखः प्रह्वो वा मुष्टिप्रसृताञ्जलिभिः[7, 8] कुम्भ्यां निर्वपति । ११ । कुम्भ्या वा चतुः । १२ । तान्सप्त मेधानिति[9] सापत्यावभिमृशतः । १३ । गृह्णामि हस्तमिति[10] मन्त्रोक्तम् । १४ । त्रयो वरा इति[11] त्रीन्वरान्वृणीष्वेति । १५ । अनेन कर्मणा ध्रुवानिति[12] प्रथमं वृणीते । १६ । यावपरौ तावेव[13] पत्नी । १७ । एतौ ग्रावाणावयं ग्रावेत्युलूखलमुसलं[14] शूर्पं प्रक्षालितं चर्मण्याधाय । १८ । गृहाण[15] ग्रावाणावित्युभयं गृह्णाति । १९ । साकं सजातैरिति[16] व्रीहीनुलूखल आवपति । २० । वनस्पतिरिति[17] मुसल-

---

[1] E has a colon here. — [2] So (सा + अनजानत्यै) K P Bh Ch Bü (prim. man.); Bü (sec. man.) आदिष्टानंशान°; B E आदिष्टानांशान°. — [3] K P Bh तंस्त्रे°. — [4] xi. 1. 5. — [5] E has a colon here, after इति, and after मुखः. — [6] xi. 1. 6. — [7] E मुष्टिं; Ch (prim. man.) मुष्टिः. — [8] K has a colon here; cf. Kāuç. 67. 26 — [9] xii. 3. 16. — [10] xii. 3. 17^c. — [11] xi. 1. 10^c. — [12] Thus with very doubtful emendation: some verb like आप्नुयाम् or the like must be supplied, if it be correct; K Bü Ch P कर्मणो ध्रुवानिति; Bi कर्मणा ईवानिति; E कर्मणा ध्रुवानीति. Upon the basis of the last Roth suggests, on the margin of E, the emendation कर्मणोद्भवानीति, 'may I get to be uppermost through this rite'. — [13] K Ch E Bh तानेव. — [14] xi. 1. 9; xii. 3. 14. — [15] xi. 1. 10. — [16] xi. 1. 7. — [17] xii. 3. 15. —

मुच्छ्रयति[1] । २१ । निर्भिन्ध्यंशून्याहिं[2] पाप्मानमित्यवहन्ति । २२ । इयं ते धीतिर्वर्षवृद्धमिति[3] शूर्पं गृह्णाति । २३ । ऊर्ध्वं प्रजां विश्वव्यचा[4] इत्युदूहन्तीम्[5] । २४ । परा पुनीहि तुषं पलावानिति[6, 7] निष्पुनतीम्[8] । २५ । पृथग्रूपाणीत्यवक्षिणतीम्[9, 10] । २६ । त्रयो लोका[11] इत्यवक्षीणानभिमृशतः । २७ । पुनरा यन्तु[12] शूर्पमित्युद्वपति । २८ । उपश्वस[13] इत्यपवेवेक्ति । २९ । पृथिवीं त्वा पृथिव्यामिति[14] कुम्भीमालिम्पति[15] । ३० । अग्ने चरुरित्यधिश्रयति[16] । ३१ । अग्निः पचन्निति[17] पर्यादधाति । ३२ । ऋषिप्रशिष्टेत्युदकमपकर्षति[18] । ३३ । शुद्धाः पूताः पूताः पवित्रैरिति[19] पवित्रे अन्तर्धाय।३४।उदकमासिञ्चति।३५। ब्रह्मणा शुद्धाः संख्याता स्तोका[20] इत्यापस्तासु[21] निक्ता[22] तण्डुलानावपति । ३६ । उरुः प्रथस्वोद्योधन्तीति[23] श्रपयति । ३७ । प्र यच्छ पर्शुमिति[24] दर्भाहाराय दात्रं

---

[1] Ch उत्स्रयति. — [2] xi. 1. 9^{b}; xii. 3. 18. — [3] xi. 1. 11; xii. 3. 19^{c}. — [4] xi. 1. 9^{d}; xii. 3. 19. — [5] So emended; Bü Bi Ch (sec. man.) °हतीं; Ch (prim. man.) °हन्तीं; K °दूहति; E °द्वहंतो; P Bh °दूहती. — [6] K Bü Ch Bi पलावामिति. — [7] xi. 1. 11^{c}; xii. 3. 19^{d}. — [8] K निष्पुन्नतीं; E °पुनंतो; Bi Bh पुनती. — [9] xii. 3. 21. — [10] Ch °चिन्णती; E °चणंतीं. — [11] xii. 3. 20. — [12] xii. 3. 20^{d}. — [13] xi. 1. 12; Ch उप श्वासय (cf. AV. vi. 126. 1). — [14] xii. 3. 22. — [15] Ch Bü (sec. man.) °लिम्पयति. — [16] xi. 1. 16. — [17] xii. 3. 24. — [18] xi. 1. 15^{b}. — [19] xi. 1. 17; xii. 3. 25. — [20] xi. 1. 18; xii. 3. 28. — [21] So (इत्यापस्तासु) E only; Ch Bü इत्यायस्तासु; so also D (schol.) to Kāuç. 2. 9; K P Bh Bi इत्यायस्त्वासु. — [22] So emended; K P Bh Bü Bi नीत्का; E नीत्का. — [23] xi. 1. 19; xii. 3. 29. — [24] Ch परशुर्मिति; xii. 3. 31. Cf. Kāuç. 1. 24; 8. 11. —

प्रयच्छति । ३८ । ओषधीर्दान्तु पर्वन्नित्युपरि[1] पर्वणां लुनाति । ३९ । नवं बर्हिरिति[2] बर्हि स्तृणाति । ४० । उदेहि वेदिं धर्ता[3] ध्रियस्वेत्युद्वासयति । ४१ । अभ्यावर्तस्वेति[4] कुम्भीं प्रदक्षिणमावर्तयति[5] । ४२ । वनस्पते स्तीर्णमिति[6] बर्हिषि प्राचीं[7] निदधाति । ४३ । अंसध्रीमित्युपदधाति[8] । ४४ । उप[9] स्तृणीहीत्याज्येनोपस्तृणाति । ४५ । उपास्तरीरित्युपस्तीर्णामनुमन्त्रयते[10, 11] । ४६ । ॥ २ ॥ ॥ ६१ ॥

अदितेर्हस्तां सर्वान्समागा इति[12] मन्त्रोक्तम् । १ । तत उदकमादाय पात्र्यामानयति[13] । २ । दर्व्यां[14] कुम्भ्यां[15] । ३ । दर्विकृते[16] तत्रैव प्रत्यानयति[17] । ४ । दर्व्योत्तममपादाय[18] तत्सुहृद्दक्षिणतो ऽग्नेरुदङ्मुख आसीनो धारयति । ५ । अथोद्धरति । ६ । उद्धृते यदपादाय धारयति तदुत्तरार्ध आदधाति । ७ । अनुत्तराधरताया ओदनस्य यदुत्तरं तदुत्तरमोदन एवौदनः[19] । ८ । षष्ठ्यां शरत्स्विति[20] पश्चादग्नेरुपसाद-

---

[1] xii. 3. 31^b. — [2] xii. 3. 32. — [3] xi. 1. 21; xii. 3. 35. — [4] xi. 1. 22. — [5] Ch E ०वर्तते. — [6] xii. 3. 33. — [7] K प्राचीन्नि०. — [8] K P Bh Bü (prim. man.) अंसद्रीमि०; xi. 1. 23^c. — [9] xii. 3. 37. — [10] xii. 3. 38. — [11] Ch ०स्तीर्णम०. — [12] xi. 1. 24; xii. 3. 36. — [13] Bi has a colon here; for this and the following five sūtras cf. Kāuç. 68. 18–23. — [14] Thus Ch (sec. man.); Ch (prim. man.) and the remaining MSS. दर्व्या; cf. Kāuç. 68. 19. — [15] K कुम्भां; cf. Kāuç. 68. 19. — [16] E दर्वी०; Ch ०कृत्ते. — [17] Ch E have a colon here. — [18] P ०मुपादाय; Bh ०मूपा०; E व्यादाय. — [19] Ch ०दनं (cf. AV. xi. 3. 31); E एवौदन; K P Bh have ॥ here, as at the end of metrical passages; is the passage beginning with यदुत्तरं a half çloka? — [20] xii. 3. 34. —

यति । ९ । निधिं निधिपा इति[1] त्रीणि काण्डानि करोति । १० । यद्यज्जायेति[2] मन्त्रोक्तम् । ११ । सा पत्यावन्वारभते । १२ । अन्वारब्धेष्वत ऊर्ध्वं[3] करोति । १३ । अग्नी रक्ष इति[4] पर्यग्नि करोति । १४ । बभ्रेरध्वर्यो इदं[5] प्रापमित्युपर्यापानं[6] करोति । १५ । बभ्रेर्ब्रह्मन्निति[7] ब्रूयादनध्वर्युम् । १६ । घृतेन गात्रा सिञ्च सर्पिरिति[8] सर्पिषा विष्यन्दयति[9] । १७ । वसोर्या धारा आदित्येभ्यो अङ्गिरोभ्य इति[10] रसैरुपसिञ्चति । १८ । प्रियं प्रियाणामित्युत्तरतो[11] ऽग्नेर्धेन्वादीन्यनुमन्त्रयते । १९ । तामत्यासरत्प्रथमेति यथोक्तं दोहयित्वोपसिञ्चति[12] । २० ।

अत्यासरत्प्रथमा[13] धोक्ष्यमाणा[14] सर्वान्यज्ञान्बिभ्रती वैश्वदेवी ।[15]
उप वत्सं सृजत[16] वाश्यते गौर्व्यसृष्ट[17] सुमना हिंकृणोति[18, 19] ॥

---

[1] xii. 3. 42. — [2] xii. 3. 39. — [3] K Bü ऊर्ध्व. — [4] xii. 3. 43. — [5] xi. 1. 31; xii. 3. 45. — [6] So K Bü P Ch (prim. man.); Ch (sec. man.) उपर्यानं; Bi उपर्यायानं; E उपर्याप्यायनं; cf. Kāuç. 66. 7. — [7] Modification of xi. 1. 31. — [8] xi. 1. 31ᶜ; xii. 3. 45ᶜ. — [9] P Bi विष्यन्दयति. — [10] xii. 3. 41, 44. — [11] xii. 3. 49. — [12] E P दोहायित्वो°. — [13] Bü प्रथमो. — [14] So K; the rest धोक्षमाणा. — [15] The colon is wanting in K. — [16] Bü E सृजति; Ch (prim. man.) सृजति न; Ch (sec. man.) सृज न. — [17] K P Bi Bh व्यसृष्टः. — [18] P Bh Bü (sec. man.) Ch (prim. man.) सुमनाभिहिंकृणोति; this perhaps stands for सुमना अभिहिंकृणोति, a reading which goes against the metre, but seems rather more suitable to the sense. Is सुमना हिंकृणोति the product of emendation, arising from the better metrical feeling of the scribe? — [19] The colon is wanting in K. —

बधान वत्समभि धेहि भुञ्जती निज्य[1] गोधुगुप[2] सीद[3] दुग्धि ।
इरामस्मा ओदनं पिन्वमाना कीलालं घृतं मदमन्नभागम् ॥
सा धावतु यमराज्ञः सवत्सा सुदुघां पथा[4] प्रथमेह दत्ता ।
अतूर्णदत्ता[5] प्रथमेदमागन्वत्सेन गां सं सृज विश्वरूपामिति ॥ २१ ॥
इदं मे ज्योतिः समग्नय इति[6] हिरण्यमधिदधाति । २२ । एषा त्वचामित्यमोतं[7] वासो ऽग्रतः[8] सहिरण्यं निदधाति । २३ । ॥ ३ ॥ ॥ ६२ ॥

यदक्षेष्ववति[9] समानवसनौ[10] भवतः । १ । द्वितीयं तत्पापचैलं भवति तन्मनुष्याधमाय दद्यादित्येके । २ । शृतं त्वा हव्यमिति[11] चतुर आर्षेयान्भृग्वङ्गिरोविद उपसादयति । ३ । शुद्धाः पूता इति[12] मन्त्रोक्तम् ।४। पक्वं क्षेत्राद्वर्षं वनुष्वेत्यपकर्षति[13] । ५ । अग्नौ तुषानिति[14] तुषानावपति । ६ । परः कम्बूकानिति[15] सव्येन पादेन फलीकरणानपो-

---

[1] E निज्ये; Bü नित्य. — [2] Bü गोमधुगुप. [3] K सेद. — [4] E यथा; Ch (sec. man.) पथां; Ch (prim. et tert. man.) as above; so also the remaining MSS. — [5] Bi अकृष्टदत्वा or °दन्वा. — [6] xi. 1. 28; xii. 3. 50. — [7] xii. 3. 51. — [8] K Bh अग्रतः. — [9] xii. 3. 52. — [10] K समानवत्सनौ. — [11] xi. 1. 25. — [12] xi. 1. 27. — [13] xi. 1. 28ᵇ; xii. 3. 53. — [14] xi. 1. 29. — [15] xi. 1. 29ᵇ.

हति[1] । ७ । तन्वं स्वर्ग[2] इत्यन्यानावपति[3] । ८ । अग्ने प्रेहि समाचिनुष्वेत्याज्यं[4] जुहुयात् । ९ । एष सवानां संस्कारः । १० । अर्थलुप्तानि निवर्तन्ते । ११ । यथासवं[5] मन्त्रं संनमयति । १२ । लिङ्गं[6] परिहितस्य लिङ्गस्यानन्तरं कर्मकर्मानुपूर्वेण लिङ्गं परीक्षेत[7] ।१३। लिङ्गेन वा[8] । १४ । कर्मोत्पत्त्यानुपूर्वं[9, 10] प्रशस्तम्[11] ।१५। अतथोत्पत्तेर्यथालिङ्गम् । १६ । समुच्चयस्तुल्यार्थानां[12] विकल्पो वा । १७ । अथैतयोर्विभागः।१८।सूक्तेन[13] पूर्वं संपातवन्तं करोति।१९। श्राम्यत[14] इतिप्रभृतिभिर्वा सूक्तेनाभिमन्त्र्याभिनिगद्य[15] दद्याद्दाता वाच्यमानः ।२०। अनुवाकेनोत्तरं[16] संपातवन्तं करोति । २१ । प्राच्यै त्वा दिश[17] इतिप्रभृतिभिर्वानुवाकेनाभिमन्त्र्याभिनिगद्य दद्याद्दाता वाच्यमानः ।२२। यथासवमन्यान्पृथग्वेति[18] प्रकृतिः । २३ । सर्वे[19] यथोत्पत्त्याचार्याणां[20] पञ्चौदनवर्जम् । २४ । प्रयुक्तानां पुनरप्रयोगम्[21] ।२५। एके सहिरण्यां[22] धेनुं[23] दक्षिणां[24] । २६ । गो-

---

[1] K P Bh °ह्रयति. — [2] xii. 3. 54. — [3] K इति तन्वान°; Bi Ch (sec. man.) इत्यन्वान°. — [4] iv. 14. 5; xi. 1. 36. — [5] K Ch यथासव. — [6] Ch लिङ्ग. — [7] Bi has a colon here. — [8] This word is wanting in K. — [9] K कर्मोत्यत्या°; Bi °त्पत्या°. — [10] K °पूर्वें; Bh °पूर्व्यं. — [11] Ch (prim. man.) प्रशस्तमम°. — [12] Thus emended; Ch समुच्चयः; the rest समुच्चय. — [13] xi. 1. 1 — xi. i. 37? — [14] xi. 1. 30 fg. — [15] Bü °भिगद्य. — [16] xiii. 3. 1 — xiii. 3. 60? — [17] xii. 3. 55 fg. — [18] K पृथक्केति; Bh पृथग्मे°. — [19] K सर्विं; Bi has a colon here. — [20] MSS. यथोत्पत्या°. — [21] Bi पनः प्रयोगम्. — [22] Bi सहिरण्या. — [23] K Bi धेनुर्द°. — [24] K Bi दक्षिणांन्गो°; Bü °णान्गो°. —

दक्षिणां[1] वा कौरुपथिः । २७ । संपातवतो[2] ऽभिमन्त्र्याभिनिगद्य दद्याद्दाता वाच्यमानः । २८ । एतं भागमेतं सधस्था उलूखल इति[3] संस्थितहोमाः । २९ । आवपते । ३० । अनुमन्त्रणं च[4] । ३१ । ॥ ४ ॥ ॥ ६३ ॥

आशानामिति[5] चतुःशरावम् । १ । यद्राजान[6] इत्यवेक्षति[7] । २ । पदस्नातस्य पृथक्पादेष्वपूपान्निदधाति[8] । ३ । नाभ्यां पञ्चमम् । ४ । उन्नह्यन्वसनेन[9] सहिरण्यं[10] संपातवन्तम् । ५ । आ[11] नयैतमित्यपराजितादजमानीयमानमनुमन्त्रयते । ६ । इन्द्राय[12] भागमित्यग्निं परिणीयमानम् । ७ । ये नो द्विषन्तीति[13] संज्ञप्यमानम् । ८ । प्र पद इति[14] पदः प्रक्षालयन्तम् । ९ । अनु छ्य श्यामेनेति[15] यथापरु[16] विशसन्तम्[17] । १० । ऋचा[18] कुम्भीमित्यधिश्रयन्तम् । ११ । आ[19] सिञ्चेत्यासिञ्चन्तम् । १२ । अव[20] धेहीत्यवदधतम् । १३ । पर्याधत्तेति[21] पर्यादधतम् । १४ । शृतो[22] गछत्वित्युद्वासयन्तम् । १५ । उत्क्रामात इति[23]

---

[1] K Bh °दच्चिणान्वा. — [2] Ch Bü °वन्तो. — [3] vi. 122. 1; 123. 1; x. 9. 26. — [4] Ch वा. — [5] i. 31. 1. — [6] iii. 29. 1. — [7] Bü Bi इत्यवेः चति; E इत्यविमीचते; cf. iii. 29. 1 fg., and the Anukramaṇī to the hymn (अविदेवत्यम् . . . उद्दालको ऽनेन . . . शितिपादमविमस्तौत्). — [8] P Bh पृथक्पादेष्य°. — [9] Bü पंचमनुनह्यं; K पचमुन्नुन्नह्यं; the rest पंचममुन्नह्यं. — [10] P सहिरण्यसने or °सेने. — [11] ix. 5. 1. — [12] ix. 5. 2. — [13] ix. 5. 2^{c}. — [14] ix. 5. 3. — [15] ix. 5. 4. — [16] Ch (prim. man.) °परु. — [17] Ch E °शंसन्तं. — [18] ix. 5. 5. — [19] ix. 5. 5^{b}. — [20] Part of ix. 5. 5.^{b}. — [21] Ch पर्याधत्त इति; ix. 5. 5^{c}. — [22] ix. 5. 5^{d}. — [23] ix. 5. 6. —

पश्चादग्नेर्दर्भेषूद्धरन्तम् । १६ । उद्धृतमजमनज्मीत्याज्येनानक्ति[1] । १७ । पञ्चौदनमिति[2] मन्त्रोक्तम् । १८ । ओदनान्पृथक्पादेषु निदधाति । १९ । मध्ये पञ्चमम् । २० । दक्षिणं पश्चार्धं यूषेनोपसिच्य[3,4] । २१ । शृतमजमित्यनुबद्धशिरःपादं[5,6] त्वेतस्य चर्म । २२ । अजो हीति[7] सूक्तेन संपातवन्तं यथोक्तम् । २३ । उत्तरो[8] ऽमोतं तस्याग्रतः सहिरण्यं निदधाति । २४ । पञ्च रुक्मेति[9] मन्त्रोक्तम् । २५ । धेन्वादीन्युत्तरतः[10] सोपधानमास्तरणं वासो हिरण्यं च । २६ । आ नयैतमिति[11] सूक्तेन संपातवन्तम् । २७ । आञ्जनान्तं[12] शतौदनायाः पञ्चौदनेन व्याख्यातम् । २८ । ॥ ५ ॥ ६४ ॥

अघायतामित्यृच[13] मुखमपिनह्यमानमनुमन्त्रयते । १ । सपत्नेषु वज्रं ग्रावा त्वेष इति[14] निपतन्तम् । २ । वेदिष्ट इति[15] मन्त्रोक्तमास्तृणाति । ३ । विंशत्योदनासु श्रयणीषु[16] शतमवदानानि वध्रीसंनद्धानि[17] पृथगोदनेषूपर्यादधाति[18] । ४ । मध्यमायाः प्रथमे रन्ध्रिण्यामिक्षां[19] दशमे ऽभितः[20]

---

[1] K °मनध्मी°; iv. 14. 6. — [2] iv. 14. 7. — [3] K Ch यूपेणो°; Bh पूपेनो°. — [4] Bi has a colon here. — [5] iv. 14. 9. — [6] K Bü Bh °शिरस्पादं; cf. Kāuç. 24. 10; 81. 28. — [7] iv. 14. 1 (ix. 5. 13). — [8] K inserts उक्तम् between this and the preceding word Is it a gloss? Cf. Kāuç. 62. 23. — [9] ix. 5. 25 (26). — [10] Cf. Kāuç. 62. 19. — [11] ix. 5. 1. — [12] Bü (sec. man.) आंजनानांतं; the performances ending with sū. 17. — [13] x. 9. 1. — [14] x. 9. 1^b, 2^d. — [15] x. 9. 2. — [16] So K Bi Bh (sec. man.); Ch श्रपणीषु; Bü (prim. man.) श्यिणीषु; E P Bh श्रेणीषु. — [17] So emended; Bü Bh वद्ध्री°; the rest वध्रि°. — [18] K पृथगोदने पर्या°. — [19] P °ण्यमिचां; Bi °ण्यमिच्यां; E °ण्याभिषां. — [20] K दशभितः. —

सप्तसप्तापूपान्परिश्रयति । ५ । पञ्चदशे[1] पुरोडाशौ । ६ । अग्रे हिरण्यम् । ७ । अपो देवीरित्यग्रत[2] उदकुम्भान् । ८ । बालास्त इति[3] सूक्तेन संपातवतीम् । ९ । प्रदक्षिणमग्निमनुपरिणीयोपवेशनप्रक्षालनाचमनमुक्तम्[4] । १० । पाणावुदकमानीय । ११ । अथामुष्यौदनस्यावदानानां[5] च मध्यात्पूर्वार्धाच्च द्विरवदायोपरिष्टादुदकेनाभिघार्य जुहोति सोमेन पूतो जठरे सीद ब्रह्मणामार्षेयेषु नि दध[6] ओदन त्वेति[7] । १२ । अथ प्राश्नाति । १३ । अग्नेष्ट्वास्येन प्राश्नामि बृहस्पतेर्मुखेन । इन्द्रस्य त्वा जठरे सादयामि वरुणस्योदरे[8] । तद्यथा हुतमिष्टं प्राश्नीयाद्देवात्मा त्वा[9] प्राश्नाम्यात्मास्यात्मन्नात्मानं मे मा हिंसीरिति प्राशितमनुमन्त्रयते । १४ ।

यो ऽग्निर्नृमणा[10] नाम ब्राह्मणेषु प्रविष्टः ।
तस्मिन्म एष[11] सुहुतो ऽस्त्वोदनः स मा मा हिंसीत्परमे व्योमन्[12] ॥

सो अस्मभ्यमस्तु परमे[13] व्योमन्निति दातारं वाचयति । १५ । वीक्षणान्तं शतौदनायाः प्रातर्जपेन व्याख्यातम् । १६ । ॥ ६ ॥ ॥ ६५ ॥

---

[1] Bü °दश; Ch (prim. man.) °दशेषु. — [2] x. 9. 27 (i. 4. 3). — [3] x. 9. 3. — [4] Bü Bh °चमनयुक्तम्. — [5] MSS. °मुष्योदनस्या°. — [6] Ch दधत. — [7] xi. 1. 25c, 33a. — [8] Cf. up to this point VS. (Kāṇva-çākhā) ii. 3. 5, 7 (p. 58 of Weber's edition); Kāty. Çr. ii. 2. 20. — [9] Thus emended; P Bh Bü देवात्मा (without त्वा); K Ch E Bi देवा त्वा. — [10] K नृम्णा. — [11] Ch एतत्सु°; Bü एत. — [12] The colon here only in Bü. — [13] The passage from परमे in the preceding line up to this word is omitted in K. —

वाङ्म आसन्निति[1] मन्त्रोक्तान्यभिमन्त्रयते[2] । १ । बृहता मनो द्यौश्च मे पुनर्मैत्विन्द्रियमिति[3] प्रतिमन्त्रयते[4] । २ । प्रतिमन्त्रिते व्यवदायाश्नन्ति । ३ । शतौदनायां द्वादशं शतं दक्षिणाः[5] । ४ । अधिकं ददतः[6] काममप्रं[7] संपद्यते । ५ । ब्रह्मास्येत्योदने[8] हृदान्प्रतिदिशं[9] करोति । ६ । उपर्यापानम्[10] । ७ । तदभितश्चतस्रो[11] दिश्याः कुल्याः । ८ । ता रसैः[12] पूरयति । ९ । पृथिव्यां[13] सुरयाङ्गिराण्डीकादिवन्ति[14, 15] मन्त्रोक्तानि प्रतिदिशं निधाय । १० । यमोदनमित्यातिमृत्युम्[16, 17] । ११ । अनड्वानित्यनड्वाहम्[18] । १२ । सूर्यस्य रश्मीनिति[19] कर्की[20] सानूबन्ध्यां[21] ददाति । १३ । आयं गौः पृश्निरयं सहस्रमिति[22] पृश्निं[23] गाम् । १४ । देवा इमं

---

[1] MSS. आस्यन्निति (as in the Atharvan-MSS.); xix. 60. 1. — [2] K मंत्रोत्तयभिमंत्रयते; Bü E Bi °भिमृशते. — [3] v. 10. 8; vi. 53. 1 (et al.); vii. 67. 1. — [4] For this and the next sūtra cf. Kāuç. 68. 33, 34. — [5] So, दक्षिणा (अधिकं), all MSS. except Ch (sec. man.): दक्षिणाधिकं. — [6] E ददत्तः. — [7] K E कामः प्र; P Bi Bh कामप्रः; cf. x. 9. 4. — [8] iv. 34. 1. — [9] K E P हृदान्. — [10] Cf. Kāuç. 62. 14. — [11] Ch E तदभृतश्च°; K तदभितश्च तिस्रो. — [12] P कुल्यासारसौ. — [13] E Ch (sec. man.) पृथिव्या. — [14] K Ch E P Bi सुराया°. — [15] °राण्डीकादिवन्ति is a doubtful conjecture; K Bü (prim. man.) °रांडीकादिवत्य; Bü (sec. man.) °हांडी° (!); Ch (sec. man.) °रांडीकांदिवत्य; Ch (prim. man.) °रांडैकांदिवत्य; E °रांडिकांदिवत्य; P °रंडिकादिवन्य; Bh °रंडीकादिवत्य; Bi रांडिकादिवत्य; or is an emendation to °वत्यां (sc. पृथिव्यां) to be preferred? Cf. iv. 34. 5. — [16] iv. 35. 1. — [17] P Bh °त्यातिमृत्युम्. — [18] iv. 11. 1. — [19] iv. 38. 5. — [20] E P कर्कां; Bi कक्की; Ch कक्कीं; Bü ककीं. — [21] So K Bh; P Bi सानूवन्ध्यां; Bü सानुवध्यां; Ch E and Pet. Lex. sub कर्क read सानी वन्ध्यां; cf. also Kāuç. 21. 11. — [22] vi. 31. 1; vii. 22. 1. — [23] E Bh Ch (sec. man.) पृश्नि°. —

मधुना संयुतं यवमिति[1] पौनःशिलं[2] मधुमन्थं सहिरण्यं संपातवन्तम् । १५ । पुनन्तु मा देवजना इति[3] पवित्रं कृशरम्[4] । १६ । कः[5] पृश्निमित्युर्वराम् । १७ । साहस्र[6] इत्यृषभम् । १८ । प्रजापतिश्चेत्यनड्वाहम्[7] । १९ । नमस्ते जायमानायै ददामीति[8] वशामुदपात्रेण संपातवता संप्रोक्ष्याभिमन्त्र्याभिनिगद्य दद्याद्दाता वाच्यमानः । २० । भूमिष्ट्वेत्येनां[9] प्रतिगृह्णाति।२१। उपमितामिति[10] यच्छालया सह दास्यन्भवति तदन्तर्भवत्यपिहितम् । २२ । मन्त्रोक्तं तु[11] प्रशस्तम् । २३ । इटस्य ते वि चृतामीति[12] द्वारमवसारयति । २४ । प्रतीचीं त्वा प्रतीचीन[13] इत्युदपात्रमग्निमादाय प्रपद्यन्ते । २५ । तदन्तरेव सूक्तेन संपातवत्करोति । २६ । उदपात्रेण संपातवता शालां संप्रोक्ष्याभिमन्त्र्याभिनिगद्य दद्याद्दाता वाच्यमानः । २७ । अन्तरा द्यां च पृथिवीं चेत्येनां[14] प्रतिगृह्णाति।२८। उपमितामिति[15] मन्त्रोक्तानि प्रचृतति।२९। मा नः पाशमित्यभिमन्त्र्य[16] धारयति।३०। नास्यास्थीनीति[17] यथोक्तम् । ३१ । सर्वमेनं समादायेत्यद्भिः[18] पूर्णे गर्ते प्रविध्य[19] संवपति।३२। शतौदनां[20] च । ३३ । ॥ ७ ॥ ॥ ६६ ॥

---

[1] vi 30. 1. — [2] K Bi पौन°. — [3] vi. 19. 1. — [4] K Bh Ch (sec. man.) कृसरं; cf. Kāuç. 84. 3. — [5] vii. 104. 1. — [6] ix. 4. 1. — [7] ix. 7. 1. — [8] x. 10. 1; xii. 4. 1. — [9] iii. 29. 8 (v. 28. 5). — [10] ix. 3. 1. — [11] This word is wanting in Ch. — [12] ix. 3. 18. — [13] ix. 3. 22. — [14] ix. 3. 15. — [15] ix. 3. 1. — [16] ix. 3. 24. — [17] ix. 5. 23. — [18] ix. 5. 23^c. — [19] Ch (prim. man.) प्रवृद्ध. — [20] Ch (prim. man.) शतौदानां; E शतौददनीं. —

संभृतेषु साविकेषु संभारेषु ब्राह्मणमृत्विजं वृणीत । १ । ऋषिमार्षेयं सुधातुदक्षिणमनैमित्तिकम् । २ । एष ह वा ऋषिरार्षेयः सुधातुदक्षिणो यस्य त्र्यवराध्यीः[1] पूर्वपुरुषा विद्याचरणवृत्तशीलसंपन्नाः । ३ । उदगयन इत्येके । ४ । अथात ओदनसवानामुपाचारकल्पं[2] व्याख्यास्यामः । ५ । सवान्दत्त्वाग्नीनादधीत[3] । ६ । सार्ववैदिक[4] इत्येके[5] । ७ । सर्वे वेदा द्विकल्पाः[6] । ८ । मासपराध्यी[7] दीक्षा द्वादशरात्रो[8] वा । ९ । त्रिरात्र इत्येके । १० । हविष्यभक्षा[9] स्युर्ब्रह्मचारिणः । ११ । अधः शयीरन् । १२ । कर्तृदातारावा समापनात्कामं[10] न भुञ्जीरन्संततावश्वेत्स्युः[11] । १३ । अहनि समाप्तमित्येके[12] । १४ । याचार्थं दातारौ वा दाता केशश्मश्रुरोमनखानि[13] वापयीत । १५ । केशवर्जं पत्नी । १६ । स्नातावहतवसनौ सुरभिणौ व्रतवन्तौ कर्मण्यावुपवसतः[14] । १७ । श्वो भूते यज्ञोपवीती शान्त्युदकं कृत्वा यज्ञवास्तु च[15] संप्रोक्ष्य ब्रह्मौदनिकमग्निं मथित्वा । १८ । यद्देवा

---

[1] Ch त्रिवराध्यीः; K त्र्यराध्यीः. — [2] For the variant °पचार° see Kāuç. 140. 1. — [3] D (schol.) in the introduction fol. 7[a] l. 4, अथ सवान्दत्वाग्नीनादधीतेति तस्यां चोदनायामग्नेः संस्कारफलं तदंगत्वात् । ब्रह्मौदनवत् । अनंगभूतानां स्वर्गः । अन्ये मात्रवर्णिकं फलमिच्छंति पुष्टिग्रहणात् — [4] Bi °वैदिकं; Bū (sec. man.) सावर्वैदिक. — [5] Ch brackets the passage beginning with sū. 5 and ending here. — [6] Ch सर्ववेदद्वि°. — [7] Bh माससप°. — [8] Thus emended (cf. Pāṇini ii. 4. 29); P Bh °रात्रि, the rest °रात्रौ. — [9] E °भक्ष्या. — [10] E Ch (prim. man.) समापना. — [11] P सतता°. — [12] K Bh Bū (prim. man.) समाप्त इत्येके. — [13] E °लोम°. — [14] Thus emended; K Ch E °वसथ (श्वो); Bū °वसनः; the rest °वसथः. Cf. Kāuç. 140. 4. — [15] Wanting in K P Bi. —

देवहेडनं यद्विद्वांसो यदविद्वांसो ऽपामित्यमप्रतीत्तमित्येतै-
स्त्रिभिः[1] सूक्तैरन्वारब्धे दातरि पूर्णहोमं जुहुयात् । १९ ।
पूर्वाह्णे बाह्यतः शान्तवृक्षस्येध्मं प्राञ्चमुपसमाधाय[2,3]
। २० । परिसमुह्य पर्युक्ष्य परिस्तीर्य बर्हिरुदपात्रमुपसाद्य
परिचरणेनाज्यं परिचर्य । २१ । नित्यान्पुरस्ताद्धोमान्हु-
त्वाज्यभागौ च । २२ । पश्चादग्नेः पल्पूलितविहितमौक्षं
वानडुहं वा रोहितं चर्म[4] प्राग्ग्रीवमुत्तरलोम[5] परिस्तीर्य
।२३। पवित्रे कुरुते ।२४। दर्भावप्रच्छिन्नप्रान्तौ प्रक्षाल्यानु-
लोममनुमार्ष्टि।२५। दक्षिणं जान्वाच्यापराजिताभिमुखः
प्रह्वो वा मुष्टिना प्रसृतिनाञ्जलिना यस्यां श्रपयिष्य-
न्स्यात्तया[6,7] चतुर्थम्[8] । २६ । शरावेण चतुःशरावं देवस्य
त्वा सवितुः प्रसव ऋषिभ्यस्त्वार्षेयेभ्यस्त्वैकर्षये त्वा जुष्टं
निर्वपामि । २७ । ॥ ८ ॥ ॥ ६७ ॥

वसवस्त्वा गायत्रेण छन्दसा निर्वपन्तु । ऊर्जमक्षित-
मक्षीयमाणमुपजीव्यासमिति दातारं वाचयति । १ ।
रुद्रास्त्वा त्रैष्टुभेन छन्दसा । आदित्यास्त्वा जागतेन छन्द-
सा । विश्वे त्वा देवा आनुष्टुभेन छन्दसा निर्वपन्तु । ऊ-
र्जमक्षितमक्षीयमाणमुपजीव्यासमिति[9] दातारं वाचयति
।२। निरुप्तं सूक्तेनाभिमृशति।३। स्वर्गब्रह्मौदनौ तन्त्रम्।४।

---

[1] vi. 114. 1; 115. 1; 117. 1. — [2] Ch E Bü insert इध्मं after प्राञ्चम्; cf. Kāuç. 53. 3. — [3] E has a colon here. — [4] Bi has a colon here. — [5] K Bh प्राग्रीव°. — [6] Thus emended; MSS. श्रपयिष्यं. — [7] K Bü स्योत्तमया; Bb स्यात्तमया; Ch स्योत्तया. — [8] Cf. Kāuç. 61. 11. — [9] Cf. Māitr. S. iii. 12. 19; VS. xxiii. 8, also VS. i. 27; v. 2. —

संनिपाते[1] ब्रह्मौदनमितमुदकमासेचयेद्विभागम्[2, 3, 4] । ५ । यावन्तस्तण्डुलाः[5] स्युर्नावसिञ्चेन्न प्रतिषिञ्चेत् । ६ । यद्यवसिञ्चेन्मयि वर्चो अथो यश इति[6] ब्रह्मा यजमानं वाचयति । ७ । अथ प्रतिषिञ्चेत् । ८ । आ प्यायस्व सं ते पयांसीति द्वाभ्यां[7] प्रतिषिञ्चेत् । ९ ।

आ प्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम् ।
भवा वाजस्य संगथे ॥
सं ते पयांसि समु यन्तु वाजाः सं वृष्ण्यान्यभिमातिषाहः ।
आप्यायमानो अमृताय सोम दिवि श्रवांस्युत्तमानि धिष्वेति । १० ।

तत्र चेदुपाधिमात्रायां नखेन न[8] लवणस्य कुर्यात्तेनैवास्य तद्वृथान्नं संपद्यते । ११ । अहतं वासो दक्षिणत उपशेते । १२ । तत्सहिरण्यम् । १३ । तत्र द्वे उदपात्रे निहिते भवतः । १४ । दक्षिणमन्यदन्तरमन्यत्[9] । १५ । अन्तरं यतोऽधिचरिष्यन्भवति । १६ । बाह्यं जाङ्गायनम्[10] । १७ । तत उदकमादाय पात्र्यामानयति[11] । १८ । दर्व्या[12] कुम्भ्याम्[13] । १९ ।

---

[1] Ch संपाते. — [2] Bü ब्रह्मौदनौ°; E Ch ब्रह्मौदनो°. — [3] Ch °मित उदक°. — [4] P Bi °मासिञ्चयेद्वि°. — [5] So Bü E; the rest तण्डुला. — [6] vi. 69. 3. — [7] RV. i. 91. 16, 18; TS. iii. 2. 5. 3; iv. 2. 7. 4; TB. iii. 5. 12. 1; 7. 13. 4; TĀr. vi. 6. 3; VS. xii. 112, 113; Māitr. S. ii. 7. 14; Kāṭh. S. xvi. 14; Kap. S. xxv. 5; Tāṇḍya Br. i. 5. 8. — [8] Ch E and Pet. Lex. sub उपाधि omit न; Bh त. — [9] Bi °दुत्तरमन्यत्. Is this to be taken into the text? cf. the next sūtra. — [10] K जागमायनम्; cf. Kāuç. 3. 1. — [11] For this and the following four sūtras cf. Kāuç. 62. 2-7. — [12] Thus emended; MSS. दर्व्यां; cf. Kāuç. 62. 3. — [13] K कुम्भ्यां, as in Kāuç. 62. 3. —

दर्विकृते तत्रैव प्रत्यानयति । २० । दर्व्योत्तममपादाय तत्सुहृद्दक्षिणतो ऽग्नेरुदङ्मुख आसीनो धारयति । २१ । अथोद्धरति । २२ । उद्धृते यदपादाय धारयति तदुत्तरार्ध आधाय रसैरुपसिच्य प्रतिग्रहीत्रे[1] दातोपवहति । २३ । तस्मिन्नन्वारब्धं दातारं वाचयति[2]।२४। तन्त्वं सूक्तं पच्छः[3] स्नानेन[4] यौ ते पक्षौ यदतिष्ठः । २५ ।

यौ ते पक्षावजरौ पतत्रिणौ याभ्यां रक्षांस्यपहं-
स्योदन[5] ।

ताभ्यां पथ्यास्म[6] सुकृतस्य लोकं यत्र ऋषयः प्रथ-
मजाः पुराणाः[7] ॥

यदतिष्ठो दिवस्पृष्ठे व्योमन्नध्योदन[8] ।

अन्वायन्सत्यधर्माणो[9, 10] ब्राह्मणा राधसा सह।२६।

क्रमध्वमग्निना नाकं पृष्ठात्पृथिव्या अहमन्तरिक्षमारुहं स्वर्यन्तो नापेक्षन्त उरुः प्रथस्व महता महिम्नेदं मे ज्योतिः सत्याय चेति तिस्रः समग्रय इति[11] सार्धमेतया । २७ । अत ऊर्ध्वं वाचिते हुते संस्थिते ऽमूं[12] ते ददामी-

---

[1] So emended; MSS. प्रतिगृहीत्वे दातो°; cf. Pet. Lex. sub प्रतिगृहीतृ and प्रतिग्रहीतृ. — [2] E has a colon here. — [3] Bü K E Ch Bi पच्छ. — [4] Bi has a colon here. — [5] So emended; MSS. °स्योदनः. — [6] K P Bi Bh पथ्यास्मत्सु°; VS. and TS. पतेम. — [7] Cf. VS. xviii. 52; TS. iv. 7. 13. 1. — [8] K P Bh °ध्यौदनः. — [9] K P Bh Bü अन्वायंत्स°. — [10] Ch E °धर्माणौ. — [11] iv. 14. 2, 3, 4; xi. 1. 19, 28; xii. 3. 46–48, 50. — [12] E मुं; Ch (sec. man.) मू. —

ति नामग्राहमुपस्पृशेत् । २८ । सदक्षिणं कामस्तदित्यु-
क्तम्[1] । २९ । ये भक्षयन्त[2] इति पुरस्ताद्धोमाः । ३० ।

अग्ने त्वं नो अन्तम उत त्राता शिवो भवा वरूथ्यः[3] ।
तं त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे सखिभ्यः[4] ॥
गयस्फानो अमीवहा वसुवित्पुष्टिवर्धनः ।
सुमित्रः सुमनो भवे-[5]

त्याज्यभागौ । ३१ । पाणावुदकमानीयेत्युक्तम् । ३२ । प्र-
तिमन्त्रणान्तम्[6] । ३३ । प्रतिमन्त्रिते[7] व्यवदायाश्नन्ति
। ३४ । इदावत्सरायेति व्रतविसर्जनमाज्यं जुहुयात्[8] । ३५ ।
समिधो ऽभ्यादध्यात् । ३६ । तत्र श्लोकौ ।

यजुषा मथिते अग्नौ यजुषोपसमाहिते ।
सवान्दत्त्वा[9] सवाग्नेस्तु कथमुत्सर्जनं भवेत् ॥
वाचयित्वा सवान्सर्वान्प्रतिगृह्य[10] यथाविधि ।
हुत्वा संनतिभिस्तत्रोत्सर्गं[11] कौशिको ऽब्रवीत् । ३७ ।

प्राञ्चो[12] ऽपराजितां[13] वा दिशमवभृथाय व्रजन्ति
। ३८ । अपां सूक्तैराप्लुत्य[14] प्रदक्षिणमावृत्याप उप-

---

[1] xix. 52. 1. — [2] ii. 35. 1. — [3] RV. v. 24. 1[ab]; SV. i. 448; ii. 457; VS. iii. 25[a]; xv. 48[a]; xxv. 47[a]; TS. i. 5. 6. 2; iv. 4. 4. 8; Māitr. S. i. 5. 3, 10; ii. 13. 8; Kāṭh. S. vii. 1, 8; Kap. S. v. 1. — [4] RV. v. 24. 2[cd]; VS. iii. 26[a]; xv. 48[c]; xxv. 47[c]; TS. Māitr. S. ibid. — [5] RV. i. 91. 12; Māitr. S. iv. 10. 4; 12. 4; Kāṭh. ii. 14; TS. iv. 3. 13. 5, all with the variant सोम नो for सुमनो. — [6] Cf. Kāuç. 66. 2, 3 for this and the following sūtra. — [7] E प्रतिमन्त्रयते. — [8] For this and the following sūtra cf. Kāuç. 42. 15, 16. — [9] K Bü Bh Ch (sec. man.) सवां दत्वा. — [10] K Bh सवांत्स°. — [11] K Bh Ch (prim. et tert. man.) insert हि after this word. — [12] Bi प्राचो. — [13] Bi पराजिता. — [14] For the अपां सूक्तानि see Dārila to Kāuç. 7. 14. —

स्पृश्यानवेक्षमाणाः[1] प्रत्युदाव्रजन्ति । ३९ । ब्राह्मणान्भक्तेनोपेप्सन्ति । ४० । यथोक्ता दक्षिणा यथोक्ता दक्षिणा । ४१ । ॥ ९ ॥ ॥ ६८ ॥

॥ इत्यथर्ववेदे कौशिकसूत्रे ऽष्टमो ऽध्यायः समाप्तः ॥

---

[1] Ch ॰पेच्चमाणाः; K ॰वेच्यमाणाः; cf. Kāuç. 7. 14; 140. 18. —

॥ ओं ॥

पित्र्यमग्निं शमयिष्यञ्ज्येष्ठस्य[1] चाविभक्तिन[2] एकाग्निमाधास्यन्[3]।१। अमावास्यायां पूर्वस्मिन्नुपशाले गां द्विहायनीं रोहिणीमेकरूपां बन्धयति[4]।२। निशि शामूलपरिहितो[5] ज्येष्ठो ऽन्वालभते।३। पत्न्यहतवसना ज्येष्ठम्।४। पत्नीमन्वञ्च इतरे[6]।५। अथैनानभिव्याहारयत्यध्रिगो शमीध्वम्। सुशमि शमीध्वम्। शमीध्वमध्रिगा३उ इति[7.8] चिः[9]।६। अयमग्निः सत्पतिर्नेडमा रोहेत्यनुवाकं[10] महाशान्तिं च शान्त्युदक आवपते[11]।७। अग्ने अक्रव्यादिति[12] भ्रष्ट्राद्दीपं[13] धारयति।८। भूमेश्चोप-

---

[1] Thus emended; MSS. शमयिष्यं; Bi has a colon here. — [2] P Bh वा°. — [3] Dārila, fol. 5[a] l. 6, पित्र्यमग्निं शमयिष्यन्निति क्रव्याच्छमनं. — [4] E P बधयति. — [5] Thus emended; MSS. सामूल°. — [6] So Bi; Ch E K Bü अन्वंचेतरे; P Bh °न्वचैतरे; cf. the introduction. — [7] K Bi °ध्रिगा ओ इति; Bü P °ध्रिगा ओ (or उ) इति; Bh °ध्रिगा उ इति; Ch °ध्रिगा३ओं इति; Nirukta 5. 11 °ध्रिगर्वति; Āit. Br. and Āçv. Çr. as above. — [8] Bi has a colon here. — [9] The formula occurs: Tāit. Br. iii. 6. 6. 4; Āit. Br. ii. 7; Āçv. Çr. ii. 3. 1; Nirukta 5. 11 (commentary p. 62; introduction p. xxxviii); cf. VS. i. 15; TS. i. 1. 5. 2; Māitr. S. i. 1. 6. — [10] vii. 62. 1; xii. 2. 1 (the अनुवाक beginning with this pratika). — [11] Cf. Kāuç. 39. 7; 43. 5; 46. 7. — [12] xii. 2. 42. — [13] K भ्रष्टादी°; E भ्राष्ट्रादी°; cf. Kāuç. 47. 28; 49. 21. —

दग्धं समुत्खाय । ९ । आकृतिलोष्टवल्मीकेनास्तीर्य । १० । शकृत्पिण्डेनाभिलिप्य । ११ । सिकताभिः प्रकीर्याभ्युक्ष्य । १२ । लक्षणं कृत्वा । १३ । पुनरभ्युक्ष्य । १४ । पश्चाल्लक्षणस्याभिमन्थनं निधाय । १५ । गोऽश्वाजावीनां पुंसां लोमभिरास्तीर्य व्रीहियवैश्च शकृत्पिण्डमभिविमृज्य प्राञ्चौ दर्भौ निदधाति । १६ । वृषणौ स्थ[1] इत्यभिप्राण्यारण्यौ[2] । १७ । तयोरुपर्यधरारणिम् । १८ । दक्षिणतो मूलान् । १९ । पश्चात्प्रजननामुर्वश्यसीत्यायुरसीति[3] । २० । मूलत उत्तरारणिमुपसंधाय[4] । २१ । पृतनाजितमित्याहूय[5] । २२ । अभिदक्षिणं ज्येष्ठस्त्रिरभिमन्थत्योँ भूर्गायत्रं छन्दोऽनुप्रजायस्व त्रैष्टुभं जागतमानुष्टुभमोँ भूर्भुवः स्वर्जनदोमिति[6, 7] । २३ । अत ऊर्ध्वं यथाकामम् । २४ । ॥ १ ॥ ॥ ६९ ॥

मन्थामि त्वा जातवेदः सुजातं जातवेदसम् ।
स नो जीवेष्वा भज[8] दीर्घमायुश्च धेहि[9] नः ॥
जातो ऽजनिष्ठा[10] यशसा सहाग्ने[11] प्रजां पशूंस्तेजो रयिमस्मासु धेहि[12] ।

---

[1] VS. v. 2b; TS. i. 3. 7. 1; Kāty. Çr. v. 1. 29; Çat. Br. iii. 4. 1. 21. — [2] So E Bi; K °प्राण्यारराण्ये; Ch P Bü Bh °प्रारण्यारण्यौ. — [3] VS. v. 2cd; TS. i. 3. 7. 1; Kāty. Çr. v. 1. 30; Çat. Br. iii. 4. 1. 22. — [4] Ch E have a colon here; K has a double colon in the middle of the word after उत्तरा°. — [5] vii. 63. 1. — [6] K Bh °दोऽ३मिति. — [7] Cf. VS. v. 2f, etc.; TS. i. 3. 7. 1; Kāṭh. iii. 4; Lāty. iii. 5. 5; Kāty. Çr. v. 1. 28; Çat. Br. iii. 4. 1. 23. — [8] K Ch भजद्दो°. — [9] E देहि. — [10] So K Bi Ch (sec. man.); E Ch (prim. man.) जनिष्वा; P Bh जनिष्टा; Bü जनिष्या. — [11] K Bü Ch P °ग्नेः. — [12] Cf. Çāṅkh. Çr. ii. 17. 8. —

आनन्दिनो मोदमानाः सुवीरा[1] अनामयाः सर्वमायुर्गमेम ॥

उद्दीप्यस्व जातवेदो ऽप सेदिं[2] तृष्णां[3] क्षुधं जहि ।
अपास्मत्तम उछत्वप ह्रीतमुखो[4] जह्यप दुर्हार्द्दिशो[5] [जहि ॥
इहैवैधि धनसनिरिह त्वा समिधीमहि ।
इहैधि पुष्टिवर्धन इह त्वा समिधीमहीति । १ ।

प्रथमया मन्थति । २ । द्वितीयया जातमनुमन्त्रयते । ३ । तृतीययोद्दीपयति । ४ । चतुर्थ्योपसमादधाति । ५ । यत्त्वा क्रुद्धा[6] इति चों[7] भूर्भुवः स्वर्जनदोमित्यङ्गिरसां त्वा देवानामादित्यानां व्रतेना दधे[8] । द्यौर्मह्नासि[9] भूमिर्भूम्ना[10] तस्यास्ते देव्यदितिरुपस्थे[11] ऽन्नादायान्नपत्याया[12] दधदिति[13] । ६ । लक्षणे प्रतिष्ठाप्योपोत्थाय । ७ । अथोपतिष्ठते । ८ । अग्ने गृहपते सुगृहपतिरहं त्वयाग्ने गृहपतिना भूयासम् । सुगृहपतिस्त्वं मयाग्ने गृहपतिना भूयाः । अस्थूरि णौ गा-

---

[1] K Ch (prim. man.) °वीराः. — [2] K P Bb शेदं; B शेदि. — [3] K B धिष्णान्; P धिष्णां; the omission of the word perfects the metre. — [4] E ह्रीत°. — [5] So with doubtful emendation; Ch E दुर्हार्दिशो; Bü दुहर्दिशो; E दुहाद्दिश्शो; P Bh दुर्हाद्दशो; K दुर्हार्दशो. — [6] xii. 2. 5; cf. TS. i. 5. 3. 1; Māitr. S. i. 7. 1. — [7] So all MSS. — [8] K Bü Bi ददे; Bi only has the colon. — [9] So emended; K Bü Ch मन्नासि; E P Bi Bh भूम्नासि; Māitr. S. i. 6. 1 (end), as above. — [10] So emended according to Māitr. S. (ibid.) and TS. i. 5. 3. 1; MSS. भूमेर्भू°. — [11] So Ch P Bh; K °दितेरुप°; E Bi °दितरुप°; Bü °दित उप° (so also Māitr. S. ibid.). — [12] So E and Māitr. S.; K Bü Ch Bi न्नापत्वा; P न्नपतयत्वा; Bh न्नपतयत्या. — [13] Cf. VS. iii. 5; TS. 1. 5. 3. 1; Māitr. S. i. 6. 1 (end), 2. —

र्हपत्यानि दीदिहि शतं समा इति[1] । ९ । व्याकरोमीति[2] गार्हपत्यक्रव्यादौ समीक्षते । १० । शान्तमाज्यं गार्हपत्यायोपनिदधाति । ११ । माषमन्थं[3] क्रव्यादम् । १२ । उप त्वा नमसेति[4] पुरोऽनुवाक्या । १३ । विश्वाहा त[5] इति पूर्णाहुतिं जुहोति । १४ । यो नो अग्निरिति[6] सह कर्त्रा[7] हृदयान्यभिमृशन्ते । १५ । ॥ २ ॥ ॥ ७० ॥

अंशो राजा विभजतीमावग्नी[8,9] विधारयन्[10] ।
क्रव्यादं निर्णुदामसि[11] हव्यवाडिह तिष्ठत्विति

विभागं जपति । १ । सुगार्हपत्य इति[12] दक्षिणेन गार्हपत्ये[13] समिधमादधाति । २ । यः क्रव्यात्तमशीशममिति[14] सव्येन नडमयीं क्रव्यादि[15] । ३ । अपावृत्येति[16] मन्त्रोक्तं बाह्यतो निधाय । ४ । नडमा रोह समिन्धत इषीकां जरतीं[17] प्रत्यञ्चमर्केमित्युपसमादधाति[18] । ५ । यद्यग्निर्यो अग्निरविः कृष्णा[19]

मा[20] नो रुरोः[21] शुचद्विदः[22] शिवो[23] नो अस्तु भरतो
ररणः ।

---

[1] Cf. RV. vi. 15. 19; VS. ii. 27 (and Kāṇva-çākhā, p. 59 of Weber's edition); TS. 1. 5. 6. 4; Māitr. S. i. 4. 2 (end); i. 15. 14 (end); Çāñkh. Çr. iv. 12. 14; Çat. Br. i. 9. 3. 19. — [2] xii. 2. 32. — [3] K P Ch (prim. man.) माख॰. — [4] iii. 15. 7. — [5] Bü न; Bi ॰हांत; iii. 15. 8. — [6] xii. 2. 33. — [7] Ch कर्ता; Bü कर्त्ता. — [8] So emended; MSS. ॰तीमाम॰. — [9] Bi ॰ग्नि. — [10] E Ch (prim. man.) ॰धरयत. — [11] K P have a colon here. — [12] xii. 2. 45[c]. — [13] K P Bh Ch prim. man.) गाहपत्यं. — [14] Bh ॰सीसमम्; cf. iii. 21. 9. — [15] These words are wanting in Ch E. — [16] xii. 2. 34. — [17] P Bi जरंतीं; E जरंति. — [18] xii. 2. 1, 11, 54, 55. — [19] xii. 2. 4, 7, 53. — [20] E यां. — [21] So with doubtful emendation; E रुरोह; Ch रुटो; Bi रूरो; the rest रुरो; the word is then to be regarded as an augmentless subjunctive from the reduplicated root रु. — [22] K P have a colon here. — [23] E शिवा. —

अतिव्याधी व्याधो[1] अग्रभीष्ट[2] क्रव्यादो अग्नीञ्छमयामि[3.4] सर्वानिति शुक्त्या माषपिष्टानि[5] जुहोति । ६ । सीसं दर्व्यामवधायोद्यथ्य[6] मन्थं जुह्वञ्छमयेत्[7] । ७ । नडमा रोहेति चतस्रोऽग्ने अक्रव्यादिमं क्रव्याद्यो नो अश्वेष्वन्येभ्यस्त्वा हिरण्यपाणिमिति[8] शमयति । ८ । दक्षिणतो जरत्कोष्ठे[9] शीतं भस्माभिविहरति[10] । ९ । शान्त्युदकेन सुशान्तं कृत्वावदग्धं समुत्खाय[11] । १० । परं मृत्यो[12] इत्युत्थापयति । ११ । क्रव्यादमिति[13] तिसृभिर्ह्रियमाणमनुमन्त्रयते[14] । १२ । दीपाद्याभिनिगदनात्प्रतिहरणेन व्याख्यातम्[15] । १३ । अविः कृष्णेति[16] निदधाति ।१४। उत्तमवर्जं[17] ज्येष्ठस्याञ्जलौ सीसानि । १५ । अस्मिन्वयं यद्रिप्रं सीसे मृड्ढ्वमित्यभ्यवनेजयति[18.19] । १६ । कृष्णोर्णया पाणिपादान्निमृज्य[20] ।१७। इमा जीवा उदीचीनैरिति[21] मन्त्रोक्तम् । १८ । त्रिः सप्ते-

---

[1] E व्याध्रौ. — [2] Ch अग्रभिष्ट. — [3] So emended; K अग्नी शम°; Bh अग्नि शम°; the rest अग्निं शम°. — [4] E शमयासि. — [5] K Bh माख°. — [6] K Bü Bh Ch °ग्रंथ्य. — [7] Bh जुह्वंन्; the rest जुह्वं. For the irregular form जुह्वन् cf. Kāuç. 109. 5; 110. 4; 111. 5; 126. 9. — [8] xii. 2. 1-4, 42, 43, 15, 16; iii. 21. 8. — [9] P Bü °कोष्टे. — [10] Ch भस्मावि°. — [11] So K P Bh Bü (prim. man.); Bi Bü (sec. man.) समुत्खापयति; E समुत्खातयति; Ch समुत्थापयति or समुत्खापयति (?). — [12] xii. 2. 21. — [13] xii. 2. 8-10. — [14] Ch (prim. man.) ह्रिय°. — [15] For दीपाद्याभिनिगदनात् cf. Kāuç. 39. 20-27? — [16] xii. 2. 52. — [17] The सीसानि, barring the कृकलासशिरः; cf. Kāuç. 8. 18. — [18] xii. 2. 13, 40, 19; MSS. मृड्ढम्. — [19] E अभ्यवनयति; the passage beginning here and continued to the end of the kaṇḍikā is repeated with slight modifications at Kāuç. 86. 19 fg. — [20] Bü निर्मृज्य. — [21] xii. 2. 22, 29. —

ति[1] कूद्या पदानि योपयित्वा[2] नदीभ्यः । १९ । मृत्योः पदमिति[3] द्वितीयया नावः । २० । परं मृत्यो इति[4] प्राग्दक्षिणं कूदीं प्रविध्य । २१ । सप्त नदीरूपाणि कारयित्वोदकेन पूरयित्वा । २२ । आ रोहत सवितुर्नावमेतां सुत्रामाणं महीमू ष्विति[5] सहिरण्यां सयवां नावमारोहयति । २३ । अश्मन्वती रीयत उत्तिष्ठता प्र तरता सखाय[6] इत्युदीचस्तारयति । २४ । ॥ ३ ॥ ॥ ७१ ॥

उत्तरतो गर्त उदक्प्रस्रवणे[7] ऽश्मानं निदधात्यन्तश्छिन्नम्[8] । १ । तिरो[9] मृत्युमित्यश्मानमतिक्रामति । २ । ता अधरादुदीचीरित्यनुमन्त्रयते[10, 11] । ३ । निस्सालामिति[12] शालानिवेशनं संप्रोक्ष्य[13] । ४ । ऊर्जं बिभ्रदिति[14] प्रपादयति । ५ । वैश्वदेवीमिति[15] वत्सतरीमालम्भयति । ६ । इममिन्द्रमिति[16] वृषम् । ७ । अनड्वाहमहोरात्रे इति[17] तल्पमालम्भयति । ८ । आ[18] रोहतायुरित्यारोहति । ९ । आसीना[19] इत्यासीनामनुमन्त्रयते[20] । १० । पिञ्जूलीराञ्जनं सर्पिषि पर्यस्येमा नारीरिति[21] स्त्रीभ्यः प्रयच्छति । ११ । इमे

---

[1] xii. 2. 29c. — [2] So emended in accordance with AV. xii. 2. 29c, 30; Bü लोपयत्वा; K Ch E P B लोपयित्वा; cf. Kāuç. 86. 22. — [3] xii. 2. 30. — [4] xii. 2. 21. — [5] xii. 2. 48c; vii. 6. 3, 2. — [6] xii. 2. 26, 27. — [7] Bü °प्रश्रस्रवणे. — [8] So Bü; Bi अन्तःछिन्नं; Ch अंत्तछिन्नं; K P Bh अंतछिन्नं; E अनुछिन्नं. — [9] xii. 2. 23d. — [10] K P Bh °दीचीनैरि° (cf. xii. 2. 29). — [11] xii. 2. 41. — [12] ii. 14. 1. — [13] Ch E संप्रोचत्यू(र्जं); K संप्रोच्च्यो(दर्ज्यं). — [14] vii. 60. 1. — [15] xii. 2. 28. — [16] xii. 2. 47. — [17] xii. 2. 48, 49. — [18] xii. 2. 24. — [19] xii. 2. 30c. — [20] So all MSS. Is the passage to be emended to इत्यासीनाननु°? — [21] xii. 2. 31. —

जीवा अविधवाः सुजामय इति[1] पुंभ्य[2] एकैकस्मै तिस्र-स्तिस्रस्ता[3] अध्यध्युदधानं[4] परिवृत्य[5] प्रयच्छति । १२ । परं मृत्यो व्याकरोम्या रोहतान्तर्धिः प्रत्यञ्चमर्कं ये अग्नयो नमो देववधेभ्यो ऽग्ने[6] ऽभ्यावर्तिन्नग्ने जातवेदः सह रय्या[7] पुनरूर्जेति[8] । १३ ।

अग्ने ऽभ्यावर्तिन्नभि न आ ववृत्स्व ।[9]
आयुषा वर्चसा सन्या[10] मेधया प्रजया धनेन ॥
अग्ने जातवेदः[11] शतं ते सहस्रं त उपावृतः ।
अधा[12] पुष्टस्येशानः पुनर्नो रयिमा कृधि ॥
सह रय्या नि वर्तस्वाग्ने पिन्वस्व धारया ।
विश्वप्स्न्या विश्वतस्परि ॥
पुनरूर्जा ववृत्स्व[13] पुनरग्न[14] इषायुषा[15] ।
पुनर्नः पाह्यंहसः[16] ॥ १४ ।

---

[1] Cf. xii. 2. 22, 31[a]; the passage seems to be a jagatī-pāda from an unknown source. — [2] Bü E Ch (prim. man.) कुंभ्य. — [3] Ch तिस्रस्तिस्रः स्रस्ता (so also Pet. Lex. sub. चर्त + परि); Bü तिस्तृस्तिस्रस्ता; E तिस्रः स्ति-स्रस्ता; Bh तिस्रः स्तिस्रः स्ता. — [4] So only K; the rest अध्यध्युद्-धानं; the Pet. Lex., ibid., अध्युद्धानं. — [5] Bü E Ch (sec. man.) परिवृत्य. — [6] Ch Bh अग्ने. — [7] Ch (sec. man.) रज्या; E रच्या. — [8] xii. 2. 21, 32, 24 (48), 44, 55; iii. 21. 1; vi. 13. 1; TS. iv. 2. 1. 2, 3; VS. xii. 7-10; Māitr. S. i. 7. 1; ii. 7. 8; Kāṭh. S. xvi. 8; xix. 11; xxii. 12; Lāṭy. iii. 5. 11. — [9] So K B; the rest, as also TS. and VS., omit the colon and the vowels coalesce. — [10] Ch सन्न्या; Bü संन्या. — [11] The reading of TS. VS. and Māitr. S. (अङ्गिरः) perfects the metre. — [12] Ch अध. — [13] TS. VS. and Māitr. S. read नि वर्तस्व for आ ववृत्स्व. — [14] E पुनरुग्न. — [15] E Bü (prim. man.) इषा (omitting °युषा). — [16] K पात्वंहसः. —

शर्करान्स्वयमातृस्णाञ्छणरज्जुभ्यां[1] विबध्य धारयति।१५। समया खेन जुहोति[2]।१६। इमं जीवेभ्य इति[3] द्वारे निदधाति।१७। जुहोत्येतयर्चा। आयुर्दावा धनदावा बलदावा पशुदावा पुष्टिदावा प्रजापतये स्वाहेति ।१८। षट्संपातं माता पुत्रानाशयते[4]।१९। उच्छिष्टं जायाम् ।२०। संवत्सरमग्निं[5] नोद्वायान्न हरेन्नाहरेयुः।२१। द्वादशरात्र इत्येके।२२। दश दक्षिणा।२३। पश्चादग्नेर्वाग्यतः संविशति।२४। अपरेद्युरग्निं चेन्द्राग्नी च यजेत[6]।२५। स्थालीपाकाभ्यामग्निं चाग्नीषोमौ च पौर्णमास्याम्।२६। सायंप्रातर्व्रीहीनावपेद्यवान्वाग्नये स्वाहा प्रजापतये स्वाहेति।२७। सायं सूर्याय स्वाहा प्रजापतये स्वाहेति।२८। प्रातर्द्वादशरात्रे ऽग्निं पशुना यजेत[7]।२९। स्थालीपाकेन[8] वोभयोर्विरिष्यति[9]।३०। संवत्सरतम्यां[10] शान्त्युदकं कृत्वा[11] ।३१। घृताहुतिर्नो[12] भवाग्ने[13] अक्रव्याहुतिर्घृताहुतिं त्वा वयमक्रव्याहुतिमुपनिषदेम[14] जातवेद इति चतुर उदपात्रे संपातानानीय।३२। तानुल्लप्य।३३। पुरस्तादग्नेः प्रत्यङासीनो जुहोति।

---

[1] K Bü Bi E P °तृणां शण°; Bh °तृसां शण°; Ch °तृसान्शण°. — [2] Cf. Kāuç. 15. 4. — [3] xii. 2. 23. — [4] E Bi °ति; P पुत्रान्प्राशयते. — [5] P Bi Bh °ग्नि(नो°). — [6] E यजेत्. — [7] E यजेत्. — [8] Ch E स्थालोपाकेनोभयो°. — [9] So K P Bh Bi; Bü °र्द्विरिष्यति; Ch E °र्वरिष्यति; cf. Kāuç. 59. 28. — [10] E Bü Ch (sec. man.) °तस्यां. — [11] K Bü (prim. man.) omit this word. — [12] Ch E Bü घृताहुतिं नो. — [13] E भवाग्नेयः क्रव्या°. — [14] Ch E °हुतिरुपनिषदेम. —

हुते रमस्व हुतभाग एधि मृडास्मभ्यं मोत हिंसीः प-
शून्न इति[1] । ३४ ।

यद्युद्वायाद्गस्मनारणिं[2] संस्पृश्य तूष्णीं मथित्वोद्दीप्य । ३५ ।
पूर्णहोमं हुत्वा । ३६ । संनतिभिराज्यं[3] जुहुयाद्व्याहृतिभिर्वा
। ३७ । संसृष्टे चैवं जुहुयात् । ३८ । अग्नावनुगते जायमाने[4]
। ३९ । आनडुहेन शकृत्पिण्डेनाग्न्यायतनानि[5] परिलिप्य । ४० ।
होम्यमुपसाद्य । ४१ । प्राणापानाभ्यां स्वाहा समानव्या-
नाभ्यां स्वाहोदानरूपाभ्यां स्वाहेत्यात्मन्येव[6] जुहुयात् । ४२ ।
अथ प्रातरुत्थायाग्निं निर्मथ्य यथास्थानं प्रणीय यथा-
गुरमग्निहोत्रं जुहुयात् । ४३ । सायमाशप्रातराशौ यज्ञावृ-
त्विजौ[7] । ४४ । ॥ ४ ॥ ॥ ७२ ॥

पुरोदयादस्तमयाच्च पावकं प्रबोधयेद्गृहिणी[8] शुद्ध-
हस्ता ।
समतीते संधिवर्णे ऽथ हावयेत्सुसमिद्धे[9] पावक आ-
हुतीषहिः[10, 11] । १ ।

---

[1] Some of the verses cited in full in this chapter, according to Roth, Der Atharva-Veda in Kaschmir, p. 23, are found in the Kashmir-çākhā of the Atharvan. — [2] E °ज्जायाभस्म°; Ch (prim. man.) °ज्जायाद्गस्म°. — [3] E For the संनति-verses cf. Kāuç. 5. 8. — [4] K (prim. man.) जायमाने (आनडुहेन); Ch (prim. man.) जयमाना; Ch (sec. man.) जयमान. — [5] So K E Bh; the rest °यतनं — [6] So Bü E; K omits these two words reading °रूपाभ्यां स्वाहेति जुहुयात्; the rest °त्मन्नेव. Cf. Lāty. iv. 11. 12 for the entire passage. — [7] Ch °वृत्तिजौ. — [8] K Ch E P Bh गृहणी. — [9] E हावयेत सु°. — [10] E आहुति°; Bü °सहि. — [11] The passage is metrical, four times twelve syllables. —

अग्नये च प्रजापतये च रात्रावादित्यश्च दिवा प्रजापतिश्च[1] ।

उदकं च समिधश्च होमेहोमे पुरो वरम्[2,3] । २ ।

होम्यैः[4] समिद्भिः पयसा स्थालीपाकेन सर्पिषा ।

सायंप्रातर्होम[5] एतेषामेकेनापि सिध्यति[6] । ३ ।

अभ्युद्धृतो हुतो[7] ऽग्निः प्रमादादुपशाम्यति ।

मथिते व्याहृतीर्जुहुयात्पूर्णहोमौ यथर्त्विजौ[8,9] । ४ ।

वनस्पतिभ्यो वानस्पत्येभ्य ओषधिभ्यो वीरुद्भ्यः सर्वेभ्यो देवेभ्यो देवजनेभ्यः पुण्यजनेभ्य इति[10] प्राचीनं तदुदकं निनीयते । ५ । स्वधा प्रपितामहेभ्यः स्वधा पितामहेभ्यः स्वधा पितृभ्य[11] इति दक्षिणतः । ६ । तार्क्ष्यायारिष्टनेमये ऽमृतं मह्यमिति पश्चात् । ७ । सोमाय सप्तर्षिभ्य इत्युत्तरतः । ८ ।

परिमृष्टे परिलिप्ते च[12] पर्वणि व्रातपतं हावयेदन्नमग्नौ ।

भूयो दत्त्वा[13] स्वयमल्पं च भुक्त्वापराह्णे व्रतमुपैति याज्ञिकम्[14] । ९ ।

---

[1] Metrical: 12 + 11 syllables. — [2] Bü वरम (! without colon). — [3] Metrical: 8 + 8 syllables. — [4] E हौम्यैः; P हौंम्यैः; Bü has a colon after the word. — [5] E °र्होमे. — [6] Metrical: four times eight syllables. — [7] Bü अभ्युद्धृताद्गतो. — [8] So with doubtful emendation; MSS. here and in verse 13, यवृत्विजौ. So also Dārila to Kāuç. 6. 22 (fol. 30[b] l. 3 fg.). Or is यावृत्विजौ the correct reading? Compare furthermore Kāuç. 72. 44. — [9] The first line is metrical: 8 + 8; the second seems to contain one hypercatalectic and one regular pāda of the same metre. — [10] Cf. viii. 8. 14; xi. 9. 24. — [11] P here inserts the word स्वधा. — [12] E चः. — [13] MSS. दत्वा. — [14] Metrical: 12, 11, 11, 12.

अनशनं ब्रह्मचर्यं च भूमौ शुचिरग्निमुपशेते[1] सुगन्धिः[2] ।१०।

अग्नीषोमाभ्यां दर्शेन इन्द्राग्निभ्यामदर्शने ।
आग्नेयं तु पूर्वं नित्यमन्वाहार्यं प्रजापतेः[3] ।११।

अर्धाहुतिस्तु[4] सौविष्टकृती सर्वेषां हविषां स्मृता ।
आनुमती[5] वा भवति[6] स्थालीपाकेष्वथर्वणाम्[7, 8] ।१२।

उभौ च संधिजौ यौ वैश्वदेवौ यथर्त्विजौ[9] ।
वर्जयित्वा सबर्हिषः साज्या[10] यज्ञाः सदक्षिणाः[11, 12] ।१३।

यथाशक्ति[13] यथाबलं[14] हुतादो ऽन्ये[15] अहुतादो ऽन्ये[16, 17] ।
वैश्वदेवं हविरुभये संचरन्ति[18, 19] । १४ ।

ते सम्यञ्च इह मादयन्तामिषमूर्जं यजमाना यमिच्छत[20] ।
विश्वे देवा इदं हविरादित्यासः सपर्यत ।

---

[1] K has a double colon after the syllables शुचिर°. — [2] Metrical: 11, 11. — [3] Metrical: four times eight syllables. — [4] E आर्धहुतिषु; P आर्धहुतिस्तु. — [5] K अनु°. — [6] Bi has a colon here. — [7] E स्थालीपाके ह्य°. — [8] Metrical: anuṣṭubh-pādas; the first is irregular. — [9] So emended hesitatingly; cf. verse 4. Bi धर्त्विजौ; E थवृत्तिजौ; the rest here as also in verse 4, and in Dārila to Kāuç. 6 22 थवृत्विजौ. Cf. also Kāuç. 72. 44. — [10] So Bi only; Bü साजा; K E Ch Bh P, and Dārila to Kāuç. 6. 22, साह्या. — [11] D (schol.) to Kāuç. 6. 30 (fol. 32^b l. 6) cites the beginning of this verse: अग्निहोत्रवैश्वदेवयोः नाज्येनेति कर्तव्यताविशेषः । उभौ च संधिजाविति प्रतिषेधात्; cf. also Kāuç. 10. 2. note. — [12] Metrical: four anuṣṭubh-pādas. — [13] So emended; MSS. यथाशक्तिर्य°. — [14] Ch Bi have a colon here. — [15] Ch E न्ने. — [16] Ch E न्ने. — [17] Cf. TS. v. 4. 5. 1; 5. 10. 5; Māitr. S. i. 4. 6; Āit. Br. 7. 19; Gop. Br. ii. 1. 6. — [18] E संचरिष्यंति. — [19] Metrical: the first line, 8. 8; the second would be a pāda of eleven syllables, if the word हविर् is omitted. — [20] K यमिक्कथ; Bi यमित्सत. —

अस्मिन्यज्ञे मा व्यथिष्यमृताय[1] हविष्कृतम्[2] । १५ ।
वैश्वदेवस्य हविषः सायंप्रातर्जुहोति ।
सायमाशप्रातराशौ[3] यज्ञावेतौ स्मृतावुभौ[4] । १६ ।
अप्रतिभुक्तौ शुचिकार्यौ[5] च नित्यं वैश्वदेवौ जानता यज्ञश्रेष्ठौ[6] ।
नाश्रोत्रियो नानवनिक्तपाणिर्नामन्त्रविज्जुहुयान्नाविपश्चित्[7] । १७ ।
बीभत्सवः शुचिकामा हि देवा नाश्रद्दधानस्य हविर्जुषन्ते ।
ब्राह्मणेन ब्रह्मविदा तु हावयेन्न स्त्रीहुतं शूद्रहुतं च देवगम्[8,9] । १८ ।
यस्तु विद्यादाज्यभागौ यज्ञान्मन्त्रपरिक्रमान्[10] ।
देवताज्ञानमावृत[11] आशिषश्च कर्म स्त्रिया अप्रतिषिद्धमाहुः[12] । १९ । ॥ ५ ॥ ॥ ७३ ॥

तयोर्बलिहरणम् । १ । अग्नय इन्द्राग्निभ्यां वास्तोष्प-

---

[1] E व्यथिष्यन्नमृताय; B व्यथिष्ठामृताय. — [2] These three lines contain a mantra-citation: triṣṭubh and jagatī-pādas in the first line; anuṣṭubh in the remaining two lines. — [3] Ch has a colon here. — [4] Metrical: eight-syllables; the second pāda catalectic. — [5] So E; the rest शुचिः कार्यौ. — [6] K यज्ञः°. — [7] Four triṣṭubh-pādas, the first hypercatalectic. — [8] So emended; MSS. दैवगं. — [9] Metrical: 11, 11, 12, 12. — [10] Bi °क्रमात्; Ch यज्ञानमन्त्रपरिक्रमात्; E यज्ञान्परिक्रमान्. — [11] P °वृत्त. — [12] Metrical; the first line 8, 8; the second line 11, 11, with crasis of °वृत and आशि° in the first pāda. —

तये प्रजापतये ऽनुमतय इति हुत्वा । २ । निष्क्रम्य बहिः[1] प्रचीनं[1] ब्रह्मणे वैश्रवणाय[2] विश्वेभ्यो देवेभ्यः[3] सर्वेभ्यो देवेभ्यो विश्वेभ्यो भूतेभ्यः सर्वेभ्यो भूतेभ्य इति[4,5] बहुशो बलिं[6] हरेत् । ३ । द्विः[7] प्रोक्षन्प्रदक्षिणमावृत्यान्तरुपातीत्य द्वारे । ४ । द्वार्ययोर्मृत्यवे धर्माधर्माभ्याम्[8] । ५ । उदधाने धन्वन्तरये समुद्रायौषधिवनस्पतिभ्यो द्यावापृथिवीभ्यामिति । ६ । स्थूणावंशयोर्दिग्भ्यो ऽन्तर्देशेभ्य इति । ७ । स्रक्तिषु वासुकये चित्रसेनाय चित्ररथाय तक्षोपतक्षाभ्यामिति । ८ । समन्तमग्नेराशायै श्रद्धायै मेधायै श्रियै ह्रियै विद्याया इति[9] । ९ । प्राचीनमग्नेः[10] गृह्याभ्यो[11] देवजामिभ्य इति[12] । १० । भूयो ऽभ्युद्धृत्य[13] ब्राह्मणान्भोजयेत् । ११ । तदपि श्लोको वदति[14] ।

माब्राह्मणाग्रतःकृतमश्नीयाद्विषवदन्नमन्नकाम्या[15,16] ।

---

यमाय चतुर्थीम् । २ । एकविंशत्या यवैः कृशरं[1] रन्धयति युतमन्यत्रपाकं च । ३ । सयवस्य[2] जीवाः प्राश्नन्ति । ४ । अथेतरस्य पिण्डं निपृणाति । ५ । यं ते मन्थमिति[3] मन्त्रोक्तं विमिते[4] निपृणाति । ६ । तदुन्नतोष्महर्तारो[5] दासा भुञ्जते[6] । ७ । वीणा वदन्त्वित्याह[7] । ८ । महयत[8] पितृनिति रिक्तकुम्भं[9] विमितमध्ये[10] निधाय तं[11] जरदुपानहाघ्नन्ति[12] । ९ । कस्ये मृजाना इति[13] त्रिः[14] प्रसव्यं प्रकीर्णकेश्यः[15] परियन्ति दक्षिणानूरूनाघ्नानाः । १० । एवं मध्यरात्रे ऽपररात्रे च । ११ । पुरा विवाहात्समांसः[16] पिण्डपितृयज्ञः । १२ । उत्थापनीभिरुत्थाप्य हरिणीभिर्हरेयुः[17] । १३ । अथावसायेति पश्चात्पूर्वकृतेभ्यः पूर्वाणि पूर्वेभ्यो ऽपराणि[18] यवीयसाम् । १४ । प्राग्दक्षिणां[19] दिशमभ्युत्तरामपरां दिशमभितिष्ठन्ति[20] । १५ । यथा चितिं[11] तथा श्मशानं दक्षिणापरां दिशमभि प्रवणम् । १६ । ॥ ५ ॥ ॥ ८४ ॥

---

[1] Bü कृसरं; the rest कृशरं; cf. Kāuç. 66. 16. — [2] So Ch E Ku; the rest यवस्य. — [3] xviii. 4. 42. — [4] So Bü (cf. sū. 9, and 83. 25); the rest विमितं. — [5] E °न्नतोहर्तारो; Ku Ch (prim. man.) °न्नतोमहर्तारो; Bi °न्नताष्महर्तारो. — [6] K P Bi Bh भुञ्जन्ति. — [7] K P Bh वाद°. — [8] Ch महयन्त. — [9] So Bü; K P Bi Bh च्टक्त°; Ch Ku E रक्त°. — [10] K P Bh विमितं. — [11] E Ch (prim. man.) निधारयत; Ch (sec. man.) निधापय°. — [12] Ch °पनहघेनेति; E °पानहघ्नेमि. — [13] xviii. 3. 17. — [14] Bü त्रिष्प्र°. — [15] K प्रकीर्णं. — [16] Bü विचासान्स°; Ch विवाहान्स°; P विवाहां स°; E विवाहसान्. — [17] For the उत्थापनी and हरिणी verses see Kāuç. 80. 35; 82. 31; 83. 20, 23. — [18] K परणी. — [19] E प्राग्दक्षिणानां; Bi प्राङ्दक्षिणां; P प्रदक्षिणापरां; Bh प्रदक्षिणां. — [20] Bü °भिनिस्तिष्ठंति; K Bh °भिस्तिष्ठन्ति. — [21] Bü चिनिं; Ku वित्तं; Ch चितं; E चिंतिं. —

अथ मानानि।१। दिष्टिकुदिष्टिवितस्तिनिमुष्ट्यरत्निपदप्रक्रमाः[1, 2, 3]।२। प्रादेशेन धनुषा चेमां[4] मात्रां मिमीमह इति[5]।३। सप्त दक्षिणतो मिमीते सप्तोत्तरतः पञ्च[6] पुरस्तात्त्रीणि पश्चात्।४। नव दक्षिणतो मिमीते नवोत्तरतः सप्त पुरस्तात्पञ्च पश्चात्।५। एकादश दक्षिणतो मिमीत एकादशोत्तरतो नव पुरस्तात्सप्त पश्चात्।६। एकादशभिर्देवदर्शिनाम्[7]।७। अयुग्ममानानि परिमण्डलानि चतुरस्राणि वा शौनकिनाम्।८। तथा हि दृश्यन्ते।९। यावान्पुरुष[8] ऊर्ध्वबाहुस्तावानग्निश्चितः[9, 10]।१०। सव्यानि दक्षिणाद्वाराण्ययुग्मशिलान्ययुग्मेष्टिकानि[11] च[12]।११। इमां मात्रां मिमीमह इति[13] दक्षिणतः सव्यरज्जुं मीत्वा।१२। वारयतामघमिति वारणं परिधिं[14] परिदधाति[15] शङ्कुं च निचृतति[16]।१३। पुरस्तान्मीत्वा शमेभ्यो ऽस्त्वघमिति[17] शामीलं परिधिं परिदधाति[18] शङ्कुं

---

[1] K वितस्ती; Bü वितस्ति. — [2] Bü निमुष्टिरत्नि; Ch (prim. man.) निर्मुष्यरत्नि; Ch (sec. man.) निमुष्यरत्नि; E निमुष्टवरत्नि. — [3] Bü पद्क्रमाः. — [4] Bü वेमां. — [5] xviii. 2. 38. — [6] K omits the passage beginning here and ending with the word पञ्च in the next sūtra. — [7] K P देवदर्शनाम्. — [8] Ch Ku यावत्पु°; Bb यावा. — [9] So (°स्तावान°) emended; K P Bi Bh °स्तावान्न°; Bü Ch E Ku °स्तावद्°. — [10] Thus emended; Bü °ग्निचित; P Bi °संचितः; the rest °ग्निचितः. — [11] K E °शिलीण्य°; Ch P °शिलाण्य°. — [12] Bü वे(मां). — [13] xviii. 2. 38. — [14] This word is wanting in K. — [15] E परिददाति; K P परिहंति; Ku परिदति; Bi परिति. — [16] Bü Ku निवृतति. — [17] So Ch E Ku Bü; K P Bh Bi त्वघमिति. — [18] Ch Ku E परिददातिः so also in the next sūtras. —

च निचृतति[1]। १४। उत्तरतो नीत्वा शाम्यत्वघमित्यौदुम्बरं[2] परिधिं परिदधाति शङ्कुं च निचृतति। १५। पश्चान्नीत्वा शान्तमघमिति[3] पालाशं परिधिं परिदधाति शङ्कुं च निचृतति[4]। १६। अमासीत्यनुमन्त्रयते[5]। १७। अक्ष्णया[6] लोहितसूत्रेण निबध्य। १८। स्तुहि श्रुतमिति[7] मध्ये गर्तं खात्वा पाशिसिकतोषोदुम्बरशङ्खशालूकसर्वसुरभिशमीचूर्णानि[8, 9, 10, 11] निवपति। १९। निःशीयतामघमिति निःशीयमानमास्तृणाति। २०। असंप्रत्यघम्[12]। २१। वि लुम्पतामघमिति परि चैलं[13] दूर्शं विलुम्पति। २२। उक्तो होमो दक्षिणत[14] स्तरणं च। २३। एतदा रोह ददामीति[15] कनिष्ठो निवपति।२४। एदं बर्हिरिति[16] स्थितसूनुर्यथापरु[17, 18] संचिनोति[19]। २५। मा ते मनो यत्ते अङ्गमिन्द्रो मोदपूरित्यातो[20, 21, 22] ऽनुमन्त्रयते।२६।धानाः सलिङ्गाभिरावपति[23, 24]। २७। ॥ ६ ॥ ॥ ८५ ॥

---

[1] Bü Ku निवृतति: so also in the next sūtras. — [2] E श्राम्यत्व°. — [3] P शाम्यमघमिति; Bi शाम्यत्वघमिति. — [4] This sūtra is wanting in K. — [5] xviii. 2. 45. — [6] Bü यद्दणया. — [7] xviii. 1. 40. — [8] So (पाशि°) all MSS.; cf. Kāuç. 83. 3. — [9] E Ch (prim. man.) (पाशि) शिकतो°; Ch (sec. man.) °शितो°. — [10] All MSS. except Bü Ku omit the syllable °षो°; cf. the word ऊषं in Kāuç. 83. 3. — [11] K °शालूकं; P Bh °सालूकं. — [12] So emended hesitatingly: P Bi Bh Ku °प्रत्यगं; K Ch E Bü °प्रत्वगं. — [13] Ch परिशैलं; Ku परिशिलं. — [14] Bü °तः — [15] xviii. 3. 73; 2. 37. — [16] xviii 4. 52 (et al.). — [17] Ch E स्थितस्तनु°; cf. the word तन्वं in xviii. 4. 52. — [18] So emended; K यथापुरु; the rest यथापरुः; cf. Kāuç. 64. 10. — [19] Cf. Kāuç. 82. 29. — [20] So (अङ्गमिन्द्रो मोदपूरित्यातो) only Bü; E °न्द्रो मा मारुत्वोदपूरित्यातो (cf. xviii. 3. 25); K Ch Ku P Bi °न्द्रस्त्वोदपूरित्यातो. — [21] xviii. 2. 24, 26; 3. 25–37. — [22] For इत्यातो cf. Kāuç. 81. 44; 86. 17. — [23] K सलिङ्गानिरा°. Cf. xviii. 3. 69; 4. 26, 43; 4. 32 fg. — [24] Ch E °वपते; K Bi Bh °वपंति. —

इदं कसाम्बुिति[1] सजातानवेक्षयति । १ । ये च जीवा ये ते पूर्वे परागता इति[2] सर्पिर्मधुभ्यां चरुं[3] पूरयित्वा शीर्षदेशे निदधाति । २ । अपूपवानिति[4] मन्त्रोक्तं दिक्ष्वष्टमदेशेषु निदधाति । ३ । मध्ये पचन्तम्[5] । ४ । सहस्रधारं शतधारमित्यद्भिरभिविष्यन्द्य[6, 7] । ५ । पर्णो राजेति[8] मध्यमपलाशैरभिनिदधाति[9] । ६ । ऊर्जो भाग[10] इत्यश्मभिः । ७ । उत्ते स्तभ्नामीति[11] लोगान्यथापरु[12, 13] । ८ । निःशीयतामघमिति निःशीयमानेनावछाद्य दर्भैरवस्तीर्य । ९ । इदमिद्वा उ नोप सर्पासौ हा इति[14] चिन्वन्ति । १० । यथा यमायेति[15] संश्रित्य[16] । ११ । मृणात्वघमित्युपरिशिर[17] स्तम्बमादधाति । १२ । प्रतिषिद्धमेकेषाम् । १३ । अकल्माषाणां[18] काण्डानामष्टाङ्गुलीं[19, 20] तेजनीमन्तर्हितमघमिति[21] ग्रामदेशादुच्छ्रयति[22] । १४ । प्रसव्यं परिषिच्य कुम्भा-

---

[1] xviii. 4. 37. — [2] xviii. 4. 57; 3. 72. — [3] Bü Ch E चरू; K च चरुं — [4] xviii. 4. 16. — [5] So K P Bh; Ku पंचतं; Ch Bü पवन्तं; E वपन्तं; Bi एवं तं. — [6] xviii. 4. 36 (P omits the word शतधारं). — [7] Ch E P Bi Bh °ष्यंद्य. — [8] xviii. 4. 53. — [9] For मध्यमपलाश cf. Kāuç. 21. 2. — [10] xviii. 4. 54. — [11] xviii. 3. 52. — [12] So Bü; Ch Ku Bh लोकांन्य°; KEPBi लोकान्य°. — [13] Thus emended; E °परं; the rest °परु. — [14] xviii. 2. 50; 3. 49; 4. 66; P Bi सर्प मातारमिति (continuing the second pratīka, and omitting the third). — [15] xviii. 4. 55. — [16] So Ku; Bi संश्रेत्य; E Ch (sec. man.) संश्नंत्य; Ch (prim. man.) संश्रंत्य; K P Bh संश्नेत्य; Bü संघंत्य. — [17] P Bh °शिरः. — [18] So Bü Ku; K (°केषांम) कल्माखानां; Ch (°केषां) कल्माखाणां; the rest (°केषां) कल्माषाणां. — [19] E काष्ठानाम°. — [20] Thus emended; K Ch E P Bi Ku °ष्टांगुदीं; Bü Bh °ष्टागुदी. — [21] K Ch °हिताम°. — [22] So Ch Ku E (cf. Kāty. Çr. xxi. 3. 27); K P Bi Bh °देशा उक्ष्रयति; Bü °देशावुदुक्ष्रयति. —

न्भिन्दन्ति[1, 2] । १५ । समेतेत्यपरस्यां[3] श्मशानसक्त्यां ध्रुवनान्युपयछन्ते[4, 5] । १६ । पश्चादुत्तरतो ऽग्नेर्वर्चसा[6] मां विवस्वानिन्द्र क्रतुमित्यातः[7] । १७ । समिन्धत[8] इति पश्चात्संकसुकमुद्दीपयति । १८ । अस्मिन्वयं यद्रिप्रं सीसे मृड्ढ्वमित्यभ्यवनेजयति[9, 10] । १९ । कृष्णोर्णया पाणिपादान्निमृज्य[11] । २० । इमे जीवा उदीचीनैरिति[12] मन्त्रोक्तम् । २१ । त्रिः सप्तेति[13] कूद्या पदानि योपयित्वा[14] श्मशानात्[15] । २२ । मृत्योः पदमिति[16] द्वितीयया नावः । २३ । परं मृत्यो इति[17] प्राग्दक्षिणं कूदीं प्रविध्य । २४ । सप्त नदीरूपाणि कारयित्वोदकेन पूरयित्वा । २५ । आ रोहत सवितुर्नावमेतां सुत्रामाणं महीमू ष्विति[18] सहिरण्यां सयवां नावमारोहयति । २६ । अश्मन्वती रीयत उत्तिष्ठता प्र

---

[1] So Bü only; Ch (sec. man.) कुम्भां; K E P Ku Bi Bh Ch (prim. man.) कां (! for कुम्भिकां?). — [2] K P Bh भिदंति; Ch भिंदति. — [3] Thus emended so as to yield the pratīka of vii. 21. 1; Ch Bü Ku शमेतेत्य°; E शमग्रम इत्य°; K P Bi Bh शमोत्य°. — [4] K P Ch Bh ध्रुवा°. — [5] So Bü Ku; Ch °नांन्युपयछंते; K P Bh °नान्यपयछते; Bi °नान्युपयछते; E °नान्युवपर्यछंते. — [6] Bü पश्चादुपतिष्ठंते वर्चसा. — [7] xviii. 3. 10; 61–67; cf. Kāuç. 81. 44; 85. 26. — [8] xviii. 4. 41 (et al.). — [9] xii. 2. 13, 40, 19; MSS. मृढ्वम्. — [10] The passage beginning here, and continued to sū. 27, occurs also with slight modifications in Kāuç. 71. 16–24. — [11] Bü Bi निर्मृज्य. — [12] xii. 2. 22, 29. — [13] xii. 2. 29^{c}. — [14] So emended in accordance with xii. 2. 29^{c}, 30; Ch E Bü लोपयत्वा; Ku लापयत्वा; K P Bi Bh लोपयित्वा; cf. Kāuç. 71. 19. — [15] K श्मशानानां; Bü श्मशानं; Ch (prim. man.) श्मशानांन्मृ°; Ch (sec. man.) श्मशानांमृ°; E श्मशानान्नंदीभ्यो; Ku स्मशानान् । नदीभ्यो (cf. the last word in Kāuç. 71. 19). — [16] xii. 2. 30. — [17] xii. 2. 21. — [18] xii. 2. 48^{c}; vii. 6. 3, 2. —

तरता सखाय[1] इत्युदीचस्तारयति । २७ । शर्कराद्या समिदाधानात्[2] । २८ । वैवस्वतादि समानम्[3] । २९ । प्राप्य गृहान्समानः[4] पिण्डपितृयज्ञः । ३० । ॥ ७ ॥ ॥ ८६ ॥

अथ पिण्डपितृयज्ञः । १ । अमावास्यायां सायं न्यह्ने ऽहनि[5] विज्ञायते[6] । २ । मित्रावरुणा परि मामधातामिति[7] पाणी प्रक्षालयते । ३ । वर्चसा[8] मामित्याचामति[9] । ४ । पुनः सव्येनाचमनादपसव्यं[10] कृत्वा प्रैषकृतं[11] समादिशति । ५ । उलूखलमुसलं शूर्पं चरुं कंसं[12] प्रक्षालय[13] बर्हिरुदकुम्भमा हरेति । ६ । यज्ञोपवीती[14] दक्षिणपूर्वमन्तर्देशमभिमुखः शूर्प एकपवित्रान्तर्हितान्हविष्यान्निर्वपति । ७ । इदमग्नये कव्यवाहनाय[15] स्वधा पितृभ्यः पृथिविषद्भ्य[16] इतीदं[17] सोमाय पितृमते स्वधा पितृभ्यः सोमवद्भ्यः पितृभ्यो वान्तरिक्षसद्भ्य[18] इतीदं यमाय पितृमते स्वधा पितृभ्यश्च दिविषद्भ्य इति[19] व्रीनवाचीनकाशीन्निर्वपति[20. 21] । ८ ।

---

[1] xii. 2. 26, 27. — [2] See Kāuç. 82. 2-19. — [3] Cf. Kāuç. 82. 36. — [4] So Ku Bü Bi; E रहान्; Ch (prim. man.) मृहान्; K P Bh Ch (sec. man.) महान्. — [5] So Bü P Bh; K साय त्यह्ने हनि; Bi सोय न्यह्ने हनि; E सायान्हयपराण्हे हनि; Ku सायां न्ह्यपराह्णे र्हनि; Ch (prim. man.) सायं न्यन्य र्हनि; Ch (sec. man.) सायं न्यहनि; Ch (tert. man.) सायं न्ह्यपराह्णे र्हनि (cf. the reading of Ku E). — [6] Ch Ku °ति. — [7] xviii. 3. 12. — [8] xviii. 3. 10 (11). — [9] Ch °चर्मति. — [10] Bü E Bh Ch (sec. man.) °चमनापसव्यं; Ch (prim. man.) °चमनामपसव्यं; Ku. °चमनलपसव्यं. Is the passage to be emended to सव्येनाचमनमपसव्यं? — [11] Ch °कृते. — [12] K P Bi Bh कांसं. — [13] E प्रचाल्य. — [14] Ku Ch E यज्ञोपवीति. — [15] Ch कव्यवाहनायेति; xviii. 4. 71. — [16] Ku E पृथिवी° (cf. Gobh. iv. 3. 10); xviii. 4. 78. — [17] So only Ch Ku E; the rest पृथिविषद्भ्य इदं. — [18] xviii. 4. 72, 73. 79. — [19] xviii. 4. 74, 80. — [20] Ch °वाचीं; E °वाचीन्. — [21] Bü E Ch Ku °काशीं; K °काशी; Bi °काशान्नि°. —

उलूखल ओप्य चिरवहन्तीदं वः पितरो हविरिति । ९ । यथा हविस्तथा परिचरति ।१०। हविर्ह्येव[1] पितृयज्ञः।११। प्रेषकृतं समादिशति चरुं प्रक्षालयाधिश्रयाप[2] ओप्य तण्डुलानावपस्व नेक्षणेन योधयन्नास्व[3] मा शिरो ग्रहीः[4] ।१२। शिरोग्रहं परिचक्षते[5] । १३ । बाह्येनोपनिष्क्रम्य[6] यज्ञोपवीती दक्षिणपूर्वमन्तर्देशमभिमुख उदीरतामिति[7] कर्षूं खनति प्रादेशमात्रीं तिर्यगङ्गुरिम्[8] । १४ । अवागङ्गुरिं पर्वमात्रीमित्येके[9] । १५ । अपहता[10] असुरा रक्षांसि ये पितृषद इति[11] प्राग्दक्षिणं पांसूनुदूहति[12] । १६ । कर्षूं च पाणी[13] च प्रक्षाल्यैतद्वः पितरः पात्रमिति कर्षूमुदकेन पूरयित्वा । १७ । अन्तरुपातीत्य मस्तुना नवनीतेन वा प्रतिनीय दक्षिणाञ्चमुद्वास्य[14]।१८। द्वे काष्ठे गृहीत्वोशन्त[15] इत्यादीपयति । १९ । आदीप्तयोरेकं प्रतिनिदधाति । २० । इहैवैधि धनसनिरित्येकं[16] हृत्वा[17] । २१ । पांसुष्वाधायोपसमादधाति[18] ये निखाताः समिन्धते ये तातृषुर्ये सत्यास

---

[1] E हविस्तर्ह्येव. — [2] So K Bü E P Bh Ch (prim. man.); Ch (sec. man.) °अपया; Bi °अपंयो. — [3] So Bi; Bü Ku Ch योधयन्वास्व; E योधायन्वास्व; K योधयन्वस्म; P योधायन्वस्म. — [4] K P have a colon here. — [5] K P प्रतिचक्षते; Bi प्रचक्षते. — [6] E परिष्क्राम्य. — [7] xviii. 1.44. — [8] P B °ङ्गुर्लिं; E °ङ्गुरि. — [9] Ch पर्वमात्रमि°. — [10] E अपहता. — [11] Cf. VS. ii. 29^c; Kāty. Çr. iv. 1. 8; Āçv. Çr. ii. 6. 9; Çāṅkh. Çr. iv. 4. 2; Āp. Çr. i. 7. 13; Gobh. iv. 3. 2. — [12] K Ch पांसू°. — [13] K Bü Bi पाणीं. — [14] E दक्षिणांच्यमु°. — [15] xviii. 1. 56. — [16] xviii. 4. 38. — [17] Bü Ch ह्रुत्वा; Ku हूत्वा. — [18] K पांसुष्वा°. —

इति[1]। २२। संभारानुपसादयति[2]। २३। पर्युक्षणीं बर्हि-रुदकुम्भं कंसं[3] दर्विमाज्यमायवनं चरुं वासांस्याञ्जनम-भ्यञ्जनमिति। २४। यदत्रोपसमाहार्यं भवति तदुपसमा-हृत्य। २५। अतो यज्ञोपवीती[4] पित्र्युपवीती बर्हिर्गृहीत्वा[5] विचृत्य संनहनं दक्षिणापरमष्टमदेशमभ्यवास्येत्। २६। बर्हिरुदकेन संप्रोक्ष्य[6] बर्हिषदः पितर उपहूता नः पि-तरो ऽग्निष्वात्ताः पितरो ये नः पितुः पितरो ये ऽस्माक-मिति[7] प्रस्तृणाति। २७। आयापनादीनि त्रीणि[8]। २८। उदीरतामिति[9] तिसृभिरुदपात्रायण्यन्वृचं निनयेत्। २९। अतः[10] पित्र्युपवीती[11] यज्ञोपवीती ये दस्यव[12] इत्युभयत आदीप्तमुल्मुकं त्रिः[13] प्रसव्यं परिहृत्य निरस्यति। ३०। पर्युक्ष्य। ३१। ॥ ८ ॥ ॥ ८७ ॥

ये रूपाणि प्रतिमुञ्चमाना असुराः सन्तः स्वधया चरन्ति।
त्वं तानग्ने अप सेध दूरान्सत्या[14] नः पितॄणां स-न्त्वाशिषः[15]

---

[1] xviii. 2. 34; 4. 41 (et al.); 3. 47, 48. — [2] Ch °नपसादयति· — [3] K P कांसं· — [4] Bü °वीति· — [5] Bü बर्हि; Ku बर्हिर्गृ°. — [6] The passage up to this word is wanting in K. — [7] xviii. 1. 51; 3. 45, 44, 46; 4. 68. — [8] See Kāuç. 83. 27–29. — [9] xviii. 1. 44–46. — [10] So Ch; K Ku Bü E P Bi (निनयेद्)आतः; cf. Kāuç. 88. 29. आतः seems to be a reading contaminated by 81. 44; 85. 26; 86. 17. — [11] Bü Ku Ch °वीति. — [12] xviii. 2. 28. — [13] Bü Ch Ku त्रिष्प्र°. — [14] K दूरात्स°; Bü दुरं; the rest दूरं· — [15] Cf. VS. ii. 30; Kāty. Çr. iv. 1. 9; Āçv. Çr. ii. 6. 2; Çāṅkh. Çr. iv. 4. 5; Āp. Çr. i. 8. 7; Gobh. iv. 4. 3. —

स्वाहा स्वधेति हुत्वा कुम्भीपाकमभिघारयति । १ । अग्नये कव्यवाहनायेति[1] जुहोति ।२। यथानिरुप्तं[2] द्वितीयाम् ।३। यमाय पितृमते स्वधा पितृभ्य इति[3] तृतीयाम् ।४। यद्वो अग्निरिति[4] सायवनांस्तण्डुलान्[5] ।५। सं बर्हिरिति[6] सदर्भांस्तण्डुलान्पर्युक्ष्य । ६ । अतो यज्ञोपवीती[7] पित्र्युपवीती दर्व्योद्धरति । ७ । द्यौर्दर्विरक्षितापरिमितानुपदस्ता सा यथा[8] द्यौर्दर्विरक्षितापरिमितानुपदस्तैवा[9] प्रततामहस्येयं दर्विरक्षितापरिमितानुपदस्ता । ८ । अन्तरिक्षं दर्विरक्षितापरिमितानुपदस्ता सा यथान्तरिक्षं दर्विरक्षितापरिमितानुपदस्तैवा[10] ततामहस्येयं दर्विरक्षितापरिमितानुपदस्ता । ९ । पृथिवी दर्विरक्षितापरिमितानुपदस्ता सा यथा पृथिवी दर्विरक्षितापरिमितानुपदस्तैवा[11] ततस्येयं दर्विरक्षितापरिमितानुपदस्तेति ।१०। उद्धृत्याज्येन संनीय त्रीन्पिण्डान्संहतान्निदधात्येतत्ते प्रततामहेति[12] । ११ । दक्षिणतः पत्नीभ्य इदं वः पत्न्य[13] इति । १२ । इदमाशंसूनामिदमाशंसमानानां[14] स्त्रीणां पुंसां प्रकीर्णावशीर्णानां[15]

---

[1] xviii. 4. 71. — [2] K inserts here on the margin सोमाय पितृमतेति (!xviii. 4. 72: this is probably a gloss based upon Kāuç. 87. 8). — [3] xviii. 4. 74, 78. — [4] xviii. 4. 64. — [5] K Bü E P B सायवनंस्त°. — [6] vii. 98. 1. — [7] E °वीति. — [8] K omits the passage beginning here with the word द्यौर् and ending with यथा° in the next sūtra. — [9] E °वं; Bi °व. — [10] P °वं. — [11] K Ku Ch °वं. — [12] xviii. 4. 75. — [13] So emended; MSS. पत्न्या. — [14] K °शंसूनामि°. — [15] E °वकीर्णानां. —

येषां वयं दातारो ये चास्माकमुपजीवन्ति। तेभ्यः सर्वेभ्यः सपत्नीकेभ्यः स्वधावदक्षय्यमस्त्विति[1] त्रिः[2] प्रसव्यं तण्डुलैः परिकिरति।१३। पिञ्जूलीराञ्जनं[3] सर्पिषि पर्यस्याद्ध्व[4] पितर इति न्यस्यति।१४। वद्ध्व[5] पितरो मा वो ऽतो[6] ऽन्यत्पितरो योयुवतेति[7,8] सूत्राणि।१५। अञ्जते व्यञ्जत[9] इत्यभ्यञ्जनम्।१६। आज्येनाविछिन्नं पिण्डानभिघारयति ये च जीवा ये ते पूर्वे परागता इति[10]।१७। अत्र पितरो मादयध्वं यथाभागं यथालोकमावृषायध्वमिति[11]।१८। अत्र पत्न्यो मादयध्वं यथाभागं यथालोकमावृषायध्वमिति।१९। यो ऽसावन्तरग्निर्भवति तं प्रदक्षिणमवेक्ष्य तिस्रस्तामीस्तामर्यति।२०। प्रतिपर्यावृत्यामीमदन्त पितरो[12] यथाभागं यथालोकमावृषायिषतेति[13,14]।२१। अमीमदन्त पत्न्यो यथाभागं यथालोकमावृषायिषतेति[15]।२२। आपो[16] अग्निमित्यद्भिरग्निमवसिच्य।२३। पुत्रं[17] पौत्रमभितर्पयन्तीरि-

---

[1] K स्वधावदक्षय्यमस्त्वक्षय्यमस्त्विति. — [2] Bü त्रिष्प्र°. — [3] Ch °ञ्जन. — [4] K Ch P Bi Ku °स्याध्वं; Bü °स्यांध्व; E °स्याड्ध्व. — [5] MSS. वध्वं. — [6] So emended in accordance with Āçv. Çr. ii. 7. 6; MSS. वोचो. — [7] Bü यूयुवतेति; P E योयुवति. — [8] Cf. VS. ii. 32[b]; Kāty. Çr. iv. 1. 16; Āçv. Çr. ii. 7. 6; Çāñkh. Çr. iv. 5. 2; Donner, Piṇḍapitṛyajña, p. 26. — [9] xviii. 3. 18. — [10] xviii. 4. 57; 3. 72. — [11] Cf. TS. i. 8. 5. 1; VS. ii. 31[a]; Māitr. S. i. 10. 3, 19; Kāty. Çr. iv. 1. 13; Āçv. Çr. ii. 7. 1; Lāṭy. Çr. ii. 10. 4; Çāñkh. Çr. iv. 4. 11; viii. 2. 13; Gobh. iv. 3. 11. — [12] Bü E Ch (prim. man.) here insert मादयध्वं. — [13] K Bü °वृषाइषतेति. — [14] Cf. TS. i. 8. 5. 2; VS. ii. 31[b]; Māitr. S. i. 10. 3, 19; Kāṭh. S. ix. 6; Kap. S. viii. 9; Kāty. Çr. iv. 1. 14; Āçv. Gr. ii. 7. 2; Lāṭy. Çr. ii. 10. 5; Çāñkh. Çr. iv. 4. 14; Gobh. iv. 3. 12. — [15] K Bü °वृषाइषतेति. — [16] xviii. 4. 40. — [17] xviii. 4. 39. —

त्याचामत मम प्रततामहास्ततामहास्तताः सपत्नीकास्तृप्यन्त्वाचामन्त्विति[1] प्रसव्यं परिषिच्य । २४ । वीरान्मे प्रततामहा दत्त वीरान्मे ततामहा दत्त वीरान्मे पितरो दत्त पितॄन्वीरान्याचति[2] । २५ । नमो वः पितर[3] इत्युपतिष्ठते । २६ । अक्षन्नित्युत्तरसिचमवधूय[4] । २७ । परा यातेति[5] परायापर्यात । २८ । अतः[6] पित्र्युपवीती[7] यज्ञोपवीती यन्न इदं पितृभिः सह मनो ऽभूत्तदुपाह्वयामीति मन उपाह्वयति[8] । २९ । ॥ ९ ॥ ॥ ८८ ॥

मनो न्वा ह्वामहे[9] नाराशंसेन स्तोमेन ।
पितॄणां च मन्मभिः[10] ॥
आ न एतु मनः पुनः क्रत्वे दक्षाय जीवसे ।
ज्योक्च सूर्यं[11] दृशे ॥
पुनर्नः पितरो मनो ददातु दैव्यः[12] जनः ।
जीवं व्रातं[13] सचेमहि ॥
वयं सोम व्रते तव मनस्तनूषु[14] बिभ्रतः ।
प्रजावन्तः सचेमहि ॥

---

[1] Cf. Āçv. Çr. ii. 6. 14. — [2] Ku °रान्वाचयति; Ch °रान्वाचति; Bi °रान्याचते. — [3] xviii. 4. 81, etc. — [4] xviii. 4. 61. — [5] xviii. 4. 63. — [6] So emended; MSS. (परायापयत्य)ातः; cf. Kāuç. 87. 30; also 81. 44; 85. 26; 86. 17. — [7] Ku पित्रुपवोती; Bü पित्र्युपवीति. — [8] So we emend the passage beginning with भूत्त°; K P Bi भूत्तमुपाह्वयामीति मन उपाह्वयति; Ch Ku भूरिति तदुपाह्वयामि मन उपाह्वयति; E भूरिति तदुपार्ाम (!) मनु उपाह्वर्यति; Bü भूरिति मन उपाह्वर्यति; cf. Vāit. Sū. 38. 4. — [9] K Bü P °महि. — [10] Ch E Bü P मन्वभिः. — [11] K P Bi Bü सूर्याय. — [12] K दैव्यं. — [13] Bü जातं. — [14] Ch Bü तनुषु. —

ये सजाताः सुमनसो[1] जीवा जीवेषु मामकाः[2]।
तेषां श्रीर्मयि कल्पतामस्मिन्गोष्ठे शतं समा इति[3]।१।
यच्चरुस्थाल्यामोदनावशिष्टं भवति तस्योष्मभक्षं[4] भक्षयित्वा ब्राह्मणाय दद्यात्।२। यदि ब्राह्मणो न लभ्येताप्स्वभ्यवहरेत्[5]।३। निजाय दासायेत्येके[6]।४। मध्यमपिण्डं[7] पत्न्यै पुत्रकामायै प्रयच्छति।५।

आ धत्त पितरो गर्भं कुमारं पुष्करस्रजम्[8]।
यथेह पुरुषो ऽसत्[9]॥
आ त्वारुक्षद्वृषभः[10] पृश्निरग्रियो[11] मेधाविनं[12] पितरो
आ त्वायं पुरुषो गमेत्पुरुषः पुरुषादधि। [गर्भमा दधुः।
स ते श्रैष्ठ्याय जायतां स सोमे साम गायत्विति।६।

यद्यन्या[13] द्वितीया भवत्यपरं[14] तस्यै।७। प्राग्रतमं श्रोत्रियाय।८। अथ यस्य भार्या दासी वा प्रद्राविणी भवति ये ऽमी[15] तण्डुलाः प्रसव्यं परिकीर्णा भवन्ति तांस्तस्यै[16] प्रयच्छति।९।

---

[1] K समनसो; cf. VS. and Çāñkh. Gṛ. (see note 3). — [2] E कामकाः. — [3] Cf. RV. x. 57. 3–6; VS. iii. 53–56; xix. 46; TS. i. 8. 5. 2; Tāit. Br. ii. 6. 3. 5; Māitr. i. 10. 3; Kāṭh. ix. 6; Kap. S. viii. 9; Vāit. Sū. 20. 9; Lāṭy. Çr. v. 2. 11; iii. 2. 10; Āçv. Gṛ. ii. 7. 8; Çāñkh. Gṛ. v. 9. 4. — [4] Ch तस्योष्मं. — [5] So emended; Ku °प्सु अभ्यवहरे°; the remaining MSS. °प्सुभ्यवहरे°. — [6] Bü दामायेभ्येत्येके; Ch दासात्वेत्येके. — [7] Bi मध्यमं. — [8] K पुष्करं°. — [9] Cf. VS. ii. 33; Kāty. Çr. iv. 1. 32; Çāñkh. Çr. iv. 5. 8; Āçv. Çr. ii. 7. 13; Gobh. iv. 3. 27. — [10] Ch E °रुचत्. — [11] K Ku Bü °ग्रियो. — [12] Ch मेधाविनो. — [13] K यद्यान्नया. — [14] K Bü भवंत्य°. — [15] Bü Ch Ku E मी; the rest वै. — [16] Ch तां तस्यै; Bü तास्तस्यै; Bi तंस्तस्यै. —

अर्वाच्युपसंक्रमे[1] मा पराच्युप वस्तथा[2]।
अन्नं प्राणस्य बन्धनं तेन बध्नामि त्वा मयीति । १० ।
पर्युक्षणीं समिधश्चादाय मा प्र गामेत्याव्रज्योर्जं बिभ्रदिति[3] गृहानुपतिष्ठते । ११ ।
रमध्वं मा बिभीतनास्मिन्गोष्ठे करीषिणः ।
ऊर्जं दुहानाः[4] शुचयः शुचिव्रता[5] गृहा जीवन्त उप [वः सदेम[6, 7] ॥
ऊर्जं मे देवा अददुरूर्जं मनुष्या उत ।
ऊर्जं पितृभ्य आहार्षमूर्जस्वन्तो गृहा मम ॥
पयो मे देवा अददुः पयो मनुष्या उत ।
पयः पितृभ्य आहार्षं पयस्वन्तो गृहा मम ॥
वीर्यं मे देवा अददुर्वीर्यं मनुष्या उत ।
वीर्यं पितृभ्य आहार्षं वीरवन्तो गृहा ममेति ।१२।
अन्तरुपातीत्य समिधोऽभ्यादधाति ।
अयं नो अग्निरध्यक्षोऽयं नो[8] वसुवित्तमः ।
अस्योपसद्ये मा रिषामायं[9] रक्षतु नः[10] प्रजाम्[11] ॥
अस्मिन्सहस्रं पुष्यास्मैधमानाः[12] स्वे गृहे ।
इमं समिन्धिषीमह्यायुष्मन्तः[13] सुवर्चसः[14] ॥

---

[1] Ku Ch E Bü °क्राम (= क्रमे?). — [2] Bü वत्तथा. — [3] xiii. 1. 59; vii. 60. 1. — [4] P दुहाना. — [5] Bi °व्रती. — [6] E सद्देम. — [7] Cf. VS. iii. 41; Çāñkh. Çr. ii. 12. 1; Çāñkh. Gṛ. iii. 7. 2; Lāṭy. Çr. iii. 3. 1; Āçv. Çr. ii. 5. 17. — [8] K Bi °ध्यच्चयन्नो; P °ध्यच्चयंतो; E °ध्यच्चायन्नो. — [9] K °यां. — [10] Ch सच्चत नः; E रच्चतनुः; B रच्च पुनः. — [11] Cf. Çāñkh. Gṛ. iii. 7. 3. — [12] So emended; K Ku Bü Ch E पुष्यास्मैधमाना; P तुष्या°; Bi पुष्याम सधमाना. — [13] Ch P समिधि°. — [14] Cf. Çat. Br. xiv. 9. 4. 23. —

त्वमग्न ईडित आ त्वाग्न इधीमहीति[1]। १३। अभूदूत[2] इत्यग्निं प्रत्यानयति। १४। यदि सर्वः[3] प्रणीतः[4] स्याद्दक्षिणाग्नौ त्वेतदाहिताग्नेः[5]। १५। गृह्येष्वनाहिताग्नेः[6]। १६।

इदं चिन्मे कृतमस्तीदं[7] चिच्छक्नवानि[8]।
पितरश्चिन्मा वेदन्निति। १७।

यो ह यजते तं देवा विदुर्यो ददाति तं मनुष्या यः श्राद्धानि कुरुते तं पितरस्तं पितरः। १८। ॥ १० ॥ ॥ ८९ ॥

॥ इत्यथर्ववेदे कौशिकसूत्र एकादशो ऽध्यायः समाप्तः ॥

---

[1] xviii. 3. 42; 4. 88. — [2] xviii. 4. 65. — [3] Ch Ku सर्व. — [4] K Ch E P Bi प्रणीत. — [5] K त्येतद°. — [6] K P गृह्यप्य°; Bü गृह्येय्या°; Bi गृह्येय्य°. — [7] So E; the rest कृतमसीदं. — [8] K P चिच्छक्नुवानिति; Bi Bü Ku Ch चिच्छक्नुवानि. —

॥ ओं ॥

मधुपर्कमाहारयिष्यन्दर्भानाहारयति[1] ।१। अथ विष्टरान्कारयति । २ । स खल्वेकशाखमेव प्रथमं पाद्यं द्विशाखमासनं त्रिशाखं मधुपर्काय।३। स यावतो मन्येत तावत उपादाय विविच्य[2] संपर्याप्य मूलानि च प्रान्तानि च यथाविस्तीर्ण इव स्यादित्युपोत्कृष्य[3] मध्यदेशे ऽभिसंनह्यति[4] । ४ । ऋतेन त्वा सत्येन त्वा तपसा त्वा कर्मणा त्वेति संनह्यति[5] । ५ । अथ ह सृजत्यतिसृष्टो द्वेष्टा यो[6] ऽस्मान्द्वेष्टि यं च वयं द्विष्मः[7] ।६। अस्य च दातुरिति दातारमी-

---

[1] Daç. Kar. and Ath. Paddh. place the description of the अर्घ ceremony into the middle of the विवाह (Kāuç. 76. 9); cf. Jolly, Das Dharmasūtra des Viṣṇu und das Kāṭhakagṛhya. Both paddhatis introduce it with with the words अत्र स्थाने मधुपर्क उच्यते. Then Daç. Kar. आचार्यो गृहगतं कर्म करोति। पुनः आचार्य(!) वेदिकामध्ये स्वस्तिवाचनं करोति (cf. Kāuç. 137. 4, note); Ath. Paddh. आचार्यो गृहागते इदं कर्म कुर्वीत । वर आगत्य। ब्राह्मणान् स्वस्ति वाचयित्वा। वराय मधुपर्कं ददाति । मधुपर्कमाहारयिष्यन् । दर्भानाहारयति । पुनर्दाता वदति। आचार्यो वदति. — [2] Bü उपादायाधिविविभ्य(!). — [3] Ch स्यादपोत्कृष्य. — [4] K P Bi पिसंनह्यति. — [5] Ath. Paddh. ऋतेन त्वा etc.। इति मध्यादभिसंनह्यति । मध्ये ग्रंथीन्करोति; Daç. Kar. विष्टरत्रयं कृत्वा। साधु भवानास्तामर्चयिष्यामो भवन्तमिति दाता वदति। विष्टरा भोः प्रतिगृह्यतां(!)। प्रतिगृह्णामि। ऋतेन त्वा etc. इति मध्ये देशे ऽभिसंनह्यति. — [6] Bi द्वेष्यां; cf. sū. 15. — [7] Ath. Paddh. अतिसृष्टो द्वेष्टेति मंत्रेण विष्टरान्करोति; Daç. Kar. वरो वदति । अतिसृष्टो etc. —

क्षते। ७। अथोदकमाहारयति पाद्यं भो[1] इति[2]। ८। हिरण्यवर्णाभिः प्रतिमन्त्र्य[3] दक्षिणं पादं प्रथमं प्रकर्षति। मयि ब्रह्म च तपश्च धारयाणीति। ९। दक्षिणे प्रक्षालिते[4] सव्यं प्रकर्षति। मयि क्षत्रं च विशश्च धारयाणीति। १०। प्रक्षालितावनुमन्त्रयते।

इमौ पादाववनिक्तौ ब्राह्मणं यशसावताम्।
आपः पादावनेजनीर्द्विषन्तं[5, 6] निर्दहन्तु मे[7, 8] ॥ ११।

अस्य च दातुरिति दातारमीक्षते। १२। अथासनमाहारयति। सविष्टरमासनं भो[9] इति[10]। १३। तस्मिन्प्रत्यङ्मुख उपविशति। १४। विमृग्वरीं पृथिवीमित्येतया[11] विष्टरे पादौ प्रतिष्ठाप्याधिष्ठितो ऽद्वेष्टा यो[12] ऽस्मान्द्वेष्टि यं च वयं द्विष्मः[13]। १५। अस्य च दातुरिति दातारमीक्षते। १६। अथोदकमाहारयत्यर्घ्यं भो[14] इति[15]। १७। तत्प्रतिमन्त्रयते। अन्नानां मुखमसि मुखमहं श्रेष्ठः समानानां भूयासम्। आपो ऽमृतं स्थामृतं मा कृणुत[16] दासास्माकं[17] बहवो

---

[1] K P भो३. — [2] Daç. Kar. पाद्यं भो इति दाता वदति प्रतिगृह्यतां प्रतिगृह्णामि वरो वदति. — [3] Ath. Paddh. and Daç. Kar. हिरण्यवर्णा इत्यप्सूक्तेन (i. 33) उदकं वरस्य प्रति अभिमंत्रयते. — [4] Ath. Paddh. वरस्य पादौ यजमानः (Cod. ॰नं) प्रक्षालयते. — [5] Bü Ch ॰नेजनीर्द्वि॰. — [6] Daç. Kar. द्विषितं. — [7] Daç. Kar. निर्हतं तु मे. — [8] Cf. Āit. Br. 8. 27. — [9] K P भो३. — [10] Ath. Paddh. दाता वदति. — [11] xii. 1. 29. — [12] Bi द्वेष्ट्यां; cf. sū. 6. — [13] Ath. Paddh. विमृग्वरीमिति द्विशाखं विष्टरमासनं निदधाति। एकशाखं पादौ निदधाति। अधिष्ठितो etc. — [14] K P भो३. — [15] Ath. Paddh. दाता प्रेषं ददाति. — [16] KChEPKu and Daç. Kar. कृणुध्व. — [17] So (with double sandhi) all MSS. and Daç. Kar.; cf. the introduction. —

भवन्त्वश्वावन्नोमन्मय्यस्तु[1] पुष्टमों[2] भूर्भुवः स्वर्जनदोमिति[3,4] । १८ । तूष्णीमध्यात्मं[5] निनयति[6] ।१९। तेजो ऽस्यमृतमसीति ललाटमालभते[7] । २० । अथोदकमाहारयत्याचमनीयं भो[8] इति[9] ।२१। जीवाभिराचम्य[10] ।२२। अथास्मै मधुपर्कं वेदयन्ते ह्यनुचरो मधुपर्को भो[11] इति[12] ।२३। द्वाभ्यां शाखाभ्यामधस्तादेकयोपरिष्टात्सापिधानम्[13] । २४ । मधु वाता ऋतायत इत्येताभिरेवाभिमन्त्रणम्[14] । २५ । तथा प्रतिमन्त्रणम् । २६ । ॥ १ ॥ ॥ ९० ॥

मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः ।
माध्वीर्गावो भवन्तु नः[15] ॥
मधु नक्तमुतोषसो मधुमत्पार्थिवं रजः ।
माध्वीर्नः सन्त्वोषधीः ॥

---

[1] K Ku Bi भवन्त्य°. — [2] So emended; MSS. पुष्टौं. — [3] P °दो३मिति. — [4] Ath. Paddh. दाता अर्घ्यमभिमंत्रयति वरस्य प्रति. — [5] Ku Bü P °ध्यात्मन्नि°; E °ध्यात्मंन्नि°; Ku भ्यात्मं. — [6] Ath. Paddh. वरस्यांजलिं दाता तूष्णीं निनयति (!). — [7] Daç. Kar. मुखं विमार्ष्टि. — [8] K P भो३. — [9] Ath. Paddh. दाता वदति प्रैषं कर्तारं (Cod. कर्ता) प्रति. — [10] Ath. Paddh. and Daç. Kar. जीवा स्थेति सूक्तेन (xix. 69. 1 fg.: cf. Dārila to Kāuç. 3. 4; Vāit. Sū. 1. 19) त्रिराचमनं करोति वरः. — [11] K P भो३. — [12] Ath. Paddh. दाता वदति. — [13] Ath. Paddh. and Daç. Kar. त्रिशाखं मधुपर्काय (cf. sū. 3) द्वाभ्यां etc. as in Kāuç. — [14] Ath. Paddh. मधु etc. इति त्रिभिरेताभिरेव वराभिमंत्रणं. Cf. RV. i. 90. 6–8; Māitr. S. ii. 7. 16 (Vol. ii. p. 99); VS. xiii. 27; Çat. Br. xiv. 9. 3. 11–13; Kāuç. 118. 1. These mantras occur also in the Kashmir-çākhā (cf. Roth, Der Atharvaveda in Kaschmir, p. 23). The verses are given in full at the beginning of the next kaṇḍikā. — [15] E interchanges this pāda with the third pāda of the next verse like RV.; VS. and Māitr. S. arrange the pādas still differently. —

मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्यः ।
मधु द्यौरस्तु नः पिता ॥ १ ।

तत्सूर्यस्य त्वा चक्षुषा प्रतीक्ष[1] इति[2] प्रतीक्षते[3] । २ । अयुतो ऽहं देवस्य त्वा सवितुरिति[4] प्रतिगृह्य पुरोमुखं प्राग्दण्डं निदधाति । ३ । पृथिव्यास्त्वा नाभौ सादयाम्यदित्या उपस्थ इति[5] भूमौ प्रतिष्ठाप्य । ४ । द्वाभ्यामङ्गुलिभ्यां प्रदक्षिणमाचाल्यानामिकयाङ्गुल्याङ्गुष्ठेन च संगृह्य प्राश्नाति[6] । ५ । ओं भूस्तत्सवितुर्वरेण्यं[7] भूः स्वाहेति प्रथमम् । ६ । भर्गो देवस्य धीमहि[8] भुवः स्वाहेति द्वितीयम् । ७ । धियो यो नः प्रचोदयात्स्वः[9] स्वाहेति तृतीयम् । ८ । वयं देवस्य धीमहि जनत्स्वाहेति चतुर्थम् । ९ । तुरं देवस्य भोजनं वृधत्स्वाहेति पञ्चमम् । १० । करत्स्वाहेति षष्ठम् । ११ । रुहत्स्वाहेति सप्तमम् । १२ । महत्स्वाहेत्यष्टमम् । १३ । तत्स्वाहेति नवमम् । १४ । शं स्वाहेति दशमम् । १५ । ओमित्येकादशम् । १६ । तूष्णीं द्वादशम् । १७ । तस्य भूयोमात्रमिव भुक्त्वा ब्रा-

---

[1] K and Daç. Kar. प्रतीक्षत. — [2] Cf. VS. (Kāṇvaçākhā ii, p. 58 of Weber's edition); Kāty. Çr. ii. 2. 15; Lāṭy. Çr. iv. 11. 10; Vait. Sū. 3. 8; Gop. Br. ii. 1. 2. — [3] Ath. Paddh. मधुपर्कमीक्षते. — [4] xix. 51. 1, 2; Ath. Paddh. अयुतो ऽहमिति सूक्तेन देवस्य त्वेति ऋक्. — [5] Cf. VS. (Kāṇvaçākhā ii., p. 58 of Weber's edition); Kāty. Çr. ii. 2. 17; Çāṅkh. Çr. iv. 7. 6; Lāṭy. Çr. iv. 11. 12; Gop. Br. ii. 1. 2; Vait. Sū. 3. 10; cf. Ind. Stud. ii. 307. — [6] Ath. Paddh. भोजनवत्. — [7] RV. iii. 62. 10[a], and in other Saṁhitās. — [8] RV. iii. 62. 10[b], etc. — [9] RV. iii. 62. 10[c], etc. —

ह्मणाय श्रोत्रियाय प्रयच्छेत् । १८ । श्रोत्रियालाभे[1] वृषलाय प्रयच्छेत् । १९ । अथाप्ययं[2] निगमो भवति ।

सोममेतत्पिबत[3] यत्किं चाश्नीत ब्राह्मणाः ।

माब्राह्मणायोच्छिष्टं दात मा सोमं पात्वसोमप इति[4, 5]

। २० ।॥ २ ॥ ॥ ९१ ॥

दधि च मधु च ब्राह्मो[6] मधुपर्कः । १ । पायस ऐन्द्रो मधुपर्कः । २ । मधु चाज्यं च सौम्यो मधुपर्कः । ३ । मन्थश्चाज्यं च पौष्णो[7] मधुपर्कः । ४ । क्षीरं चाज्यं च सारस्वतो मधुपर्कः । ५ । सुरा चाज्यं च मौसलो मधुपर्कः । ६ । स खल्वेष[8] इये भवति सौत्रामण्यां[9] च राजसूये च । ७ । उदकं चाज्यं च वारुणो मधुपर्कः । ८ । तैलं चाज्यं च श्रावणो मधुपर्कः । ९ । तैलश्च पिण्डश्च पारिव्राजको[10] मधुपर्कः । १० । इति[11] खल्वेष नवविधो मधुपर्को भवति । ११ । अथास्मै गां वेदयन्ते गौर्भो[12] इति[13] । १२ । तान्प्रतिमन्त्रयते[14] ।

भूतमसि भवदस्यन्नं प्राणो बहुर्भव ।

ज्येष्ठं यन्नाम नामत

---

[1] E श्रोत्रियस्यालाभे. — [2] Bü अथाप्यनिमिगमो; K P अथाप्रियं निगमो; Ku अथाप्यग्नि निगमो; Ch अथाप्यग्निगमो; Bi अथाप्ययं चिगमो. — [3] K P Ch पिबति; Bi °ते. — [4] K P Bi °सोमपमिति; Ch °सोममिति. — [5] Cf. Lāṭy. Çr. ii. 12. 17; Ind. Stud. x. 61-63. — [6] K E Bi and Ath. Paddh. ब्राह्म्यो; Bü Ku Ch P as above. — [7] E पौष्ण्यो. — [8] So E; Bü खल्वेख; K Ku Ch P Bi खल्वेक. — [9] P स्यौत्रामण्यां. — [10] E P परि°. — [11] Here P inserts स. — [12] K P भो३. — [13] Daç. Kar. दाता ब्रूयात्. — [14] Daç. Kar. आचार्यो गां (Cod. गौः) प्रतिमन्त्रयेत्; Ath. Paddh. मंत्रं (Cod. मंत्रे) वरः. —

ओं भूर्भुवः स्वर्जनदोमिति[1] । १३ । अतिसृजति[2] ।

मातादित्यानां दुहिता वसूनां स्वसा रुद्राणाममृतस्य नाभिः ।

प्र णो[3] वोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट[4] ॥

ओं[5] तृणानि गौरश्नित्याह[6] । १४ । सूयवसादिति[7] प्रतिष्ठमानामनुमन्त्रयते । १५ । नालोहितो मधुपर्को भवति[8] । १६ । नानुज्ञानमधीमह[9] इति कुरुतेत्येव[10] ब्रूयात् । १७ । स्वधिते मैनं हिंसीरिति शस्त्रं प्रयच्छति[11] । १८ । पाप्मानं मे ऽप जहीति कर्तारमनुमन्त्रयते । १९ । आग्नेयीं वपां कुर्युः । २० । अपि वा[12] ब्राह्मण एव प्राश्नीयात्तद्देवतं[13] हि तद्धविर्भवति । २१ । अथास्मै स्नानमनुलेपनं मालाभ्यञ्जनमिति[14] । २२ । यदत्रोपसमाहार्यं भवति तदुपसमाहृत्य । २३ । अथोपासकाः प्राप्योपासकाः स्मो[15] भो[16] इति वेदयन्ते[17] । २४ ।

---

[1] KP °द्रो३मिति. — [2] Ath. Paddh. गां विसर्जयति आचार्यो ब्रूते. — [3] So all MSS. (except Ku) and Daç. Kar.; Ku णु. — [4] RV. viii. 101. 15; Āçv. Gṛ. i. 24. 32; Pār. Gṛ. i. 3. 27; Gobh. Gṛ. iv. 10. 9; Lāṭy. Çr. i. 2. 13. — [5] K Bü Ch वधिष्टों; E P B Ku वधिष्ठों; Daç. Kar. वसिष्ठः (!). — [6] Ath. Paddh. गौस्तृणानि (!) ददाति. — [7] vii. 73. 11. — [8] This word is wanting in K Bü Bi P. — [9] Ch नानुज्ञाम°; E नाननुज्ञातम°. — [10] Cf. Çāṅkh. Gṛ. ii. 15. 3; Āçv. Gṛ. i. 24. 31; Pār. Gṛ. i. 3. 30; Gobh. Gṛ. iv. 10. 22; Lāṭy. Çr. i. 2. 12. — [11] Cf. Kāuç. 44. 30. — [12] E °पीव. — [13] K E °द्दैवतं. — [14] E Ku माल्या°; Ch माल्याभ्या°. — [15] P Bi Bü स्म. — [16] K भो३. — [17] Ath. Paddh. वस्त्रालंकारादि सर्वं समाहृत्य ददाति । प्राप्योपासकाः स्मो भो इति दाता वदति. —

तान्प्रतिमन्त्रयते[1]। भूयांसो[2] भूयास्म ये च नो भूयसः[3] काष्टापि[4] च नो ऽन्ये[5] भूयांसो जायन्ताम्।२५।अस्य च दातुरिति दातारमीक्षते[6]। २६। अथान्नाहाराः प्राप्यान्नाहाराः स्मो[7] भो[8] इति वेदयन्ते। २७। तान्प्रतिमन्त्रयते[9]। अन्नादा भूयास्म ये च नो ऽन्नादान्काष्टापि[10, 11] च नो ऽन्ये[12] ऽन्नादा भूयांसो जायन्ताम्।२८।अस्य च दातुरिति दातारमीक्षते। २९। आहृते[13] ऽन्ने जुहोति यत्काम कामयमाना इत्येतया[14]। ३०।

यत्काम कामयमाना इदं कृरमसि ते हविः।
तन्नः सर्वं समृध्यतामथैतस्य हविषो वीहि स्वाहेति।३१।

एष आचार्यकल्प एष ऋत्विक्कल्प एष संयुक्तकल्प एष विवाहकल्प एषो ऽतिथिकल्प एषो ऽतिथिकल्पः। ३२।

॥ ३ ॥ ॥ ९२ ॥

॥ इत्यथर्ववेदे कौशिकसूत्रे द्वादशो ऽध्यायः समाप्तः ॥

---

[1] Ath. Paddh. and Daç. Kar. आचार्यः. — [2] So emended; MSS. of the text and Paddhatis भूयसो; cf. sū. 28. — [3] Daç. Kar. has a colon here. — [4] E Bi काष्ठापि; Daç. Kar. काष्टापि. Is the passage to be read: ये च नो भूयांसः काष्ठापि etc.? — [5] K Bi न्ने. — [6] Daç. Kar. आचार्यः. — [7] K Bü P and Ath. Paddh. स्म. — [8] K P भो३. — [9] K तान्मन्त्रयते; Ath. Paddh. आचार्यो मन्त्रयते; Daç. Kar. दाता वदति. — [10] So emended; MSS. of the text and Daç. Kar. न्नादा का°; cf. the accusative भूमसो in sū. 25. — [11] E काष्ठापि; Daç. Kar. काष्टापि. Is the passage to read: ये च नो ऽन्नादाः काष्ठापि etc.? — [12] K न्ने. — [13] E and Daç. Kar. आहुते; B आहृते. — [14] xix. 52. 5; but note the सकलपाठ in the next sūtra; Ath. Paddh. यत्काम इत्येकया विवाहे वस्त्रार्मौ अन्यत्र हस्तहोमः। ...अभ्यागते आचार्यो (!) विवाहे वराय मधुपर्को देयः। अन्येभ्यश्चतुर्वर्णकेभ्यो द्रव्याज्येभ्यश्चतुराश्रमोणिभ्यश्च गृहागते मधुपर्कः देयः। मधुपर्कः समाप्तः. —

॥ ओं ॥

अथाद्भुतानि । १ । वर्षे । २ । यक्षेषु । ३ । गोमायुवदने । ४ । कुले कलहिनि । ५ । भूमिचले । ६ । आदित्योपप्लवे । ७ । चन्द्रमसश्च[1] । ८ । औषस्यामनुद्यत्याम्[2] । ९ । समायां दारुणायाम् । १० । उपतारकशङ्कायाम् । ११ । ब्राह्मणेष्वायुधिषु । १२ । दैवतेषु[3] नृत्यत्सु च्योतत्सु हसत्सु गायत्सु । १३ । लाङ्गलयोः संसर्गे । १४ । रज्ज्वोस्तन्त्वोश्च । १५ । अग्निसंसर्गे । १६ । यमवत्सायां गवि । १७ । वडवागर्दभ्योर्मानुष्यां च । १८ । यत्र धेनवो लोहितं दुहते । १९ । अनडुहि[4] धेनुं धयति । २० । धेनौ[5] धेनुं धयन्त्याम्[6] । २१ । आकाशफेने । २२ । पिपीलिकानाचारे । २३ । नीलमक्षानाचारे । २४ । मधुमक्षानाचारे । २५ । अनाघ्राते[7] । २६ । अवदीर्णे[8] । २७ । अनुदक उदकोन्मीले । २८ । तिलेषु समतैलेषु[9] । २९ । हविः-

---

[1] So (चन्द्रमसश्चौष०) K Ku Bü Bi P E; Ch चन्द्रमसाच्चोष०. — [2] So emended; K P Ch (prim. man.) ०नूदंत्यां; E Bi ०नूर्दित्यां; Ku Ch (sec. man.) ०नुर्दित्यां; Bü ०नूदत्यां. — [3] So emended; MSS. देवतेषु; cf. Kauç. 6. 34; 105. 1. — [4] E अनडुहे; Ku Bi अनद्रुहि. — [5] So emended; MSS. धेनुर्धे०. — [6] So emended; MSS. धयत्यां; Ch on the margin धेनुर्धेनुं धयति. — [7] K (०चारि)नान्याते. — [8] E विदीर्णे. — [9] Ch (prim. man.) ०न्मोलेषु सतैलेषु. —

ष्वभिमृष्टेषु । ३० । प्रसव्येष्वावर्तेषु । ३१ । यूपे[1] विरोहति । ३२ । उल्कायाम् । ३३ । धूमकेतौ[2] सप्तर्षीनुपधूपयति । ३४ । नक्षत्रेषु पतापतेषु । ३५ । मांसमुखे[3] निपतति । ३६ । अनग्नाववभासे[4] । ३७ । अग्नौ[5] श्वसति[6] ।३८। सर्पिषि तैले मधुनि च विष्यन्दे[7] । ३९ । ग्राम्ये ऽग्नौ[8] शालां[9] दहति । ४० । आगन्तौ च । ४१ । वंशे[10] स्फोटति । ४२ । कुम्भोद्धाने[11] विकसत्युखायां सक्तुधान्यां च । ४३ । ॥ १ ॥ ॥ ९३ ॥

अथ यत्रैतानि वर्षाणि वर्षन्ति घृतं[12] मांसं मधु च यद्धिरण्यं[13] यानि चाप्यन्यानि[14] घोराणि वर्षाणि वर्षन्ति[15] तत्पराभवति कुलं वा ग्रामो वा जनपदो वा । १ । तत्र राजा भूमिपतिर्विद्वांसं ब्रह्माणमिछेत्[16] । २ । एष ह वै विद्वान्यद्भृग्वङ्गिरोवित् । ३ । एते ह वा अस्य सर्वस्य शमयितारः[17] पालयितारो यद्भृग्वङ्गिरसः[18] । ४ । स आ-

[1] So emended; MSS. यूपो. — [2] K P E Bi धूमकेतुः. — [3] So emended; MSS. ॰मुखो. — [4] So emended; MSS. ॰नग्नावभासे. Cf. Kāuç. 130. 1. — [5] Ch E । अग्नौ. — [6] K श्वसति; E चसति. — [7] So Ku P; Bi विष्यदे; Bü Ch E विष्पन्दे; K विस्यंदे; cf. Kāuç. 132. 1. — [8] So emended; K Ku P Bi Bü E Ch (sec. man.) ग्राम्यो ऽग्निः; Ch (prim. man.) ग्राम्ये ऽग्निः. — [9] Ch शाला. — [10] K P वंश. — [11] Thus with double sandhi (for कुम्भ उद्धाने) all MSS.: see the introduction. — [12] K पक्तं; cf. the first stanza of the mantra, sū. 14. — [13] Ch (prim. man.) यद्विरिण्यं; Ch (sec. man.) यद्विरिण्यं; cf. the first stanza of the mantra, sū. 14; P Bü have a colon here, as in sū. 14. — [14] K यान्यन्यानि. — [15] The passage beginning with the word घृतं and ending here is wanting in Bi; the first part of it is metrical as in the mantra, sū. 14. — [16] Ch (prim. man.) ब्रह्मणमि॰. — [17] Bü समयितारः. — [18] The passage beginning with एते and ending here is wanting in

होपकल्पयध्वमिति । ५ । तदुपकल्पयन्ते कंसमहते वसने शुद्धमाज्यं शान्ता ओषधीर्नवमुदकुम्भम् । ६ । त्रीणि[1] पर्वाणि कर्मणः[2] पौर्णमास्यमावास्ये पुण्यं नक्षत्रम् । ७ । अपि चेदेव यदा कदा चिदार्ताय कुर्यात् । ८ । स्नातो ऽहतवसनः सुरभिर्व्रतवान्कर्मण्य[3] उपवसत्येकरात्रं त्रिरात्रं षड्रात्रं द्वादशरात्रं वा । ९ । द्वादश्याः[4] प्रातर्यत्रैवादः पतितं भवति तत उत्तरमग्निमुपसमाधाय । १० । परिसमुह्य पर्युक्ष्य परिस्तीर्य बर्हिरुदपात्रमुपसाद्य परिचरणेनाज्यं परिचर्य । ११ । नित्यान्पुरस्ताद्धोमान्हुत्वाज्यभागौ च । १२ । अथ जुहोति । १३ ।

घृतस्य धारा इह[5] या वर्षन्ति पक्वं मांसं मधु च यद्धिरण्यम्[6] ।
द्विषन्तमेता अनु यन्तु वृष्टयो ऽपां वृष्टयो बहुलाः[7] सन्तु मह्यम् ॥
लोहितवर्षं मधुपांसुवर्षं यद्वा वर्षं घोरमनिष्टमन्यत् ।
द्विषन्तमेते अनु यन्तु सर्वे पराञ्चो यन्तु निवर्तमानाः ॥

अग्नये स्वाहेति हुत्वा । १४ । दिव्यो गन्धर्व इति[8] मातृनाम-

K P: it is probably a gloss. The same passage is interpolated in Bi before उपवसति below, sū. 9. —

[1] K omits the passage beginning here, and continuing through the next three sūtras, but reads instead: बाह्यतः शान्तवृक्षस्येध्मं प्राञ्चमुपसमाधाय परिस्तीर्य etc., as in sū. 11. — [2] Bü मर्मणः. — [3] P कमण्यावुप°; E कर्मण्युप°. — [4] Bü द्वादशाः. — [5] Bü अभि. — [6] Ch (prim. man.) यर्द्विरण्यम्; Ch (sec. man.) यर्द्धिरण्यम्; cf. sū. 1. — [7] So all MSS.; Weber, Omina und Portenta, p. 349, reads बहुलं. — [8] ii. 2. 1. For the मातृनामानि (सूक्तानि) and the मातृगण of the gaṇamālā, Ath. Pariç. 34. 4, see Kāuç. 8. 24, and note. —

भिर्जुहुयात् । १५। वरमनड्वाहं ब्राह्मणः कर्त्रे दद्यात्।१६।
सीरं वैश्यो ऽश्वं प्रादेशिको ग्रामवरं[1] राजा । १७ । सा
तत्र प्रायश्चित्तिः । १८ । ॥ २ ॥ ॥ ९४ ॥

अथ यत्रैतानि यक्षाणि दृश्यन्ते तद्यथैतन्मर्कटः श्वापदो[2] वायसः पुरुषरूपमिति तदेवमाशङ्क्यमेव भवति।१।
तत्र जुहुयात् । २ ।

यन्मर्कटः[3] श्वापदो वायसो यदीदं[4] राष्ट्रं[5] जातवेदः प-
पुरुषरक्षसमिषिरं यत्पताति[6] । [ताति
द्विषन्तमेते अनु यन्तु सर्वे पराञ्चो यन्तु निवर्तमानाः॥

अग्नये स्वाहेति हुत्वा । ३ । दिव्यो गन्धर्व इति मातृनामभिर्जुहुयात्[7]।४। सा तत्र प्रायश्चित्तिः । ५ । ॥ ३ ॥ ॥ ९५ ॥

अथ ह गोमायू नाम मण्डूकौ यत्र वदतस्तद्यन्मन्यन्ते[8] मां प्रति वदतो मां प्रति वदत इति तदेवमाशङ्क्यमेव
भवति । १ । तत्र जुहुयात् । २ ।

यद्गोमायू वदतो जातवेदो ऽन्यया[9] वाचाभि[10] जञ्ज-
भातः[11] ।

---

[1] Bü E °चरं. — [2] E °पंदो. — [3] K मर्क. — [4] Ch (prim. man.) वदीदं; the rest, as above; Weber, ibid. p. 354, emends to यदिदं. — [5] K राष्टं. — [6] So emended; MSS. यः पताति; the pāda disturbs the metre of the stanza, which is without it good triṣṭubh. — [7] ii. 2. 1. For the मातृनामानि (सूक्तानि) and the मातृगण of the gaṇamālā, Ath. Pariç. 34. 4, see Kāuç. 8. 24, and note. — [8] So emended with Weber, ibid. p. 356: MSS. वदतस्तद्वन्मन्यन्ते. — [9] Bi न्यथा or न्यधा. — [10] Thus emended; MSS. वाचामभि. The words are to be read metrically वाचा अभि. — [11] So emended with Weber, as third person dual subjunctive of the intensive: MSS. जञ्जभानः. Cf. Kāuç. 114. 2. —

रथंतरं बृहच्च सामैतद्विषन्तमेतावभि[1] नानदैताम्[2] ॥
रथंतरेण त्वा बृहच्छमयामि बृहता[3] त्वा रथंतरं शमयामि ।
इन्द्राग्नी त्वा ब्रह्मणा वावृधानावायुष्मन्तावुत्तमं[4] त्वा कराथः ॥

इन्द्राग्निभ्यां स्वाहेति हुत्वा । ३ । दिव्यो गन्धर्व इति मातृनामभिर्जुहुयात्[5] । ४ । सा तत्र प्रायश्चित्तिः । ५ । ॥ ४ ॥ ॥ ९६ ॥

अथ यत्रैतत्कुलं कलहि भवति तन्निर्ऋतिगृहीतमित्याचक्षते । १ । तत्र जुहुयात् । २ । आरादरातिमिति[6] द्वे[7] । ३ ।

अयाश्चाग्ने ऽस्यनभिशस्तिश्च सत्यमित्त्वमया[8] असि ।
अयासा मनसा कृतो ऽयास्यं[9] हव्यमूहिषे[10] ।

---

[1] E °वमो. — [2] Thus emended with Weber, Omina und Portenta, p. 356, as subjunctive third dual middle with secondary ending of the intensive; K Bü नानुदैताम्; Ch P Bi Ku नानुदैवताम्; E नानुदैवतम्. — [3] K P Bü बृहदा; E बृहतां. — [4] E °न्ता उत्तमं, as at Kāuç. 97. 6. — [5] ii. 2. 1. For the मातृनामानि (सूक्तानि) and the मातृगण of the gaṇamālā, Ath. Pariç. 34. 4, see Kauç. 8. 24, and note. — [6] E B °मिते. — [7] viii. 2. 12. 13. — [8] Thus emended; MSS. °त्वमया. Cf. Kāuç. 5. 13. — [9] Thus emended; Ch E Bi Bü Bh याम्न॰ (so also in Kāuç. 5. 13); K यास्मा॰ (so also in Kāuç. 5. 13); P reads यास्मा॰ here, but यस्मा॰ in kaṇḍikā 5; Ku यास्मन्; Antyeṣṭi. यासा; Maitr. S. ऽयाः सन्; Çānkh. Çr. यासं; Weber, Omina und Portenta, p. 357, conjectures ऽयास्त्वं. — [10] MSS. of the text °मूहिष (आ); Antyeṣṭi. °मूहिषः ।; Ath. Paddh. °मुहिषः ।; cf. Kāuç. 5. 13. —

अया नो धेहि[1] भेषजं[2] ॥

स्वाहेत्यग्नौ हुत्वा । ४ । तत्रैवैतान्होमाञ्जुहुयात्[3] । ५ ।

आरादग्निं क्रव्यादं निरूहञ्जीवातवे[4] ते परिधिं दधामि[5] ।

इन्द्राग्नी त्वा ब्रह्मणा[6] वावृधानावायुष्मन्तावुत्तमं[7] त्वा कराथः ॥

इन्द्राग्निभ्यां स्वाहेति हुत्वा । ६ । अपेत एतु निर्ऋतिरित्येतेन सूक्तेन जुहुयात् । ७ ।

अपेत एतु निर्ऋतिर्नेहास्या[8] अपि[9] किं चन ।
अपास्याः[10] सत्वनः[11] पाशान्मृत्यूनेकशतं नुदे[12] ॥
ये ते पाशा एकशतं मृत्यो मर्त्याय हन्तवे ।
तांस्ते यज्ञस्य मायया सर्वाँ अप[13] यजामसि ॥

---

[1] Thus emended; Antyeṣṭi. अया धेहि; MSS. of the text and Ath. Paddh. आ नो धेहि; Māitr. S., Kāty. Çr. and Çāñkh. Çr. अया नो धेहि; cf. Kāuç. 5. 13. — [2] The verse occurs in Kāuç. 5. 13 and with more or less variation at Māitr. S. i. 4. 3; Kāṭh. S. v. 4; Kāty. Çr. xxv. 1. 11; and Çāñkh. Çr. iii. 19. 3. — [3] Ch E P Bi Ku होमान्; the rest होमां. — [4] K Bü P Ku निरूहं; Ch E Bi निरुहं; cf. viii. 2. 9^c. — [5] Ch (prim. man.) परि दधामि; E P B ददामि; the two pādas ending here are identical with viii. 2. 9^cd. — [6] K ब्रह्मणां. — [7] E ता उत्तमं, as at Kāuç. 96. 3; Ch (prim. man.) °धानायुवाप्मंतायुत्तमं. — [8] K °स्मा; P स्मा˘३. — [9] Thus emended with Weber, Omina und Portenta, p. 358; MSS. अप. Possibly the entire pada originally stood as follows: नेहास्मा˘ आप किं चन. Cf. note 8. — [10] K अपस्यात्स°; Bü अपास्यात्स°; E आपास्याः; P अपस्या. — [11] E सत्वंनः. — [12] The pratīka of this stanza occurs at Vāit. Sū. 38. 1. — [13] Weber, ibid. reads सर्वानप. —

निरितो यन्तु नैर्ऋत्या[1] मृत्यव एकशतं परः[2]।
सेधामैषां[3] यत्तमः[4] प्राणं ज्योतिश्च दध्महे[5] ॥
ये[6] ते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता महान्तः।
तेभ्यो अस्मान्वरुणः सोम इन्द्रो[7] विश्वे मुञ्चन्तु मरुतः स्वर्काः[8] ॥
ब्रह्म भ्राजदुद्गादन्तरिक्षं दिवं च[9] ब्रह्मावाधूष्टामृतेन[10] मृत्युम्[11]।
ब्रह्मोपद्रष्टा सुकृतस्य साक्षाद्ब्रह्मास्मदप[12] हन्तु शमलं तमश्च[13] ॥ ८।

वरमनड्वाहमिति समानम्[14]। ९। ॥ ५ ॥ ॥ ९७ ॥

अथ यत्रैतद्भूमिचलो भवति तत्र जुहुयात्। १।
अच्युता[15] द्यौरच्युतमन्तरिक्षमच्युता भूमिर्दिशो अच्युता इमाः।

---

[1] K E P Bi नैर्ऋत्यां; Bü नैर्ऋता. — [2] This division is according to Ch K Bü E Ku; Weber, ibid. joins this word to the next pada; cf. note 4. — [3] Thus emended; MSS. सेधामेषां. — [4] Weber, ibid., having placed the word परः at the head of this pada, emends यत्तमः to तमः, metri causa; cf. note 2. E reads य उत्तमः; Ku यतमः. — [5] K Bi दय्महे; P दह्महे. — [6] E ऽये. — [7] Bü इन्द्रो. — [8] Cf. for this stanza Kāty. Çr. xxv. 1. 11. — [9] The words दिवं च, which disturb the metre, appear in all MSS. — [10] Thus emended; K Ch ब्रह्मावाधृष्टा°; Ku °धुष्टा°; Bü °धोष्वा°; Bi °धौष्टा°; E °धृष्टवा°; P ब्रह्मावाष्टा°. — [11] K P B सत्यं; Bü रुत्युं. — [12] K °स्मतप; by cancelling the syllable स्मद् and reading ब्रह्माप good tristubh metre may be constructed. — [13] Ch तपश्च. — [14] Cf. Kāuç. 94. 16 fg. — [15] The pratīka of this hymn seems to be employed in Kāuç. 35. 12, a fact not noted there. —

अच्युतो ऽयं रोधावरोधाद्भुवो[1] राष्ट्रे प्रति तिष्ठाति
जिष्णुः ॥
यथा सूर्यो दिवि रोचते यथान्तरिक्षं मातरिश्वाभि-
वस्ते[2] ।
यथाग्निः पृथिवीमा विवेशेवायं[3] ध्रुवो अच्युतो अस्तु
जिष्णुः ॥
यथा देवो दिवि स्तनयन्विव राजति यथा वर्षं वर्ष-
कामाय वर्षति ।
यथापः पृथिवीमा विविशुरेवायं[4] ध्रुवो अच्युतो[5]
अस्तु[6] जिष्णुः[7] ॥
यथा पुरीषं[8] नद्यः समुद्रमहोरात्रे अप्रमादं क्षरन्ति ।
एवा विशः संमनसो हवं मे ऽप्रमादमिहोपा यन्तु[9]
सर्वाः ॥

---

[1] Thus Ch (sec. man.); P Bi रोद्घावरोद्घाध्रुवो; Bü रराद्वाचारा-द्वाध्रुावा; Ch (prim. man.) रोधाद्ध्रुवो; Ku रोद्घाद्भुवो; K E रोधा-वरोधाध्रुवो; Weber, Omina und Portenta p. 359, note 1, suggests hesitatingly रोधनादवरोधाद्भुवो in order to fill out the triṣṭubh pāda. Cf. also the Pet. Lex. sub vōce 1. रोध. — [2] Ch वास्त; Ku वास्ता. — [3] Thus emended; Ch Bü E °वेशिवायं; K P Bi °वेशिवायुं; Ku °वैशी-वायं. — [4] So Bü; Ch Bi °वेशुरेवायं; Ku °वेशुरेवायुं; K P °वे-शिरेवायुं; E पृथिवीमाविश्वेश्वरेवायं. — [5] This word is wanting in K. — [6] E ग्रस्ति. — [7] Bü विष्णु:. — [8] Thus emended; K Ku Ch P Bi पुरीषां; E परीषां; Bü पुरीषा. The sense would be: ‘As the rivers pour their sediment into the sea (or Indus) etc.; cf. Roth in Kuhn’s Zeitschrift, xxvi, p. 62 fg. Weber, ibid. emends to the adjective पुरीष्या, which may be supported by RV. v. 53. 9, मा वः परि ष्ठात्सरयुः पुरी-षिणी. — [9] So all MSS.: Weber, ibid. reads °होपयान्तु. —

दृंहतां देवी[1] सह देवताभिर्ध्रुवा दृढाच्युता[1a] मे ऋस्तु भूमिः ।
सर्वपाप्मानमपनुद्यास्मदमित्रान्मे[2,3] द्विषतो ऽनु[4] विध्यतु[5] ॥
पृथिव्यै स्वाहेति हुत्वा । २ । ऋा त्वाहार्षं ध्रुवा द्यौः सत्यं बृहदित्येतेनानुवाकेन[6] जुहुयात् । ३ । सा तत्र प्रायश्चित्तिः । ४ । ॥ ६ ॥ ॥ ९८ ॥

ऋथ यत्रैतदादित्यं तमो गृह्णाति तत्र जुहुयात् । १ ।
दिव्यं चित्रमृतूया[7] कल्पयन्तमृतूनामुग्रं भ्रमयन्नुदेति[8] ।
तदादित्यः प्रतरन्नेतु सर्वत[9] ऋाप इमां[10] लोकाननुसंचरन्ति ॥
ऋोषधीभिः संविदानाविन्द्राग्नी त्वाभि रक्षताम्[11] ।
ऋृतेन[12] सत्यवाकेन तेन सर्वं तमो जहि ॥
ऋादित्याय स्वाहेति हुत्वा । २ । विषासहिं सहमानमि-

---

[1] So Ku; the rest देवीं. — [1a] Thus emended: MSS. दृढा ऋच्युता, contrary to sandhi and the demands of the metre. — [2] K P Bü सर्वं. — [3] Thus Ch (sec. man.); E Ch (prim. man.) °परुध्या ऋस्मद्°; K P Bü Bi °पनुध्यास्मद्°; Ku सर्वपाश्मानंमपनुध्यानुद्या ऋस्मद्°. — [4] Thus emended with Weber, Omina und Portenta p. 359; MSS. द्विषते न. — [5] Thus emended; Ch E P Bi Ku विध्धतीति; K Bü विध्यति. — [6] vi. 87. 1; 88. 1; the anuvāka beginning at xii. 1. 1. — [7] So K and Bü, the latter of which has the word twice: दिव्यं चित्रमृतुया कल्पयंतमृतूया कल्पयंतमृ° (!); Ch E P Bi and Bü once °मृतुया; Ku °मृया; Weber, Omina und Portenta, p. 361, note 1, emends to °मृतुथा. — [8] K भ्रमयंनुदेनि; Weber, ibid. note 2, points out the fact that भ्रमयदुदेति is to be expected in accordance with the rules of grammar. — [9] Ch सर्वत. — [10] Read ऋापिमां. — [11] Thus all MSS.; Weber, ibid. reads रक्षतात्. — [12] Ch कृतेन. —

त्येतेन सूक्तेन[1] जुहुयात् । ३ । रोहितैरुपतिष्ठते[2] । ४ । सा तत्र प्रायश्चित्तिः । ५ । ॥ ७ ॥ ॥ ९९ ॥

अथ यत्रैतच्चन्द्रमसमुपप्रवाति[3] तत्र जुहुयात् । १ ।
राहू राजानं त्सरति स्वरन्तमेनमिह[4] हन्ति पूर्वः ।
सहस्रमस्य तन्व इह नाश्याः[5] शतं तन्वो वि नश्यन्तु[6] ॥
चन्द्राय स्वाहेति हुत्वा । २ । शकधूमं नक्षत्राणीत्येतेन[7] सूक्तेन[8] जुहुयात्[9] । ३ । सा तत्र प्रायश्चित्तिः । ४ । ॥ ८ ॥ ॥ १०० ॥

अथ यत्रैतदौषसी[10] नोदेति तत्र जुहुयात् । १ ।
उदेतु श्रीरुषसः कल्पयन्ती[11] पूल्यान्कृत्वा पलित एतु चारः ।
ऋतून्बिभ्रती बहुधा विरूपान्मह्यं भव्यं विदुषी कल्पयाति ॥
औषस्यै[12] स्वाहेति हुत्वा । २ । दिव्यो गन्धर्व इति मा-

---

[1] xvii. 1. — [2] The रोहित hymns (cf. AV. xix. 23. 23) are the hymns of the thirteenth book of the AV. (xiii. 1-4). — [3] Bü °प्रवति. — [4] Bü त्सरंतमै°. — [5] Thus according to a suggestion of Böhtlingk. The reading इह नात्मा has also been thought of: Ch K Bü P B इहानात्या; E इहनात्या; Ku इहानान्या. Weber, Omina und Portenta, p. 362, emends to इहागत्य and suggests, ibid. note 2, इहानागत्य as another possibility. The last emendation would however render the pāda hypercatalectic. — [6] Thus emended; MSS. नश्यतु. — [7] vi. 128. 1. — [8] E सूत्रेण. — [9] Ku Bü E here insert the words रोहितैरुपतिष्ठते; Ch has them on the margin, apparently erased by a second hand; they seem to be borrowed from the preceding kaṇḍikā, sūtra 4. — [10] So Ku; Ch E °दोषसि; K Bü Bi P °दोषसी; cf. Kāuç. 93. 9. — [11] K P B कल्पयन्ति. — [12] So Ku; the rest औषस्यै. —

तृनामभिर्जुहुयात्[1] । ३ । सा तत्र प्रायश्चित्तिः । ४ ।
॥ ९ ॥ ॥ १०१ ॥

अथ यत्रैतत्समा दारुणा भवति[2] तत्र जुहुयात् । १ ।
या समा रुशत्येति प्राजापत्यान्वि धूनुते[3] ।
तृप्तिं यां देवता[4] विदुस्तां त्वा सं कल्पयामसि ॥
व्याधकस्य मातरं हिरण्यकुक्षीं[5] हरिणीम् ।
तां त्वा सं कल्पयामसि ॥

यत्ते घोरं यत्ते विषं तद्विषत्सु नि दध्मस्यमुष्मिन्निति[6] ब्रूयात् । २ । शिवेनास्माकं समे[7] शान्त्या सहायुषा[8] समायै स्वाहेति हुत्वा । ३ । समास्त्वाग्न[9] इत्येतेन सूक्तेन जुहुयात् । ४ । सा तत्र प्रायश्चित्तिः । ५ । ॥ १० ॥ ॥ १०२ ॥

अथ यत्रैतदुपतारकाः शङ्कन्ते तत्र जुहुयात् । १ ।
रेवतीः शुभ्रा इषिरा मदन्तीस्त्वचो धूममनु ताः सं विशन्तु ।
परेणापः पृथिवीं सं विशन्त्वाप[10] इमां लोकाननु- संचरन्तु[11] ॥

अद्भ्यः स्वाहेति हुत्वा । २ । समुत्पतन्तु प्र नभस्वेति[12] वर्षीर्जुहुयात्[13] ।३। सा तत्र प्रायश्चित्तिः ।४। ॥ ११ ॥ ॥ १०३ ॥

---

[1] ii. 2. 1. For the मातृनामानि (सूक्तानि) and the मातृगण of the gaṇamala see Kauç. 8. 24, and note. — [2] K P Bi भवंति. — [3] So emended; Ku प्राजापत्यं: the rest °पत्यां. — [4] Ku Bü देवतां. — [5] Thus the MSS.; Weber, Omina und Portenta, p. 365, reads °कुक्षिं. — [6] Ch K Bü दधास्य°. — [7] E शमे; Weber, ibid., emends to सा मे. — [8] K P समायुषा. — [9] ii. 6. 1. — [10] K विशत्वाप. — [11] So K P; the rest °चरंत्य(द्भ्यः). — [12] iv. 15. 1; vii. 18. 1. — [13] So K Bi P Bü; E वर्षों; Ku वर्ष्या; Ch वर्षों. —

अथ यत्रैतद्ब्राह्मणा आयुधिनो भवन्ति तत्र जुहुयात् । १ ।

य[1] आसुरा[2] मनुष्या[3] आत्तधन्वः[4] पुरुषमुखाश्वरानिह[5] ।
देवा वयं मनुष्यास्ते देवाः प्र विशामसि[6] ॥
इन्द्रो नो अस्तु पुरोगवः स नो रक्षतु सर्वत ।

इन्द्राय स्वाहेति हुत्वा । २ । मा नो विदन्नमो देववधेभ्य[7] इत्येताभ्यां सूक्ताभ्यां जुहुयात् । ३ । सा तत्र प्रायश्चित्तिः । ४ । ॥ १२ ॥ ॥ १०४ ॥

अथ यत्रैतद्दैवतानि[8] नृत्यन्ति च्योतन्ति हसन्ति गायन्ति वान्यानि[9] वा[10] रूपाणि कुर्वन्ति[11] य आसुरा[12] मनुष्या मा

---

sū. 1. अथ निर्ऋतिकर्मणां विधिं वक्ष्यामः। आ पुष्टिकर्मभ्यो यावत् (sū. 19) . . . — sū. 11. प्रदक्षिणं भूत्वा निर्ऋतिदिशमभिमुखो भूत्वा ये क्षिषप्ता इति सूक्तेनाज्यं सकृज्जुहोति· — sū. 12. अग्नौ छत्रोपानहौ जुहोति· — sū. 14. . . . धानाः शर्करामिश्रान्सकृज्जुहोति (!). — sū. 15. सह पिटकेन तृतीयामाहुतिं जुहोति· — sū. 16. काकजङ्घायां लोहकंटकं बद्धा कंटके पुरोडाशं बध्नाति तथा निर्ऋत्यभिमुखो भूत्वा प्र पतेत इत्यृचा काकं विसर्जयति· — sū. 17. नीलं वस्त्रमधः परिधत्ते रक्तवर्णमुपरि आच्छाद्य शुक्लवस्त्रोष्णीषं कृत्वा या मा लक्ष्मीरित्यृचा लोहखण्डेन (Cod. °षंडेन) सह उष्णीषमुदके प्रक्षिपति· — sū. 18. एकशतं लक्ष्म(!) इत्यृचा रक्तवस्त्रं लोहखण्डेन सहाप्सु क्षिपति। एता एना इत्यृचा नीलं वासो लोहखण्डेन सहाप्सु क्षिपति . . . गृहे आगच्छति। ततः कर्माणि कुर्यात्पौष्टिकानि सांपदानि च। समाप्तानि निर्ऋतिकर्माणि· — sū. 19. पूर्वस्य चित्राकर्मादीनि पौष्टिकानि तान्युच्यन्त आ भैषज्येभ्यः कर्मभ्यो यावत् (Kāuç. 25. 1 fg.)। . . . एतत्कर्म चैत्र्यां पौर्णमास्यां कुर्यात्। अथवा चित्रानक्षत्रे कुर्यात्। नित्यं चैत्रीकर्म· — sū. 22. . . . परशुवन्मुखेनाश्नाति न हस्तेन. — sū. 26. Keç. describes the मन्थान्तानि कर्माणि by the rites detailed at 11. 11 fg. — sū. 27. अध्वानं गच्छता पुष्टिकर्माण्युच्यन्ते· — sūs. 28. 29. यदा गच्छति तदा एतत्कर्म। यदा ग्रामं गच्छति तदा एतत्कर्म कुर्यात्। समाप्तं प्रस्थानकर्म· — sūs. 30. 31. यथार्थं याचते तदा द्रव्यकाम एतत्कर्म कुर्यात्। अथवा निष्कामो ऽपि करोति· — sūs. 32–34. अथ समुद्रकर्म सर्वफलकर्म व्याख्यास्यामः। अभ्यातानान्तं कृत्वा ततश्चत्वारः पूलकाः पलाशसमिन्धनं चत्वारो दर्भपूलका व्यतिषङ्गेन जुहोति। एकं

समिद्भारकं द्वितीयं तस्योपरि दर्भभारकं। पुनरपि तथैव च अष्टौ उपर्युपरि कृत्वा ततो ब्रह्मजज्ञानेन सहस्रधारेणाज्यं जुहोति· — sūs. 37. 38. सान्त्रिकस्याग्नेः प्रणयनं। अथवा सत्त्रस्थाने (Cod. शत्रु°) एतत्कर्म करोति धनधान्यपुत्रलक्ष्मीयशोमेधाधर्मकामः। आयुर्बलप्रजासंपद्ग्रामकृपादि ... संपद्यते समुद्र इत्याचक्षते कर्मेति वचनात्· —

Kaṇḍikā 19.

sūs. 1. 2. अथ गवां रोगेषु गवां पुष्टिप्रजननेषु शान्तिरुच्यते।... बहुदुग्धा गावो भवन्ति ज्वरगण्डमालादिरोगे एतत्कर्म गर्भग्रहणार्थमेतत्कर्म भवति· — sū. 3. तडागमवरुध्य ततो गाः पाययति। समाप्तानि गवां पुष्टिकर्माणि· — sū. 4. सर्वार्थानि पुष्टिकर्माण्युच्यन्ते। द्वाभ्यां महानदीभ्यामुदकमाहृत्य सर्वत उपसिच्य· — sū. 7. अथ लक्ष्मीकर्म व्याख्यास्यामः।... यस्य गृहे लक्ष्मी नास्ति तस्य गृहात् ... — sū. 8. श्रीमतो गृहाद्गोमयमाहार्य ... — sū. 9. अथ समुद्रे इदं कर्म क्रियते पुष्टिकर्म। अलक्ष्मीविनाशकर्माण्युच्यन्ते। शापिटमालिप्याप्सु निविध्य तत्राग्निं प्रणीय। शेरभकेति सूक्तेन भक्तं संपात्याभिमंत्र्याश्नाति...पुष्ट्यर्थी· — sū. 10 (note 14). कंडितयवानां ... — sū. 14. गोष्ठकर्मणां विधिं वक्ष्यामः· — sū. 18. गोवाटे पांसुकूटं कृत्वा अर्धं दक्षिणेन निक्षिपति· — sū. 20. चतुर्थे उत्खाय ... अश्नाति· — sūs. 22. 23. अथ सर्वकाममणिशान्तिरुच्यते (Cod. सर्वकामा°) ... पालाशमणिं त्रिवासितं कृत्वा संपात्याभिमंत्र्य बध्नाति त्रयोदशादयस्तिस्रो दधिमधुनि वासयित्वा बध्नाति परिभाषावचनात् (Kāuç. 7. 19)। पलाशादिचतुर्षु मणिषु संदध्यते पुष्टिकामः।...तिलकमणिं ... वरणमणिं ... खदिरपलाशमणिं ... बध्नाति· — sū. 26. ...तलाशमणिं बध्नाति· — sū. 27. ...समाप्ता मणिबन्धनशान्तिः· — sū. 28. अथ अष्टकाकर्म... पुष्टिकामो वा नित्यं वा ... कुर्यात्। माघाष्टकायां पूर्वाह्णे यज्ञोपवीती शालानिवेशनं समूहयति। उपवत्स्यद्भक्तमशित्वा स्नातो ऽहतवसनः प्रयुङ्क्ते रात्रौ वशातन्त्रं पाकयज्ञविधानं धानादीनां श्रपणं कृत्वा। तत आज्यभागान्तं कृत्वा ततः पुरस्तादग्नेः प्रतीचीं गां धारयन्ति। पश्चादग्नेः प्राङ्मुख उपविश्य अन्वारभ्याय शान्त्युदकं करोति। पथमा ह व्युवास सेति सर्वेण सूक्तेन घृतं जुहोति। त्रिः सूक्तावृत्तिः। ततो मांसहोमे प्रथमा ह व्युवास सेति सर्वेण तिस्रः पश्चादाकृतोर्जुहोति· — sū. 29. ततः प्रथमा ह व्युवास सेति सूक्तेन सर्वेण स्थालीपाकं जुहोति· Then follows a passage corresponding to Kāuç. 138. 1 fg. —

Kaṇḍikā 20.

sū. 1. कृषिनिष्पत्तिकर्म वक्ष्यामः। क्षेत्रे गत्वा ... — sū. 4. हालिको अन्यांश्चतुरो वृषभान्युनक्ति षड्द्रवं हलमिति वचनात्· — sū. 5. ...लोहफालमभिमंत्र्य हले प्रतिकर्षति· — sū. 7. ... अपूपानभिमंत्र्य हले फालमुखे ददाति। ततः ... कर्ता हलेन कृषति· — sū. 8 (note 9). हालिकाय· — sū. 9. तिस्रः सीताः प्राचोर्हालिकः कृषति· — sūs. 14. 15. ...उदपात्रे निदधाति। तेनोदकेन हलं सर्वमनक्ति· — sūs. 16–19. यत्र सीता संपातिता तस्मात्स्थालात् मृत्तिकां पत्नी गृह्णाति हस्तेन। अतोऽन्यो मनुष्यः पृच्छति किमाहार्षीः। ततः पत्नी ब्रूते वित्तिं भूतिमिति· — sū. 20. मृत्तिकां निदधाति पत्नी· — sū. 21. ततो लोहफालं घृतेनाभ्यज्य तत्रैव क्षेत्रे निदधाति· — sū. 22. सीताशिरःसूत्रेषु ... — sū. 23. एकैकस्याः सीताया दक्षिणे चमसे रसान्प्रक्षिप्य मध्यमेषु विरूढं निदधाति पुरोडाशमुत्तरेषु निदधाति· — sū. 24. चमसोपरि दर्भाग्रान्निदधाति ततश्चमसान्पांसुना प्रच्छादयति मृत्तिकां ददाति तत्र। ततः प्रभाते अवश्यं तस्मिन् क्षेत्रे द्वितीयेऽहनि कर्षितव्यं। एतत्सर्वं एकं कर्म। कृषिभ्यः निष्पत्तिकर्म समाप्तं· — sū. 24. अथ वृषभलाभकर्म उच्यते... — sū. 25. .. आनडुहसांपदं कर्म समाप्तं· —

Kaṇḍikā 21.

sū. 1. अथ स्फातिकरणकर्म उच्यते· — sūs. 5. 6. यदायदा भक्तं राध्यते तदातदा अभिमंत्रयते। यदा दीयते कंडेन ... निष्पवने रंधने परीक्षणे (? Cod. °षणे) दाने च सर्वत्राभिमंत्रणं· — sū. 7. स्थिरधान्यमक्षयं भवति। समाप्तानि स्फातिकरणानि पुष्टिकर्माण्येव वर्तन्ते· — sū. 8. संध्याकाले· — sū. 9. यदा प्रथमं होममिच्छति तदा इदं कर्म करोति· — sū. 11. सूर्यस्य रश्मीनन्विति तिसृभिर्द्वादशनाम्न्यां (!) बध्नाति। इह वत्सां नि बध्नीम इति पादेन वत्सां बध्नाति। अयं घास इति पादेन घासं ददाति गोभ्यो वा वत्सेभ्यश्च (!) ...। समाप्ता गोशान्तिः· — sū. 12. वस्त्रसांपदानि (Cod. वत्स°) कर्माण्युच्यन्ते· — sū. 13. ... सूत्रेण परिवेष्य घृतेनाक्ता आदधाति· — sū. 14. ...इषीकाः तिस्रो मधुना चिकसेन(!) प्रलिप्ता आदधाति· — sūs. 15. 16. ज्येष्ठेन पुत्रेण सह भागविधिं वक्ष्यामः। उत पुत्र इत्यृचा गृहकाष्ठकाद्या अभिमंत्र्य ततो गृहं कारयेत्पुष्टिकामः पुत्रो वा सांपदं करोति पिता वा करोति· — sūs. 17. ... आर्द्रपाणि (!) भूत्वा शान्तशाखया ऋचं जपित्वा पुत्रं पिता पुत्रभागं प्रयच्छति· — sūs. 18. 19. प्रागभागमपाकृत्य पुत्रस्य गृहे गोधनं

बधाति। अग्निसंमुखं कुरुते। पुत्रस्य भागं क्रियते· — sū. 20. आग्नेया अमावास्या भविष्यति तस्यां... पुत्राश्च भ्रातारो ऽपि अनेनविधानेन भागं कुर्वन्ति। समाप्तं विभागकर्म· — sū. 21–23. ...त्वे क्रतुमित्यृचा सर्वत्र रसप्राशनं परिभाषा सर्वस्मिन्नथर्ववेदे रसकर्मसु पाकयज्ञविधानेन प्रजापतये चरुं अपयित्वा। सुष्व वर्ष्मन्निति ऋचा जुहोति... पुष्टिकामः। अमावास्यायामस्तमिते रात्रौ वल्मीके दर्भानास्तीर्य तत्र दीपं ददाति· —

Kaṇḍikā 22.

sū. 1. पुनः . . . पुष्टिकर्माण्युच्यन्ते . . . — sū. 1 (note 5). Keç. also reads भ्रष्टपिष्टं(सक्तुं)· — sū. 6. चैत्रकामस्य कर्म उच्यते। यत्र चैत्रं कामयते तस्मिन्चैत्रे इदं कर्म कुर्यात्· — sū. 7 . . . सप्तग्रामलाभकर्म· — sū. 10. अथ समृद्धिकर्म उच्यते· — sū. 10 (note 7). उदक्यां· — sū. 14. अथ समुद्रकर्म उच्यते। शत्रुदेशे गत्वा गार्हपत्यदक्षिणाग्न्याहवनीयेषु कर्म कुर्यात्। ततो गार्हपत्ये अभ्यातानान्तं कृत्वा ममाग्ने वर्च इति सारूपवत्सं गार्हपत्यशृतं गार्हपत्ये प्रथमं संपात्य ततो दक्षिणाग्नितन्त्रं (Cod. °ग्निं°) कृत्वा पूतीकैः स्तरणं। तत अभ्यातानान्तं कृत्वा तमेव सारूपवत्सं संपात्य तत आहवनीयभागस्तरणं। ततस्तमेव सारूपवत्सं संपात्यानेनैव सूक्तेन ततः पश्चात्सकृदभिमंत्रणं कृत्वा ततो ऽश्नाति। गार्हपत्यप्रभृति उत्तरतन्त्रं कुर्यात्। आशनं गार्हपत्यदेशे करोति। उत्तरतन्त्रं। व्रतग्रहणादि करोति। दक्षिणाग्न्याहवनीयगार्हपत्येषु यथाक्रमं व्रतग्रहणादि ...। गार्हपत्यस्य दर्भैः स्तरणं। दक्षिणाग्नेः पूतीकैः। आहवनीयस्य भाङ्गाभिः ...। समाप्तं समुद्रकर्म· —

Kaṇḍikā 23.

sū. 1. अथ नवे गृहे अग्निशालायां गोशालायां वा ग्रामे वा पुरे वा अन्यत्राभिततेषु वा कर्माणि ... पाषाणमये वा काष्ठमये वा तृणमये वा इष्टकामये वा सर्वत्र नवे वासिते इदं कर्म ... — sū. 6. तूष्णीमादौ वाग्यमनं कृतमिहैव स्तेति वाग्विसर्गः· — sū. 7. . . अग्नौ रविकां (!) औदुम्बरं दत्त्वा आज्यं जुहोति। धूमं नियच्छति। लेपं प्राश्नीयात्· — sū. 9. दायादेषु विभागकर्म वक्ष्यामः· — sū. 12. अथ चित्राकर्म चित्रानक्षत्रे उच्यते... संभारान्संपातयति। वृक्षशाखा। उदकं। करम्बकं। औदुम्बरशकलं। ताम्रक्षुरिका· — sū. 14. . . . वत्सकर्णौ छिनत्ति· — sū. 15. . . . कर्णलोहितं (emend कर्माभ्यां in Dārila's comment to कर्णाभ्यां) रसमिश्रितं ... अश्नापयति (!) पुष्टिकामः· — sū. 17. अथ कृषिकर्म उच्यते· —

Kaṇḍikā 24.

sūs. 1. 2. बीजवापनं कर्म करोति ... केदारे वा क्षेत्रे निवपति। त्रीन्मुष्टीन्बीजस्य। ततः पांसुभिराच्छादयति· — sū. 3-6. उच्चस्थाने गत्वा ततो अभ्यातानान्तं कृत्वाभि त्यमिति चतुर्ऋचेन सूक्तेनोदपात्रं संपात्य तदुदपात्रं सोमरसमिश्रं सारूपवत्सं ओदनं संपात्याभिमन्त्र्याश्नाति। तत उत्तरतन्त्रं। प्राग्द्वारप्रत्यग्द्वारे मण्डपे एतत्कर्म। पश्चान्मण्डपमग्निना दहति· — sū. 7. ... एकवारप्रसूता गौर्गृष्टिः। गोदाममणिं ... बध्नाति पुष्ट्यर्थी· — sū. 8. ... अश्नाति पुष्ट्यर्थी· — sū. 9. ... इत्यृचा वपया वृषभस्येन्द्रं यजते वशाविधानेन (Kāuç. 44. 1 fg). — sū. 16. अथ प्रवत्स्यत एकाग्निकस्य इदं कर्म कथ्यते। इहैव स्तेति गृहं मानुष्यांश्चावेक्षते· — ṣū. 18. अथ प्रवेशो याजमानं (!) यदा आगच्छति तदा इदं कर्मोच्यते। मौनं कृत्वा समिधमादाय गृहं दृष्ट्वा ऊर्जं बिभ्रदिति षडर्चं सूक्तं जपति। वामेन हस्तेन समिधः कृत्वा दक्षिणेन शालावलीकं संस्तभ्य जपति ऊर्जं बिभ्रदिति। तत ... समिध आदधाति अग्नौ। सुमङ्गलीति (!) कल्पजेन स्थूणे गृह्णात्युपतिष्ठते। यद्वदामीत्यृचा वाग्विसर्गं करोति। गृहपत्न्यासाद उपविश्योदपात्रं निनयति तूष्णीं... दूर्वाग्राणि अञ्जुलिकायां (!) कृत्वा पूर्वापरमिति (the words दूर्वापरिमिति in Dārila are a corruption of this pratīka) षडर्चं सूक्तं (vii. 81) जपति। अमावास्यायां केचिच्चन्द्रमसं दृष्ट्वा जपं कुर्वन्ति पुष्टिकामाः. — sū. 19. अथ वृषोत्सर्गविधिं वक्ष्यामः। ... ऋषभं संपात्य विवाहवदग्निपरिणयनं कृत्वा सह वत्सतरीभिः विसर्जयति· — sū. 22. अत ... एकादशाहे वृषभं करोति तदा शान्त्युदकं कृत्वा ततो वृषोत्सर्गं करोति। वृषोत्सर्गः समाप्तः। वृषभपुच्छं गृहीत्वा देवपितृर्षिभ्यो ऽहं ददे ऋषभमुच्चारयति· — sūs. 24. 25. अथाग्रहायणीकर्म उच्यते। रात्रौ अभ्यातानान्तं कृत्वा त्रयश्चरवः अर्पयितव्याः। सत्यं बृहदित्यनुवाकेन पश्चादग्नेर्दर्भेषु खदायां भूमौ एकं चरुं सकृत्सर्वहुतं जुहोति· — sū. 31. सत्यं बृहदिति नवभिः शान्तिवेति दशम्या (xii. 1. 1—9 and 59) ... — sū. 36. सत्यं बृहदित्यनुवाकेन कृषिकर्म आयोजनं कर्म भवति· — sū. 37. यस्यां सदोहविर्धाने इति तिसृभिराज्यं जुहोति। तत उत्तरतन्त्रं। वरो म आगमिष्यतीति वरस्य प्रार्थितोऽभिलाषः उत्कृष्टपुत्रधनादि वा सर्वफलकामः. — sū. 38. ... उपतिष्ठते पृथिवीं पुष्टिकामः ... — sū. 39. निधिं बिभ्रतीति द्वाभ्यामुपतिष्ठते पृथिवीं मणिहिरण्यद्रव्यनिधिरत्नकामः. — sū. 41. वृष्टिकाले यस्यां कृष्णमिति नवोदकमभिमन्त्र्याचमनं करोति पुष्टिकामः। यस्यां कृष्णमित्यृचा नवोदकमभिमन्त्र्य स्नानं करोति पुष्टिकामः। नवो-

दकस्य कर्म समाप्तं. — sū. 45. सर्वे मन्त्राः पुष्टिकर्मसु पठिताः तृतीये ऽध्याये तेषामुपधानमुपस्थानं भवति ...। एते मन्त्राः पौष्टिकाः...पौष्टिकानां सर्वेषां मन्त्राणां हविरुपधानमुपस्थानं वा करोति विकल्पेन... — sū. 46. At the end of the adhyāya Keç. has the following: ततः श्लोकः।

पूर्वं निर्ऋतिकर्माणि सर्वपापापनुत्तये।
पौष्टिकानि ततः पश्चात्तृतीये संहिताविधौ॥

सप्तमी कण्डिका। इति कौशिकपद्धतौ तृतीयो ऽध्यायः. —

Adhyāya iv.

Kaṇḍikā 25.

sūs. 1—3. ..भेषजशान्तिर्भैषज्यशब्देनोच्यते। तत्र द्विविधा व्याधयः। आहारनिमित्ता अन्यजननपापनिमित्ताश्च। तत्राहारनिमित्तेषु चरकबाहडसुश्रुतेषु ... व्याध्युपशमनं भवति। अशुभनिमित्तेषु अथर्ववेदविहितेषु शान्तिकेषु व्याध्युपशमनं भवति। तथा चाग्रे वक्ष्यति। अनूक्तान्यप्रतिषिद्धानि (!) भैषज्यानामंहोलिङ्गाभिः (cf. Kāuç. 32. 26, 27) सर्वाणि कर्तव्यानि। उक्तान्यनूक्तानि (!) च कर्तव्यानि। बन्धनपायनादीनि च कार्याणि. — sū. 5. ..मुखवलीर्विमार्ष्टि अङ्गवलीश्च ... तरुणस्य यदि वलयस्तदा एतत्कर्म. — sū. 6. अथ ज्वरातिसारभैषज्यान्युच्यन्ते। ... मुञ्जपुष्पमणिं मुञ्जरज्ज्वा ... बध्नाति. — sū. 7. अतिसारे चातिमूत्रे च भैषज्यं ... — sū. 8 ... अपानं म्रक्षति. — sū. 9 ... अपानं शिश्नं वा नाडीं वा व्रणमुखं धमति अतिसारे। समाप्तानि ज्वरातिसारे अतिमूत्रे अङ्गनाडीप्रवाहे च भैषज्यानि. — sū. 10. अतिदुःखमूत्रे दुःखपुरीषकरणे च शमनभैषज्यान्युच्यन्ते। ... विद्मा शरस्येति द्वितीयेन हरीतकीं कर्पूरं वा संपात्याभिमंत्र्य बध्नाति. — sū. 12 ...विषितं ते वस्तिबिलमिति द्वाभ्यामृग्भ्यां मूषिकमृत्तिकोपरि उपविश्य जपति। ... तृणोपरि उपविश्याभिमन्त्रयते। ... वस्तिबिलमुखमभिमन्त्रयते। ... दारुतक्षशकलान्दधिमथितोपरि उपविश्य ततो ऽभिमन्त्रयते। ... जरत्प्रमन्दोपरि उपविश्याभिमन्त्रयते। ... दारुतक्षशकलानामुपरि उपविश्य व्याधितं ततो ऽभिमन्त्रयते मूत्रादिप्रतिबन्धे मूत्रं मुच्यतामिति (i. 3. 6—9) लिङ्गात्. — sū. 13. ...व्याधितमारोहयति. — sū. 14. ...व्याधितः शरं प्रक्षिपति. — sū. 15. ... शरशिश्नमभिमंत्र्य निष्फोटति (!) शिश्नं चर्मणो निःसारयतीत्यर्थः. — sū. 16. ... लोहशलाकामभिमंत्र्य शिश्ने प्रवेशयति। मूत्रप्रवाहं विदारयति. — sū. 17. विद्मा शरस्येति द्वितीयेन द्रुघ्नीं व्या-

धनुषं (! for ज्या°?) जघने शिश्नदेशे ऊर्ध्वं कृत्वा गोदोहन्यामुदकं कृत्वा यवानेकविंशतीन् (!) प्रक्षिप्य तेन उदकेन धनुषमुपरिफलं सिञ्चति सूक्तं जपित्वा। यथा उदकं शिश्ने पतति तथा कार्यं. — sū. 18. . . . यवगोधूमवल्लीपद्ममूलं पाविका एतानि क्वाथयित्वाभिमंत्र्य व्याधितं पाययति। समाप्तानि मूत्रप्रतिबन्धे दुःखमूत्रकरणे दुःखपुरीषकरणे . . . उदरपूर्णनिरोधकरणे च एतानि भैषज्यानि कार्याण्यारोग्यकामः (!). — sū. 20. अथ सर्वरोगभैषज्यान्युच्यन्ते। अभ्यातानान्तं कृत्वा अम्बयो यन्तीति...वायोः पूत इति . . . सूक्तेनाज्यं जुहोति। पलाशोदुम्बराद्याः समिध आदधाति सर्वव्याधिभैषज्यकामः. — sū. 21. अथ सोमभक्षणे भैषज्यमुच्यते।... सोमपवने सोमरसायने सोमपाने सोमाभिषवे च सोमविषये व्याधि (!) उत्पन्ने भैषज्यं समाप्तं. — sū. 22. अथ भूततन्त्रकर्माण्युच्यन्ते। भूतपिशाचशङ्कायां शान्तिरुच्यते।...कुक्कुसाञ्जुहोति।...तुषाञ्जुहोति।...बुसं जुहोति।... काष्ठशकलानि जुहोति (cf. Kāuç. 14. 15)। . . . अभ्याधेयानां धूमं नियच्छति। पिशाचगृहीतं पुरुषं धूमं पाययति। गृहे ग्रामे वा पत्तने क्षेत्रे वा देवगृहे वा यत्र क्वचित्पिशाचशङ्कास्ति तत्र होमं कृत्वा धूमं नियतं कुर्यादित्यर्थः। . . . पिशाचगृहीतं पुरुषमन्वाह . . . आक्रोशं ददाति. — sū. 23. कर्कटिकासमिध आदधाति।... मुसलकाष्ठशकलानि जुहोति। . . . खदिरसमिध आदधाति। . . . सर्षपसमिध आदधाति. — sū. 24. . . . खदिरवितस्तिमात्रशङ्कून्सप्त वा नव वा अभिमंत्र्य पश्चादग्नेर्निखनति। भूमिं समां करोति। अक्ष्यौ नि विध्य इत्यृचा निखननमन्त्रः पिशाचोपद्रवे. — sū. 26. . . . शर्करानभिमंत्र्य (!) शयनं वा अंतराणि वा गृहं वा . . . परिकिरेत् रक्षोभये. — sūs. 27—29. अमावास्यायामभ्यातानान्तं कृत्वा शरमयं बर्हिः स्तृणाति सर्षपेध्मानामुपसमाधानं। . . . सकृद्गृहीतान्यवसक्तूञ्जुहोति।... एतस्मिन्तन्त्रे (!) यवराशिमध्यात् मुष्टिमेकां गृहीत्वा उलूखलेन . . . अप्रदक्षिणं पिष्यते ततो व्याधितं संपात्य शणसूत्रेण जिह्वामार्जनं करोति। ततो ग्रहणमुक्तो (! for °मुक्तं?) न करोति शणेन (Cod. शणे) जिह्वामार्जने ततो न गतो ग्रह इति विजानीयात्. — sū. 30. अथ ग्रहाभिचार उच्यते इदं कर्म अवश्यमस्य ग्रहस्य वशीकरणमुच्यते. — sū. 30 (note 1, p. 70). ...पलाशपुटेन जुहोति. — sūs. 31—33. अथास्मिन्गृहे पिशाचो ऽस्ति वा न वास्ति संशये इदं कर्म उच्यते। . . . सर्षपेध्मं शरमयं बर्हिरभिमंत्र्य शालाया उपरि निदधाति। . . . ततः प्रभाते निरीक्षणं। विकृते पिशाचशङ्का। तदा उक्तो होमः वीरिणतूलमित्यादि (sū. 30). — sū. 34 (note 7) . . . पिशाचगृहीतं पुरुषं. — sūs. 35—36. रात्रिकर्माण्यु-

च्यन्ते। रचौ ... उल्मुके अभिमंत्र्य परस्परं संघृष्यति(!)। ततः प्रभाते स्वस्तिदा इति सूक्तेन (i. 21) प्रक्रामति पदानि ददाति। रक्षोभैषज्यं...समाप्तानि रात्रिकर्माणि. — sū. 37. अथ जलोदरभैषज्यमुच्यते। ... घटे दर्भपिञ्जूलीः प्रक्षिप्यैकविंशतिं गृहतृणानि च प्रक्षिप्य तं घटमभिमंत्र्य ततो व्याधितं सिञ्चति। ततो मार्जनं च। दर्भत्रयमेकत्र बद्धं पिञ्जूलीत्युच्यते। समाप्तं जलोदरभैषज्यं। अभ्यासेन कर्मसिद्धिः दिनेदिने कुर्यात्। जलोदरनाशनार्थं. —

Kaṇḍikā 26.

sū. 1. अथ वातपित्तश्लेष्माणि (!) भैषज्यान्युच्यन्ते। ... मांसमेदोऽभिमंत्र्य पाययति वातविकारे। ... मधु अभिमंत्र्य पाययति श्लेष्मविकारे। ... घृतमभिमंत्र्य पाययति वातपित्तसहविकारे। ... तैलमभिमंत्र्य पाययति वातश्लेष्मविकारे. — sūs. 2—6. अतिकासे शीर्षक्तिशिरोवेदनायां च कर्माण्युच्यन्ते। व्याधितं शिरो मौञ्जवेष्टितं कृत्वा वामेन हस्तेन वपनं जालसहितं (Cod. जाला°) गृहीत्वा जरायुज इति सूक्तेन लाजान्प्रकिरन्व्रजति व्याधिदेशं यावत्। तत्रैव मुञ्जप्रश्नं लाजा (!) च वपनानां प्रक्षेपः। वामेन हस्तेन वपनं मौञ्जइन्दुकं(!) च गृहीत्वा दक्षिणेन हस्तेन ज्यां द्रुघ्नीं गृहीत्वा ... व्याधितमग्रे कृत्वा यत्र व्याधिरुत्पन्ना तत्र स्थाने गत्वा जरायुज इति जपित्वा मौञ्जप्रश्नं वपनं क्षिपति व्याध्युत्पत्तिस्थाने। ज्यां तूष्णीं प्रक्षिपति। वातज्वरे कटिभङ्गे शिरोरोगे च वातगुल्मे वातविकारे च सर्वरोगे च भैषज्यं। धनुर्वाते अङ्गकम्पने वाते शरीरभङ्गे (Cod. शरीरे°) सर्ववातविकारे भैषज्यं. — sū. 8. ...घृतमभिमंत्र्य नासिका (!) नस्तं दद्यात्. — sū. 9. जरायुज इति सूक्तेन पञ्चपर्ववेणुदण्डं ललाटे संस्तभ्य जपति। शिरोरोगकटिभङ्गे वा वातगुल्मे विकारे च। लिङ्ग्युपतापः समाप्तः. — sū. 10. अथ लोहितं वहति शरीरमध्ये बहिश्च ... कर्माण्युच्यन्ते। पञ्चपर्ववेणुदण्डं रुधिरवहनस्थाने दत्वा अमूर्या इति सूक्तं जपति। ... रथ्यायाः पांसून्गृहीत्वाभिमंत्र्य रुधिरव्रणे विकिरति ... — sū. 11. ...अर्मकपालिकां ...बध्नाति। ... केदारमृत्तिका इति. — sū. 12. ... अर्मकपालिकामभिमंत्र्य पाययति। अर्मकपालिका शुष्कं (!) पङ्कमृत्तिका। स्त्रीरजसोऽतिप्रवर्तने भैषज्यं रुधिरप्रवाहे च. — sū. 14. अथ हृद्रोगे कामले चेत्यादिभैषज्यान्युच्यन्ते ... — sūs. 16. 17. अनु सूर्यमिति सूक्तेन गो रक्तचर्मच्छिद्रमणिं गोदुग्धे (Cod. °ग्ध) तं दत्वा संपात्याभिमंत्र्य बध्नाति दुग्धं च पाययति। अभ्यातानाद्युत्तरतन्त्रं। कामले हृद्रोगे चेत्यादिलिङ्ग्युपतापः —

sū. 18. हरिद्रौदनं व्याधितस्य भोजनं दत्वा तस्योच्छिष्टं चानुच्छिष्टं चैकत्र कृत्वा तेन च उद्वर्तनं कृत्वा शिरःप्रभृत्यारभ्य यावत्पादौ उद्वर्त्य ततो व्याधितं च खट्वायामुपवेश्य। खट्वाधस्तात् शुकां काष्ठमुसुकं(!) च गोपीतिलकां च एते त्रयः पक्षिणः सव्यजङ्घायां हरितसूत्रेण बद्ध्वा खट्वाधस्ताद्बध्नाति . . . अपस्मारे भैषज्यं। . . . उदकमभिमंत्र्य व्याधितं स्नापयति. — sū. 19. . . . मन्थमभिमंत्र्य प्रपाद्य प्रयच्छति भक्षार्थं। सर्वत्र गृहद्वारे अग्रे व्याधितं कृत्वा तमग्रे प्रवेश्य स्वयं प्रविश्य ततो भक्तमभिमंत्र्य व्याधिताय प्रयच्छति । सर्वत्र यत्रयत्र प्रयच्छतिशब्दः तत्रतत्रैवं बोद्धव्यं; cf. Kāuç. 7. 18. — sū. 20. अनु सूर्यमिति सूक्तेन शुष्कं चन्दनमभिमन्त्रयेत् । काष्ठशुष्कचन्दनमभिमन्त्रयेत्(!) . . गोपीतिलकां . . . यस्मिन्कस्मिंश्च दृष्ट्वा वदन्तीं तत्राभिमन्त्रयते व्याधितः. — sū. 21. . . . वृषभहृदयलोमभिः सुवर्णवेष्टितं मणिं कृत्वा संपात्याभिमंत्र्य व्याधिताय बध्नाति।...समाप्तानि अपस्मारविस्मयहृद्रोगकामलकरोहिणकानि (!) भैषज्यानि. — sū. 22. अथ श्वेतकुष्ठभैषज्यान्युच्यन्ते। श्वेतकुष्ठं गोमयेन प्रघृष्य यावल्लोहितं दृष्ट्वा... भृङ्गराजहरिद्राभ्यां इंद्रवारुणी नीलिका पुष्पा एताः पञ्च पिष्ट्वाभिमंत्र्य कुष्ठं प्रलिम्पति. — sū. 23. पलितानि छित्वा घृष्ट्वा अवलिम्पति. — sū. 24. अथ मारुतान्युच्यन्ते ।. Then follow the rites described at Kāuç. 41. 1–7, but with the substitution of the pratīkas i. 23. 1; 24. 1, instead of iv. 15. 1; vii. 18. 1. The entire performance winds up with the following: समाप्तानि कुष्ठभैषज्यानि श्वेतपलितनाशनं दुर्भिन्ननाशनं च. — sū. 25. अथ ज्वरभैषज्यमुच्यते। नित्यज्वरे वेलाज्वरे सततज्वरे एकान्तरितज्वरे चातुर्थिकज्वरे च ऋतुज्वरे च . . . — sū. 26. अथोद्वेगविनाशभैषज्यान्युच्यन्ते . . . — sū. 28. उप प्रागादिति सूक्तेन उल्मुकद्वयमभिमंत्र्य घृषीयत (!)। रात्रौ उषाकाले एतत्कर्म। ततः प्रभाते स्वस्तिदा इति सूक्तेन दक्षिणेन पादेन प्रक्रामतीति (Kāuç. 50. 1) स्वस्त्ययनं । वृद्धबालयुवस्त्रीपुरुषाणामकस्मादुद्वेगः प्रलापो वा भवेत्तदा एतत्कर्म कुर्यात्. — sū. 29. गन्धर्वराक्षसे आप्सरसे भूतग्रहादिषु भैषज्यान्युच्यन्ते... — sū. 30. चतुष्पथे व्याधितं कृत्वा तस्य शिरसि दर्भइंदुकं(!) कृत्वा तस्योपरि कपालमग्निपूर्णं प्रज्वालितं कृत्वा ततः प्रज्वालिताग्नौ . . . घृताक्ताः सर्वौषधीर्जुहोति. — sū. 31. व्याधितस्य वल्लणिकां(!) सर्वौषधिसहितां हस्तेन कृत्वा नदीमुखसंमुखां प्रविश्य (!) . . . नदीमध्ये वल्लणिकायां सर्वौषधिं घृताक्तां कृत्वा . . . ततः प्रक्रामति । उदकमध्ये सर्वौषधीर्जुहोति घृताक्ताः . . . पश्चात्स्थितो व्याधितं सिञ्चति. — sū. 32. ततो मृन्मये आमपात्रे होमशेषाः (!) सर्वौषधीः कृत्वा पक्षिणो यस्मिन्वृक्षे वसन्ति तत्र

त्रिपादे कृत्वा बध्नाति· — sūs. 33—40. अथ लौकिके शापे वैदिके शापे च स्त्रीणामाक्रोशे च पुरुषाणां च भैषज्यमुच्यते। सर्वस्मिन्संहिताविधिकर्मणि प्रधानकर्ममध्ये नवं घटं यत्प्रथममास्थापितमुत्तरतस्तेनोदकेन हिरण्यवर्णा इति सूक्तेन (i. 33) अभिमन्त्रितेन कारयिताभिषेचयेत्। सर्वत्र मेधाजननादिकर्मसु। ततः पश्चान्मणिबन्धनादिकर्म कुर्यात्। भैषज्येष्वभिषेकं न कुर्यात्। अभ्यातानान्तं कृत्वा अघद्विष्टा इति सूक्तेन यवमणिं संपात्याभिमंत्र्य पुनः सूक्तं जपित्वा बध्नाति। . . . लौकिके आक्रोशे वैदिके च ब्राह्मणस्य शापे चाक्रोशे च क्रूरचक्षुर्दृष्टिनिपाते च पिशाचरक्षादिषु भैषज्यं समाप्तं। अथ रक्षोग्रहे भैषज्यमुच्यते। आज्यतन्त्रं कृत्वा शं नो देवीति सूक्तेन पृश्निपर्णीमोषधिं पिष्ट्वा संपात्याभिमंत्र्य पुनः सूक्तं जपित्वा शरीरं प्रलिम्पति। अभ्यातानाद्युत्तरतन्त्रं। पापगृहीते च स्त्रीगर्भस्रावे च मृतापत्यायां च क्रव्यादगृहीते च पिशाचगृहीते च रक्षोभयभैषज्यं समाप्तं। अथ राजयक्ष्मादिभैषज्यमुच्यते। तन्त्रं कृत्वा वरणो वारयाता इति तृचेन वरणवृक्षमणिं . . . बध्नाति। . . . राजयक्ष्मादिपूगव्याधिषु श्वेतोदुम्बरकुष्ठाद्यष्टादशजातिषु ज्वरादिसर्वरोगेषु भैषज्यं समाप्तं। अथ वातविकारे भैषज्यमुच्यते। . . . पिप्पली क्षिप्तभेषजीमिति सूक्तेन पिप्पलद्रव्यं . . . आशयति। . . . वातविकारे धनुर्वातगुल्मे वातशूले क्षिप्तवातप्रदोषे कर्मकृते वाते उत्पन्ने सर्वव्याधिविकारे भैषज्यं समाप्तं। जलोदरे भैषज्यमुच्यते। . . . विद्रधस्य बलासस्येति तृचेन सूक्तेन व्याधितस्य मूर्ध्नि संपातानानयति। . . . सर्वव्याधिविसर्पणे प्रकोपे च बलासे च अन्त्रविसर्पणे च अक्षिविसर्पणे च . . . विद्रविसर्पणे(!) च हृदयामये च अज्ञातराजयक्ष्मणि च एतेषां भैषज्यं समाप्तं। . . . या बभ्रव इति सूक्तेन दशवृक्षशकलानि लाक्षाहिरण्येन वेष्टितं मणिं कृत्वा . . . बध्नाति। सर्वव्याधिभैषज्यं समाप्तं· — sū. 41. अथ क्षेत्रियव्याधिभैषज्यमुच्यते . . . क्षेत्रियो व्याधिर्लिङ्गी पितृपर्यागतः क्षेत्रियरोगः कुष्ठक्षयरोगः ग्रहणीदोषः सर्वशरीरविस्फोटकारः . . . — sū. 43. बभ्रोरर्जुन काण्डस्येत्यृचा अर्जुनकाष्ठं यवबुसं तिलपिञ्जिकां च एकत्र त्रीणि बद्ध्वा . . . बध्नाति। . . . आकृतिलोष्टं जीवकोषण्यां बद्ध्वा . . . बध्नाति। . . . वल्मीकमृत्तिकां . . . जीवकोषण्यां बद्ध्वा . . . बध्नाति। . . . जीवतः पशोश्चर्म जीवकोषणीत्युच्यते· —

Kaṇḍikā 27.

sūs. 3. 4. शालातृणानि गर्ते प्रक्षिप्य तस्मिन्गर्ते व्याधितमुपवेश्य तत आचामयति . . . अवसिञ्चति। . . . समाप्तं क्षेत्रियस्य भेषज्यं — sū. 5. अथ ब्रह्मग्रहे भेषज्यमुच्यते। . . . दशवृक्षेति सूक्तेन वृक्षविकल्पेन पला-

शादिदशवृक्षशकलानि गृहीत्वा लाक्षाहिरण्यवेष्टितं मणिं कृत्वा . . . बध्नाति· — sū. 6. दश ब्राह्मणा अथर्वाङ्गिरसः सुहृदो दशवृक्षेति सूक्तं जपन्तो व्याधितं शरीरमभिमृशन्ति· — sū. 7. पुनः क्षेत्रियभैषज्यान्युच्यन्ते . . . — sū. 9. उदकतृषाक्रान्तभैषज्यमुच्यते . . . — sū. 13. सवासिनाविति सूक्तेन मन्थघटमभिमंत्र्य पाययति व्याधिताव्याधितौ एकवस्त्रपरिहितौ सन्तौ· — sū. 14-17. अरुषीउदरगण्डुलकभैषज्यान्युच्यन्ते । इन्द्रस्य या महीति सूक्तेन कृष्णचणकान्घृतमिश्राञ्जुहोति । . . . गोवालचित्रितं शरसंध्यं परिवेष्य (cf. sū. 26) पाषाणेन चूर्णयति । . . . अग्नौ प्रतपति । ततः सूक्तान्ते ऽग्नौ आदधाति· — sū. 18. सव्ये हस्ते पांसून् (Cod. पाशं) कृत्वा दक्षिणेन विमृज्य दक्षिणामुखः स्थितः सूक्तं जपित्वा व्याधितस्योपरि किरति । अरुषीगण्डुलकानां भैषज्यं· — sū. 19. पांसून् (Cod. पाशं) मर्दयति हस्ताभ्यां व्याधितः· — sū. 20. . . . पलाशोदुम्बराद्याः समिध आदधाति । समाप्ता उदरकृमयः उदरगण्डुलकाश्च दृष्टकृमयश्च तेषां सर्वेषां भैषज्यं· — sū. 21. अथ गोकृमिभैषज्यान्युच्यन्ते . . . — sū. 26. उद्यन्नादित्य इति सूक्तेन घृतमिश्रान्कृष्णचणकाञ्जुहोति । . . . उद्यन्नादित्य इति सूक्तेन शरं गोवालवेष्टितं धारयति पाषाणेन etc., essentially as in the comment upon sūs. 14-20. — sūs. 27—28. सर्वव्याधिभैषज्यमुच्यते । आज्यतन्त्रं कृत्वा व्याधितं पर्वसु बद्ध्वा । अक्षीभ्यां त इति सूक्तेनोदपात्रं संपात्य ततः पुनः सूक्तं जपित्वावसिच्य व्याधितस्य पर्वग्रन्थिर्विमुच्यते । तत उत्तरतन्त्रं । समाप्तमक्षिरोगनासिकाकर्णशिरोजिह्वाग्रीवाराजयक्ष्मादिसर्वभैषज्यं· — sū. 29. हरिणस्येति सूक्तेन हरिणशृङ्गमणिं . . . बध्नाति । . . . हरिणशृङ्गेन सहोदकं . . . आचमयति । अथोषाकाले एतत्कर्म । हरिणचर्मशङ्कुधानं प्रज्वाल्योदकेन प्रक्षिप्य ततो . . . व्याधितमवसिञ्चति· — sū. 32. बालरोगगृहीते च मैथुनदोषभैषज्यान्युच्यन्ते । . . . पूतिगन्धमत्स्यसहितमोदनं . . . व्याधिताय प्रयच्छति भक्षणार्थं· — sū. 33. अरण्यतिलैः प्रज्वालितमुदपात्रमभिमंत्र्य प्रक्षिपति उषाकाले । अवसिञ्चति व्याधितं । मैथुनराजयक्ष्मणि भैषज्यं । . . . अरण्यशणेन . . . अरण्यगोमयेनावज्वालितमुदकमभिमंत्र्यावसिञ्चति उषाकाले । मार्जनाचमनं । . . . चित्यादिभिः (Cod. चित्याद्याः; cf. Kāuç. 8. 16) प्रज्वालितमुदकमभिमंत्र्य व्याधितमवसिञ्चति । मार्जनमाचमनं च । केचित्तिलशणादिचतुर्षु कर्मसु अरण्ये अवसेकमिच्छन्ति केचिद्गृहे अवसेकमिच्छन्ति . . . — sū. 34. अथ सर्वभैषज्यान्युच्यन्ते । . . . आ गाव इति दशभिः सूक्तैः (iv. 21—30) . . . मुञ्च शीर्षत्या इत्यृचा . . . घटमुदकपूर्णं संपात्याभिमंत्र्य व्याधितमवसिञ्चति . . . —

Kaṇḍikā 28.

sū. 1. स्कन्दविषभये भैषज्यान्युच्यन्ते। तत्रकदेवतायै नमस्कारं कृत्वा ततो ब्राह्मणो जज्ञे वारिदमिति सूक्ताभ्यां (iv. 6; iv. 7) उदकमभिमंत्र्य आचामयति . . . संप्रोक्षति विषदुष्टं· — sū. 2. . . . कृमुकवृक्षशकलं सहोदकमभिमंत्र्य तत आचामयति . . . अभ्युक्षयति . . . दूर्शावज्ज्वालितमुदकमभिमंत्र्य व्याधितमवसिञ्चति। . . . जीर्णहरिणचर्मावज्ज्वालितमुदके प्रक्षिप्य तमभिमंत्र्य ततो ऽवसिञ्चति। . . . मार्जनिकावकरतृणैरवज्ज्वालितमुदकमभिमंत्र्यावसिञ्चति· — sū. 3. . . . उदपात्रं संपात्य तत आप्लावयति विषदुष्टं। . . . विषलिप्ताभ्यां सक्तुमन्थमुपमथ्य ततो ऽभिमंत्र्य पाययति। . . . मदनफलानि प्रत्यृचमभिमंत्र्य प्रत्यृचं भक्षयति यथा च छर्दयति तथा च कर्तव्यं... — sū. 5. अथ शस्त्राद्यभिघाते रुधिरप्रवाहे भैषज्यान्युच्यन्ते। रोहण्यसीति सूक्तेन लाक्षोदकं क्वथितमभिमंत्र्य व्याधिदेशमवसिञ्चति। उषाकाले कर्म। अस्थिभङ्गे रुधिरप्रवाहे शस्त्राभिघातादौ भैषज्यं· — sū. 7. रक्षोभैषज्यमुच्यते। ...सदंपुष्पा संध्या प्रसिद्धा... — sū. 8. अथ सर्वव्याधिभैषज्यमुच्यते। भवाशर्वौ मन्वे वामिति सूक्तेन (iv. 28)... — sū. 9. सर्वभूतग्रहभैषज्यमुच्यते। . . . शमीपर्णचूर्णं शमीफले कृत्वाभिमंत्र्य सक्तुमध्ये ददाति भक्षार्थं रक्षोग्रहभैषज्यं· — sū. 10. . . . शमीचूर्णं शमीफले कृत्वाभिमंत्र्यालंकारे ददाति· — sū. 11. . . . शमीचूर्णं शमीफले कृत्वाभिमंत्र्य . . . व्याधितस्य शालां चूर्णैः परिकिरति· — sū. 12. अमतिगृहीते पुरुषे भैषज्यमुच्यते। . . . प्रज्ञानष्टे अज्ञानगृहीते अधर्मगृहीते त्रिवर्गे च विनष्टे द्यूतक्रीडाद्यतिप्रवृत्ते कुबुद्धिभैषज्यं· — sū. 13. राजयक्ष्मणि शिरोरोगे कुष्ठमये सर्वगात्रवेदनायां भैषज्यमुच्यते। यो गिरिष्वजायत इति सूक्तेन (v. 4) अश्वत्थो देवसदन इति द्वे (v. 4. 3, 4) गर्भो असीति तृचेन च (v. 25. 7-9) कुष्ठपिष्टं नवनीतमिश्रमभिमंत्र्य अप्रतिहारं व्याधितशरीरं प्रलिम्पति· — sū. 14. अथ शस्त्राभिघाते भैषज्यमुच्यते। रात्री मातेति सूक्तेन (v. 5) दुग्धलाक्षां क्वाथयित्वाभिमंत्र्य पाययति। शस्त्राभिघाते काष्ठाभिघाते पाषाणपतनाभिघाते अग्निदाघे सर्वशरीराभिघाते भैषज्यं समाप्तं· — sū. 15. सूतिका स्त्री अरिष्टकस्य भैषज्यान्युच्यन्ते। ब्रह्म जज्ञानमनाप्ता ये सहस्रधार एव त इति सूक्तेन (v. 6) भक्तमभिमंत्र्य ददाति भक्षणार्थं... — sū. 16. समाप्तं स्त्रीप्रसवदोषे सूतिकारोगे च भैषज्यं। अद्भुतदर्शने दोषनाशनभैषज्यं समाप्तं। सर्वाद्भुतेषु भक्तकर्म वा मन्थकर्म वा आचमनकर्म वा कुर्यात्। यानि चरकादिवैद्यकेषु अद्भुतानि पठ्यन्ते . . . तेषां सर्वेषामियं शान्तिभैषज्यं भवति . . . — sū. 17. अथ

सर्वव्याधिभैषज्यान्युच्यन्ते . . . — sū. 19. . . . द्वौ संपातौ भूमौ दत्त्वा ततः संपातितां भूमिमृत्तिकां गृह्य(!) तत उदपात्रे प्रक्षिप्य . . . व्याधितमाप्लावयति. —

Kaṇḍikā 29.

sū. 1. सर्वविषभैषज्यमुच्यते . . . — sū. 2—4. यत्ते अपोदकमित्यृचा (v. 13. 2) अप्रदक्षिणं परिक्रामति व्याधितं (!)। विषस्तम्भनभैषज्यं। . . . शिरसि शिखां बध्नाति। . . . श्वेतवस्त्रेण ग्रन्थिं बध्नाति। . . . शणस्तम्बे ग्रन्थिं बध्नाति। विषं न विसर्पति देशस्थितं भवति शरीरे न सर्पति विषस्तम्भनं भवति. — sū. 5. वृषा मे रव इत्यृचा (v. 13. 3) यस्मिन्स्थाने दृष्टं(!) तं स्थानं न पीडयति। ऋचं जपित्वा दंशाद्विषमन्यत्र गच्छति। विषशासने भैषज्यं. — sū. 6. चक्षुषा ते चक्षुरित्यृचा (v. 13. 4) आचार्यस्ततः प्रदक्षिणं परिक्रामति। अपेह्यरिरसीत्यृचं (vii. 88. 1) जपित्वा तृणानि प्रज्वाल्य ततो अह्यभिमुखं प्रक्षिपति. — sū. 7. अपेह्यरिरित्यृचं (vii. 88. 1) जपित्वा यतो दृष्टस्ततो (!) ज्वलिततृणानि क्षिपति दर्शनेन. — sū. 8. कैरात पृश्न इत्यृचा (v. 13. 5) उदकं गृहतृणावज्वालितमभिमंत्र्य व्याधितं पाययति प्रोक्षति च. — sū. 9. असितस्य तैमातस्येति (v. 13. 6) ऋचा आर्त्नीज्यापाशं संपात्याभिमंत्र्य बध्नाति. — sū. 10. आलिगी च विलिगी च उरुगूलाया इति च द्वाभ्यां (v. 13. 7, 8) मधुमक्षिकां मधुवृक्षमृत्तिकामभिमंत्र्य पाययति. — sū. 14. . . . अलाबुवृत्तं संपात्याभिमंत्र्य बध्नाति. — sū. 15. अथ दुष्टवक्तॄणां मुखस्तम्भमुच्यते। एका च मे यद्येकवृषो ऽसीति सूक्ताभ्यां (v. 15; v. 16) कलापपच्कूवां (!) मधूदकं च . . . एकत्र कृत्वा . . . व्याधितं पाययति। दुष्टवक्तामुखबन्धनभैषज्यं (!)। दुष्टपुरुषबन्धनं। परोक्षेण वदन्ति. — sū. 16. यद्येकवृष इति सूक्तेन (v. 16) भोजनमभिमंत्र्य भक्षयति। शापभैषज्यं . . . — sū. 17. यद्येकवृष इति सूक्तेन (v. 16) गृहद्वारमभिमंत्र्य ददाति अपिदधातीत्यर्थः. — sū. 18. अथ ज्वरभैषज्यमुच्यते . . . — sū. 19. अग्निस्तक्मानमिति सूक्तेन (v. 22. 1) ताम्रस्रुवेण मूर्ध्नि संपातानानयति। तत उत्तरतन्त्रं। एकस्मिन्तन्त्रे द्वावाग्निप्रणयनं. — sū. 20. अथ कृमिभैषज्यमुच्यते। . . . करीरमूलं संपात्याभिमंत्र्य बध्नाति। . . . गोवालैः करीरकाष्ठं वेष्टयित्वा सूक्तं जपित्वा पाषाणेन चूर्णयति। ततः सूक्तेनाग्नौ प्रतपति। ततः सूक्तेनादधाति. — sū. 24. . . . एकविंशत्युशीराणां मूलान्यभिमंत्र्य ततः पाषाणेन क्रुदयति(!) ततः सूक्तं जपित्वा उशीराण्यग्निना दहति. — sū. 26. . . . एकविंशत्युशीरपिञ्जूलीसहितं संपात्याभिमंत्र्य ततो व्याधितमाप्लावयति. — sū. 27.

अथ राक्षसभैषज्यमुच्यते। . . . वयोनिवेशनकाष्ठभृतं . . . — sū. 28. अथ सर्पविषभैषज्यमुच्यते . . . सर्पविषलिङ्गुपतापः. — sū. 30. श्लेष्मभैषज्यमुच्यते। उदकेन इदं क्रियते। अप्स्विदं कृत्वा तत्राग्निं प्रज्वाल्य। अस्थिस्रंसमिति सूक्तेन काष्ठशकलं संपात्य ततः शकलेन संपातवतावसिञ्चति व्याधितं . . . —

Kaṇḍikā 30.

sūs. 1. 2. अथाक्षिरोगे भैषज्यमुच्यते। . . . सर्षपकाण्डमणिं संपात्याभिमंत्र्य बध्नाति सर्षपतैलेन संपातवन्तं करोति। . . . आज्येन प्रधानं। अङ्गानि सर्षपतैलेनाभ्यज्य मणिं वा ततो बध्नाति . . . — sū. 3. . . . सर्षपशाकं सर्षपतैलेनाभ्यक्तमभिमंत्र्य व्याधिताय प्रयच्छति . . . — sū. 5. . . . मूलक्षीरं मुखेन प्राश्य ततोऽभिमंत्र्य अङ्क्ते अक्षिणी व्याधितस्य। मूलक्षीरं क्षीरपाटिकालग्नं तदुच्यते . . . — sū. 6. . . . मूलक्षीरं . . . भक्षयति. — sū. 7. पित्तज्वरभैषज्यमुच्यते। ताम्रस्रुवेण मूर्ध्नि संपातानानयति। . . . अस्मिन्तन्त्रे (!) दावाग्निप्रणयनं कुर्यात्. — sū. 8. अथ केशवृद्धिकरणे केशपतने भैषज्यमुच्यते। . . . वृक्षभूमिजातौषधीभिरवज्वालितमुदकमभिमंत्र्यावनक्षत्रे ऽवसिञ्चति. — sū. 9. . . . मधु . . . क्वाथयित्वा . . . विभीतकां क्वाथयित्वाभिमंत्र्य व्याधितमवसिञ्चति. — sū. 10. . . . दारुहरिद्राहरिद्रे (!) च द्वाभ्यां क्वाथयित्वाभिमंत्र्यावसिञ्चति. — sū. 11. अथ उदरतुण्डभैषज्यमुच्यते। कृष्णं नियानं सस्रुषीरिति सूक्ताभ्यां (vi. 22; vi. 23) चित्याद्योषध्या सहितमुदकमभिमंत्र्य ततो व्याधितमवसिञ्चति. — sū. 12. कृष्णं नियानं सस्रुषीरिति सूक्ताभ्यां (vi. 22; vi. 23) मरुतो यजते पाकयज्ञविधानेन यथा वरुणं (cf. Kāuç. 41. 3)। मारुतं क्षीरौदनं मारुतशृतं etc. as in Kāuç. 40. 7 |. Then follow the practices described at Kāuç. 41. 4–7, along with which are employed the pratīkas mentioned at the beginning of this rite. — sū. 13. अथ हृदयदाघे जलोदरे कामले च भैषज्यान्युच्यन्ते। . . . नद्युदकमनुलोममाहार्य तत्र वलोकतृणानि प्रक्षिप्य . . . व्याधितमवसिञ्चति . . . — sū. 14. अथ गण्डमालाभैषज्यमुच्यते। पञ्च च या इति सूक्तेन गोपाशूलिकां पञ्चाशत्यं (!) चाधिका अग्नौ प्रज्वाल्य अधस्तादयःसमिध आदधाति. — At this point there is a lacuna in the MS., involving the omission of the comment upon the remaining sūtras of this kaṇḍikā, as well as of the first three sūtras of the next one. Sūtra 16 is commented upon by Keçava at length in connection

with Kāuç. 31. 16. The comment upon sū. 14 of this kaṇḍikā is followed directly by the treatment of 31. 4. —

Kaṇḍikā 31.

sū. 4. ...पुरोडाशं...पयो etc. ...जुहोति। व्रीहीन् etc. ...आवपति। शान्तवृक्षसमिध आदधाति . .। रक्षोग्रहभैषज्यं. — sū. 5. अथ सर्वभैषज्यमुच्यते । वैश्वानरो न ऊतये ऋतावानं वैश्वानरमिति सूक्ताभ्यां (vi. 35; vi. 36) उदपात्रमभिमंत्र्य पाययति । . . . सक्तुमन्थं पाययति। . . . हरिद्रां सर्पिषि . . . पाययति। . . . अप्सु घृतमुदकमभिमंत्र्य पाययति. — sū. 6. अपवादे भैषज्यमुच्यते बहुभाषणमधर्मे च प्रवर्तने तस्यापवादः (!)। अभ्याताननान्तं कृत्वा अस्माद् द्यौरिति पूर्वेण (vi. 44. 1) स्वयंपतिते गोशृङ्गे उदकं कृत्वाभिमंत्र्याचमयति अभ्युक्षति च. — sū. 7. अथ उदरे वा हृदये वाङ्गे वा सर्वाङ्गे वा शूले उत्पन्ने भैषज्यमुच्यते। यां ते रुद्र इति सूक्तेन शूलमणिं संपात्याभिमंत्र्य बध्नाति। शूलं लोहमणिः पाषाणो वा दारिलरुद्रमतं। यां ते रुद्र इति व्याधितमभिमंत्रयते रुद्रभाष्यमतं। शूलभैषज्यं समाप्तं. — sū. 8. रक्षोग्रहे भैषज्यमुच्यते। उत्सूर्य इति चित्याद्योषधीभिः सहोदकघटमभिमंत्र्य व्याधितमवसिञ्चति । . . . शम्युदकेन सह . . . अवसिञ्चति । . . . शमीबिम्बमुदकसहितं . . . अवसिञ्चति। . . शीर्षपर्णीमुदके (!) दत्त्वा . . . अवसिञ्चति. — sū. 9. दुष्टगण्डविरिष्टभैषज्यमुच्यते। . . . तैलमभिमंत्र्य व्याधितं गण्डं संमार्ष्टि . . . — sū. 10. स्थूणायां निकर्षति घृष्यति व्रणं। रुधिरकृते दुष्टव्रणे दुष्टगण्डव्याधिभैषज्यं समाप्तं. — sū. 11. अक्षित- (!) व्रणभैषज्यमुच्यते । . . . गोमूत्रमभिमंत्र्य तेन व्रणमर्दयति । यस्य व्रणस्य मुखं नास्ति। अक्षतदुष्टव्रणे भैषज्यं. — sū. 15. . . . तृणरजस्य फेनमभिमंत्र्य व्रणं प्रलिम्पति। यस्य गण्डदुष्टस्य रुधिरं न च वहति तस्य। समाप्तमक्षतव्रणभैषज्यं. — sū. 16. गण्डमालाभैषज्यमुच्यते। ... शङ्खं घृष्ट्वाभिमंत्र्य गण्डमालां प्रलिम्पति। ...श्वानलालां कुर्कुटलालां (! for कुर्कुर°?)... प्रलिम्पति। . . . जलौकामभिमंत्र्य गण्डमालायां संसर्जयति रुधिरप्रवाहनार्थं। . . . गृहगोधिकामभिमंत्र्य गण्डमालायां संसर्जयति. — sū. 17. . . . सैन्धवलवणं चूर्णयित्वाभिमंत्र्य गण्डमालाया उपरि प्रकिरति। ततस्तस्योपरि निष्ठीवति मुखलालां प्रक्षिपति. — sū. 18. अथ पक्षिणोऽभिघाते भैषज्यमुच्यते। . . . श्वानपदस्थानमृत्तिकामभिमंत्र्य (Cod. °काभि°) पक्षाहतं (!) देशं प्रलिम्पति। पक्षहतभैषज्यं. — sū. 19. ...शुनो मक्षिकामभिमंत्र्याग्नौ प्रक्षिप्य ततो धूपयति व्याधिप्रदेशं । काकगृध्रकपो-

तक्षिनाद्दोनि पक्षिणाभिघाते (!) भैषज्यं समाप्तं. — sū. 20. अथ गण्ड-भैषज्यमुच्यते। ग्लौरितः प्र पतिष्यतीति (vi. 83. 3^c) अर्धर्चेन गोमूत्रमभिमंत्र्य गण्डमर्दयति।... प्रक्षालयति।... दन्तमलं... प्रलिम्पति।... तृणरजफेनं... प्रलिम्पति। समाप्तं गण्डभैषज्यं गण्डस्फोटिकां(!) इत्यर्थः — sū. 21. गर्दभाद्युरुगण्डभैषज्यमुच्यते (!)।... शान्त्युदकमभिमंत्र्य क्षतं प्रोक्षति।... आज्यं जुहोति। ततो मनसा संकल्पयति संपातान्ददाति। समाप्तं गर्दभदशजातिपिकादिक्षतगण्डभैषज्यं. — sū. 22. पापगृहीते जलोदरे च भैषज्यमुच्यते... — sū. 26. विषे उपविषे स्थावरजङ्गमे च भैषज्यमुच्यते। मक्षिकायां च भैषज्यं... — sū. 27. अथ कासे श्लेष्मपतने च भैषज्यमुच्यते।... भोजनमभिमंत्र्य ददाति।... सक्तुमन्थमभिमंत्र्य भक्षयति।... उपस्थानमादित्यस्य। उदकमभिमंत्र्याचमयति... — sū. 28. केशवृद्धिकरणे भैषज्यमुच्यते।... काचोमाचोफलमणिं... बध्नाति। जीवन्तीफलं बध्नाति।... भृङ्गराजं... बध्नाति।... केशदृढीकरणे केशजनने ह्रस्वकेशेषु वृद्धकरणभैषज्यं।... माषतिलादिकृष्णमन्नं भक्षयित्वा।... काचोमाचीफलं भृङ्गराजाभ्यां सहोदकमभिमंत्र्य रात्रौ ब्राह्मे मुहूर्ते ऽवसिञ्चति... —

Kaṇḍikā 32.

sū. 1. जम्भगृहीते भैषज्यमुच्यते।... स्तनमभिमंत्र्य बालकाय प्रयच्छति पानार्थं पतिः करोति कर्ता करोति।... दुःखनाशने भैषज्यं. — sū. 2. .. पाययति बालकं पिता वा माता वा पाययति तत्रोपरि दुह्यते अभ्यवदुग्धाः. — sū. 3. सर्वव्याधिभैषज्यमुच्यते... — sū. 5. वृश्चिकभैषज्यमुच्यते। तिरश्चिराजेरित्यष्टर्चेन (vii. 56. 1-8) ज्येष्ठीमधु (! for यष्टि°) पिष्ट्वाभिमंत्र्य पाययति — sū. 6. क्षेत्रमृत्तिकां जीवकोषणीचर्मवेष्टितां मणिं कृत्वा संपात्याभिमंत्र्य बध्नाति।... वृश्चिकमशकभैषज्यं। जीवतः पशुचर्म जीवकोषणीत्युच्यते. — sū. 7. ... यानियानि पायनान्युक्तानि तानि तिरश्चिराजेरित्यस्य सूक्तस्य भवन्ति। समाप्तं वृश्चिकपिपीलिकामशकदंशशाकोटजलूकाभैषज्यं(!). — sū. 8. अथ गण्डमालाभैषज्यमुच्यते। अपचितां लोहिनीनामिति द्वाभ्यां (vii. 74. 1—2) आ सुस्रस इत्येका (vii. 76. 1) एताभिस्तिसृभिर्वंशधनुषं कृष्णोर्णमयीं ज्यां कृत्वा चिचितेन शरेण गण्डमालां विध्यति प्रत्यृचं। त्रयः शरा (Cod. शिरा) भवन्ति. — sū. 9. या ग्रैव्या अपचित इति चतुर्थ्या ऋचा चतुर्थेन शरेण गण्डमालामभिनिधाय विध्यति. — sū. 10. ... कृष्णोर्णज्यावज्वालितोदकमभिमंत्र्य उषाकाले... अवसिञ्चति व्याधितं. — sū. 11. अथ राजय-

त्त्मभैषज्यमुच्यते । . . . तृचेन वीणातन्त्रीखण्डं संपात्याभिमंत्र्य बध्नाति· — sū. 12. वाद्यवीणा तस्यां गस्वरं विष्णोवाद्यवीणाकंठं (!) शिखंडं वीणातन्त्रीं बद्धा संपात्याभिमंत्र्य बध्नाति(?). — sū. 13. . . . स्वयंपतितवीरिणखण्डत्रयमेकत्र बद्धा संपात्याभिमंत्र्य बध्नाति· — sū. 14. जलोदरे वरुणगृहीते भैषज्यमुच्यते . . . — sū. 17. अथ ज्वरभैषज्यमुच्यते । नमो रूरायेति सूक्तद्वयेन (vii. 116; vii. 117) खट्वायां व्याधितं कृत्वा . . . बद्धा तत अधः खट्वायां व्याधितमुपवेश्य तत उदकमभिमंत्र्य व्याधितमवसिञ्चति । व्याधितं सिच्यमानं यथा मण्डूकमभि सिच्यते तथा कुर्यात् . . . — sū. 18. अथ सर्वभैषज्यमुच्यते । . . . अर्थसूक्तेन व्याधितं . . . अभिमृशति· — sū. 20. सर्वविषभैषज्यमुच्यते . . . — sū. 21. इन्द्रस्य प्रथम इत्यर्थसूक्तेन पैद्वं कीटकं तालिणीति लोकप्रसिद्धा तं (Cod. ते) पिष्ट्वाभिमंत्र्य नस्तं ददाति . . . दक्षिणनासिकापुटे· — sū. 22. अथ सर्पभये भैषज्यमुच्यते। . . . पैद्वं श्वेतवस्त्रवेष्टितमभिमंत्र्य यत्र सर्पभयं तत्र निखनति । पैद्वं हिरण्यवर्णसदृशः कोटश्चिचितो वासपैद्व इत्युच्यते . . . — sū. 24. आरे अभूदित्यृचान्तेन (! x. 4. 26) उल्मुकं प्रताप्याभिमंत्र्य ततो विषव्रणं दृष्ट्वा तत्संमुखं क्षिपति· — sū. 25. सर्पादर्शने यतो दृष्टस्ततः (! for दष्टस्ततो) प्रक्षिपत्युल्मुकं· — sū. 26. 27. अथानुक्तेषु कौशिकीयेषु सर्वव्याधिभैषज्येषु उक्तेषु चानुक्तेषु वापठितेषु तत्र सर्वभैषज्यमुच्यते। सर्वव्याधिभैषज्येषु मन्त्र ओषधिवनस्पतीनामनुक्तान्यप्रतिषिद्धानि भैषज्यानां अंहोलिङ्गाभिरुच्यते अंहोलिङ्गेन गणेन तानि कर्तव्यानि। आशानामाशापालेभ्य इत्येका etc. . . Here follows the list of pratīkas given as the अंहोलिङ्गगण by the gaṇamālā, Ath. Pariç. 34. 31, and quoted above, p. 89, note 2; then the text continues as follows: यानि च वै प्रतीकान्युच्यन्ते तान्यभिमन्त्रणेन सर्वव्याधिभैषज्यानि भवन्ति तान्युच्यन्ते। अक्षिभ्यां ते (ii. 33. 1) मुञ्चामि त्वा (i. 10. 4) उत देवाः (iv. 13. 1) आवतस्त (v. 30. 1) शीर्षक्तिं (ix. 8. 1) अंहोलिङ्गगणः । एतैः पञ्चप्रतीकैः . . . अन्यतमेनैकेनाभिमन्त्रणं कुर्यादित्यर्थः ।. Then follows a list of many of the commoner practices described in the preceding kaṇḍikās of this adhyāya, all of which, if performed while reciting the अंहोलिङ्गगण, are accounted efficacious against all diseases (सर्वव्याधिषु भैषज्यानि), as though they were performed with their own proper mantras (अथवा तैः सूक्तैः कर्तव्यानि । अथवा अंहोलिङ्गेन कर्तव्यानि). Then follows a catalogue of the diseases, many of which are treated in the preceding kaṇḍikās: the others are known in the later medical çāstras: उक्तव्याधीनां परि-

गणनं क्रियते . . . — sū. 28. अथ स्त्रीकर्मणो विधिं वक्ष्यामः। पुत्रकामायै स्त्रीकामायै स्त्रियै मृतापत्यायै रजोनाशे च शान्तिरुच्यते... —

Kaṇḍikā 33.

sū. 1. अथ प्रसवकाले इदं कर्म क्रियते यथा सुखेनैव प्रसवो भवतीत्यर्थः। अथ प्रसूतिकरणमुच्यते . . . — sū. 3. छिद्यमानासु मुञ्जेषीकासु गर्भसंस्थमरणं भवेत्। एकं कर्म· — sū. 5. शालाग्रन्थीन्विचृतति। द्वितीयं कर्म· — sū. 6. . . . कटिप्रदेशे बध्नाति . . . तृतीयं कर्म। केचिद्वषट् ते पूषन्निति सूक्तेन तैलमभिमंत्र्य प्रसवकाले अभ्यञ्जनं कुर्वन्ति· — sū. 8. अन्या वो अन्यामवेति (!) ओषध्यस्ता एवं एकत्र बध्नाति· — sū. 9. सर्वत्रौषधिखननमेतेन विधानेन कर्तव्यं। यत्र क्वचिदोषधिखननं तत्र सर्वत्रानेन विधानेन कर्तव्यं· — sū. 18. यदि तान्येकत्र भवन्ति तदा पुत्रो जायते। विज्ञानकर्मेदं· — sū. 20. यदि पुंनामधेयं स्पृशन्ति तदा कुमारी जायते· —

Kaṇḍikā 34.

sū. 1. अथ बन्ध्याप्रजननकरणमुच्यते... — sū. 2. ततो गृहे . . . पुरोडाशं प्रमन्दं कटुपा अलंकारान्संपात्य प्रयच्छति· — sū. 3. अथ मृतापत्यायाः स्त्रियस्तस्याः शान्तिरुच्यते। गर्भस्रावे जातमात्रे मृते वा स्त्रियां वा पुरुषे वा बाले वा युवाने (!) वा मृते इदं कर्म। त्रीणि मण्डपानि प्राग्द्वाराणि कृत्वा एकस्मिन्मण्डपे अभ्यातानान्तं कृत्वा . . . — sū. 4. पालाशपत्रे . . . — sū. 5. सीसेषूपरि स्त्रीमधिष्ठाप्य तेनोदपात्रेणाप्लावयति· — sū. 10. प्राकपश्चिमद्वारेषीकं (!) द्वार्योरुपरि बद्धा ततो निःसालामिति (ii. 14) सूक्तेनौदुम्बरीः समिध मृतापत्यायै आदधाति· — sū. 12. पतिलाभकर्माण्युच्यन्ते· — sū. 13. . . . आशयति कुमारी· — sū. 14. मृगाखरमृत्तिकाया वेदिं कृत्वा . . . हिरण्यालंकारान्गुग्गुलमौचं च यथोक्तान्संपात्य बन्धनं धूपनं प्रलेपनं कुर्यात्। ...पूर्वस्य संहिताविधिश्लोकः (cf. Ath. Paddh. and Keçava at Kāuç. 79. 9)।

आवपेत्सुरभिगन्धान् क्षीरे सर्पिस्तथोदके।
एतदायनमित्याहुरौचं तु मधुना सह ॥· —

sū. 15. . . . दक्षिणामुखी कुमारी प्रक्रामति· — sū. 16. . . . नावं संपात्य . . . भगस्य नावमित्यृचा उत्तारयति· — sū. 17. सप्तदानतंत्र्या वत्सान्वन्धयित्वा संपात्याभिमंत्र्य कुमारीं मोचयति। स्वयं न कर्ता। . . . यदि प्रदक्षिणं मोचयति तदा पतिलाभः· — sū. 18. . . . वृषभं . . .

विसर्जयति· — sū. 21. . . . आगमकृशरं . . . आशयति आज्यतन्त्रे भगिनीकं (!). — sū. 23. तत अर्यम्ण इत्यर्धर्चेन गृहाभ्यन्तरे कोणे बलिहरणं करोति· — sū. 24. यत आगच्छति काकस्तत आगच्छति वरः। समाप्तानि पतिलाभकर्माणि· —

Kaṇḍikā 35.

sū. 1. पुंसवनान्युच्यन्ते· — sū. 2. . . . नक्षत्रकल्पे उक्तानि पुंनक्षत्राणि· — sū. 3. . . . बाणं विवृहति। . . . शरमणिं संपात्याभिमंत्र्य बध्नाति· — sū. 4. . . . अध्यण्डे बृहतिपालाशविदार्यौं (!) वा एकत्र पिष्ट्वाभिमंत्र्य दक्षिणेनाङ्गुष्ठेन दक्षिणस्यां नासिकायां नस्तं ददाति। पुत्रार्थं कर्म पुंसवनमित्युच्यते· — sūs. 5. 6. Keçava's explanation is essentially the same as that of Ath. Paddh. and Daç. Kar. — sū. 7. के (!) लूनांश्च पलाशत्सरूनिर्वर्ते (!) निघृष्य . . . शिश्ने आधाय ततो मैथुनं करोति। समाप्तं गर्भाधानं· — sūs. 8. 9. पुनः पुंसवनमुच्यते। . . . मधुमन्थेऽग्निं निक्षिप्याभिमंत्र्य पाययति स्त्रीं· — sū. 10. . . शमीगर्भाश्वत्थस्याग्निं कृष्णोर्णया वेष्टयित्वा संपात्याभिमंत्र्य बध्नाति आज्यतन्त्रे। समाप्तं पुनः पुंसवनं. . — sū. 11. अथ गर्भाधानमुच्यते। . . . हस्तावर्तकं कर्णादिकं (? Cod. कणा°) संपात्याभिमंत्र्य बध्नाति आज्यतन्त्रे। समाप्तं गर्भाधानं· — sū. 12. अथ गर्भदृंहणमुच्यते। . . . अच्युता द्यौरिति (see Kāuç. 98 2, where the hymn is given in सकलपाठ) . . . — sū. 16. धाता दधात्विति चतसृभिर्गर्भिण्या (vii. 17. 1–4) उदरमभिमन्त्रयते। . . . वीरकर्म समाप्तं· — sū. 17. अथ प्रजननकर्म। प्रजापतिर्जनयतीति सूक्तेन (vii. 19) . . . — sū. 19. . . . उदकुलिजं संपातवन्तं कृत्वा गर्भिणीं परिहृत्य मध्ये निनयति। सुराकुलिजं etc. . . . भक्तं (!) सुरां प्रपां संपात्याभिमंत्र्य प्रजाकामायै प्रयच्छति। . . . समाप्तं प्रजागर्भकर्म बन्ध्यायाः. — sū. 20. अथ सीमन्तकर्म उच्यते। . . . श्वेतपीतसर्षपान्संपात्याभिमंत्र्य पुण्याहान्ते बध्नाति· — sū. 21. अथ स्त्रीवशीकरणमुच्यते। वृक्षत्वक्। तगरं। शरखण्डं (Cod. सराखंडं)। अञ्जनं। कुष्ठं। ज्येष्ठीमधु। वातसंभ्रमतृणानि। एतानि द्रव्याणि आज्येनालोड्य अङ्गं समालभेत् रुच्यर्थं· — sū. 22. . . . अङ्गुल्या तुदति भार्यामुदरे पृष्टौ रुच्यर्थौ· — sū. 23. . . एकविंशतिबदरीकण्टकानादधाति· — sū. 24. एकविंशतिदरीप्रान्तानि सूत्रेण वेष्टयित्वा . . . — sū. 26. खट्वां अधोमुखपट्टिकां गृहीत्वा . . . स्वपिति। त्रिरात्रं कर्म· — sū. 27 (note 4). . . . अर्दयं छेते· — sū. 28. . . . समाप्तानि संवननानि वशीकरणानि कामविषये स्त्रियामुत्साहो भवति . . . —

Kaṇḍikā 36.

sūs. 1. 2. स्वापनविघ्नशमनं (Cod. स्वापनं)। स्त्रीस्वापनकर्म उच्यते। ... अभ्यन्तरद्वारि शेषमुदकं न्युन्नति. — sū. 4. ... स्त्रियाः खट्वाया दक्षिणपादमभिमन्त्रयते। ... खट्वाया रज्जुमभिमन्त्रयते। ... स्त्रीस्वापनं पुरुषस्य विषये काम उत्पद्यते कामविषये स्त्रीस्वापनं समाप्तं। लज्जाप्रच्छादनं लज्जा भवतीत्यर्थः। स्वापनं सर्वेषां मानुषाणां निद्राकामानां। मैथुनमाचरतो विघ्नं न भवति ... — sūs. 5. 6. अथ पलायिन्याः स्त्रियाः बन्धनकर्म तन्त्रक्रमेण क्रियते। रज्जु(!) कल्पते तद्रज्जुवेष्टनमुच्यते। अस्माद् द्यौरस्मादिति द्वितीयेन सूक्तेन (vi. 77) रज्जुवेष्टनमभिमंत्र्य वंशाग्रे बद्धा मध्यमस्थूणे (Cod. स्थूरणे) बध्नाति. — sū. 7. ..शयनपादमभिमंत्र्य उत्पले बध्नाति. — sū. 9. ... अङ्कुशेन तिलाञ्जुहोति. — sū. 10. जायापत्योरक्रोधकरणमुच्यते ... — sū. 12. सौभाग्यकरणमुच्यते। ... शङ्खपुष्पीमूलमोषधिवत्खात्वा ... बध्नाति। ... सौवर्चलपुष्पमभिमंत्र्य यस्य सौभाग्यमिच्छति तस्य पुष्पमभिमंत्र्य तस्य शिरसि बद्धा ...। सौवर्चलं सूर्यवेलेति प्रसिद्धा. — sūs. 13. 14. दुष्टस्त्रीवशीकरणमुच्यते। रथजितामिति सूक्तैस्त्रिभिर्माषानभिमंत्र्य स्त्रियाः क्रमेषु वपति। ... चणकान् ... वपति। खट्वास्थाने वा गृहे शयनदेशे वा ... शरभृष्टीरादीप्ता अभिमंत्र्य प्रतिदिशमभ्यस्यति। एषु पतिप्रतिकृतिं कृत्वा ... हृदये विध्यति दार्भूषेण भाङ्गज्येन। ... समाप्तानि पतिद्वेषिणीकर्माणि। पुरुषो वा स्त्रीणां द्वेषं करोति। अनेन कर्मणा शान्तिर्भवति. — sū. 15. अथ स्त्रियो वा पुरुषस्य वा दौर्भाग्यकरणमुच्यते। ... दहनघातिता गौः अनुस्तरणीत्युच्यते। ईशानहता ज्वरहतेत्युच्यते। ... तत उलूखलदरणे त्रिशिले निखनति तत उलूखले ददाति। उपरि यस्य दौर्भाग्यं क्रियते तस्य एतानि गृह्णीयात्. — sū. 16. स्त्रीपुष्पमालां ... पिष्ट्वा अन्वाह. — sū. 17. ... कृष्णसूत्रेण वेष्टयित्वाभिमंत्र्य ... व्यत्यासं अश्मानं (Cod. आश्मनं) शालाया उपरि ददाति। व्यत्यासेन निखनति दौर्भाग्यकामः. — sū. 18. अथ तस्याः सौभाग्यकरणमुच्यते। यं ते भगं निचख्नुरिति ... शिला उत्खनति उत्पादयति। भगमस्या इत्यनेन सूक्तेन यत्कृतं तदनया विनश्यति। समाप्तं यस्या दौर्भाग्यं कृतं तस्याः सौभाग्यकरणं. — sū. 19. अथ सपत्नीजयकर्माण्युच्यन्ते ...। सपत्नीविद्वेषणं ... बाणपर्णी मामिका लोके प्रसिद्धा ... — sū. 22. अथ स्त्रीविषये काम उत्पन्ने कामविनाशकान्युच्यन्ते। ... यस्मिन्देशे काम उत्पन्नस्तत्स्थानं यावत् स्त्री वा पुरुषो वा ... व्रजति. — sū. 25. स्त्रीविषये ईर्ष्याविनाशकान्युच्यन्ते। ... ईर्ष्यालुं दृष्ट्वा जपति। ... सक्तुमन्थमभिमंत्र्य ईर्ष्या-

लुकाय ददाति . . . भक्तार्थं . . . — sū. 26. . . . ईर्ष्यालुकस्य कटिप्रदेशे . . . खल्वामभिमंत्र्य (!) धमति· — sū. 28. अथ मन्युविनाशकान्युच्यन्ते स्त्रीविषये पुरुषस्य। . . . मन्युमन्तं पुरुषं दृष्ट्वाश्मानमभिमंत्र्य हस्तेन गृह्णाति· — sū. 29. . . . अश्मानं भूमौ निदधाति· — sū. 31. . . . मन्युमतः पुरुषस्य छायायां धनुरभिमंत्र्य सज्जं करोति . . . — sū. 32. अथ सर्वविषये मन्युविनाशकान्युच्यन्ते । . . . दर्भमूलमोषधिवत्खात्वा संपात्याभिमंत्र्य बध्नाति मन्युके· — sū. 33. अवीरजननमुच्यते । अपुत्रजननमित्यर्थः । अग्ने जातानित्यृचा अश्वतरीमूत्रेण पाषाणं निघृष्य ततोऽभिमंत्र्य भक्तेन सह ददाति। . . . अलंकारं समालभते। विद्वेषणं परस्य . . . । अथ बन्ध्याकरणमुच्यते। प्रान्यानिति तृचेन अश्वतरीमूत्रेण etc. — sū. 34. . . . समाप्तानि विद्वेषणानि परस्त्रीबन्ध्याकरणानि· — sū. 35. जारोच्चाटनमुच्यते . . . — sū. 37. . . . पाषाणमभिमंत्र्य जारमैथुनस्थाने प्रक्षिपति उच्चाटनार्थं· — sū. 38. पुरुषस्य स्त्रिया सह परस्परं विद्वेषणकरणान्युच्यन्ते। . . . बाणापर्णीं लोहिताजाया द्रप्सेन संनीयाभिमंत्र्य शयनमुपरि किरति (cf. sū. 19)। . . . स्त्रीपुरुषस्य उभयरुचिविनाशकरणं· — sū. 39. अथ दौर्भाग्यकरणमुच्यते। . . . हृदयं मुखं वाभिमन्त्रयते परस्त्रियै· — Keçava ends the adhyāya as follows: समाप्तानि स्त्रीकर्मकरणानि। तत्र भद्रश्लोकः।

भैषज्यकर्माणि प्रोक्तानि सर्वव्याध्युपशान्तये।
स्त्रीकर्माणि ततः पश्चाच्चतुर्थः संहिताविधौ ॥· —

Adhyāya v.

Kaṇḍikā 37.

Introduction. अथ विज्ञानकर्मणां विधिं वक्ष्यामः। लाभालाभजयपराजयसुखदुःखोत्कर्षापकर्षसुभिक्षदुर्भिक्षक्षेमाक्षेमभयाभयरोगारोगाः। क्षसोऽस्तीति न वेति। धनाधनधर्माधर्म . . . मरणामरणं। धान्यं भविष्यति न वेति। क्षेत्रं भविष्यति न वेति। गृहे वासो भविष्यति न वेति। धान्यपुत्रपशुहिरण्यस्रग्वस्त्राणि च। विद्याशास्त्रादिलाभो भविष्यति न वेति। जीवितमरणे गमनागमने बलाबले। सदसद्योगाद्व्याधितस्य जीवितमरणाभ्यां। प्रसवे पुत्रयोगात् पुत्रे जाते धर्माधर्मसंयोगात् मित्रामित्रसंयोगात्। ग्रामोऽस्ति वा न वेति। पुरुषस्य विवाहोऽस्ति वा न वेति। संवत्सरे मासे वा भविष्यति सुभगा वा दुर्भगा वा। गृहं ग्रामादि भविष्यति न वा। आधानं भवेन्न वेति। इत्यादि मनसा वाचा वा संचिन्त्य तत्कर्म कुर्यात्· — sū. 1. . . . राध्यमानं क्षीरौदनमभिमंत्र्य तत

आसिञ्चेत् । मनसा चिन्तयेत् । वाचा चिन्तयेत् । ओदनं सृतं भवेदसृतं वा भवेत् । यदि यथाचिन्तितं भवति तदा तस्य कर्मसिद्धिर्भविष्यतीति जानीयात् ...। ...इध्ममुपसमाधायाभिमंत्र्य आयाचेत् उत्कुचनेनार्थः। ...दर्भस्तम्बमभिमंत्र्य आयाचेत् यत्र समं विषमं नानार्थसिद्धिः।...पूर्वेद्युः पाठामभिमंत्र्य आयाचेत्। पत्राणां पत्राणां संकोचनेनार्थसिद्धिः. — sū. 2. अम्बयो यन्तीति सूक्तेन संग्रामे पूर्वेद्युर्वेदिं कृत्वा अभिमंत्र्य द्वितीये ऽहनि समविषमेण भावेन सिद्धिः . . . — sū. 3. . . पञ्चग्रन्थिवेणुदण्डमभिमंत्र्य आयाच्यं समे धारयति। अभीष्टदिशि पतनेनार्थसिद्धिः।... इषुं संधायाभिमंत्र्यायाचेत् चिन्तितं (Cod. चिंतित) प्रक्षेपणेनार्थः।... कुम्भे उदकपूर्णे दुग्धं प्रक्षिप्यायाचेत् जनाधिक्येनार्थसिद्धिः यथा चिन्तितं तथा सिद्धिः । कमण्डलुमुदकपूर्णं दुग्धमाक्षिप्याभिमंत्र्यायाचेत् जनाधिक्येनार्थसिद्धिः।... दर्भस्तम्बमभिमंत्र्यायाचेत् । . . . काम्पीलशाखां मूर्ध्नि धारयित्वाभिमंत्र्यायाचेत् इष्टदिक्पतनेनार्थः । . . . युगमभिमंत्र्यायाचेत् । . . . धान्यमभिमंत्र्यायाचेदग्नौ प्रक्षिपेत् प्रदक्षिणज्वलनेनार्थः । . . . हस्तयोरङ्गुलिद्वयमभिमंत्र्यायाचेत् । अज्ञातस्य वेनस्तदिति सूक्तेन एकविंशत्या (!) शर्करा अभिमंत्र्यायाचेत् धनेनार्थः समविषमभावेन यथावतार्थः (!). — sū. 4. अथ नष्टद्रव्यपरीक्षणे क्रियमाणे इदं कर्म।... वेनस्तदिति सूक्तेन . . . — sū. 6. वेनस्तदिति सूक्तेनाहतेन वस्त्रेण वेष्टितं हलं संपात्याभिमंत्र्य येन हरितां ततो नष्टः। . . . अत्रा(!) कुम्भवत्कृत्वा संपात्य . . . येन हरितां ततो नष्टः । समाप्तं नष्टद्रव्यपरीक्षणे विज्ञानं — sū. 7. अथ कुमारीविज्ञानमुच्यते।... वेनस्तदिति सूक्तेन ... — sū. 11. वेनस्तदिति सूक्तेन कुमारीमुदकाञ्जलिं पूरयित्वाभिमंत्र्य ... — sū. 12. ...समाप्तं कुमारी (!) विवाहकाले विज्ञानं —

Kaṇḍikā 38.

Introduction. अथ नैमित्तिकान्युच्यन्ते — sū. 1. दुर्दिनविनाशकर्मणां विधिं वक्ष्यामः।... दुर्दिनमभिमुखमुपतिष्ठते सर्वत्र दुर्दिनविनाशकानि. — sū. 2. ...प्रत्यृचमुदकं प्रक्षिपति. — sū. 3. ...खड्गं गृहीत्वोपतिष्ठते अभिमुखः।...उल्मुकं गृहीत्वोपतिष्ठते सूर्यस्याभिमुखः।... लकुटं गृहीत्वोपतिष्ठते. — sū. 4. ...उन्मृजानो अर्कमुखो भूत्वोपतिष्ठते. — sū. 6. पटेरकसमिध (!) अर्कसमिध आदधाति स्थण्डिले. — sū. 7. ...खदां खात्वा खदां त्रिः परिक्रम्यार्कनिर्लुञ्चितं कृत्वा खदायां प्रक्षिपति सूक्तान्ते। ततः पांसुना खदां पूरयति।... वृष्टिनिवारणं समाप्तं. —

sū. 8. अशनिनिवारणं कर्म वक्ष्यामः। ... अशन्यभिमुखमुपतिष्ठते. — sū. 9. ... एतत्कर्म क्षेत्रे। अशनिनिवारणं।

अतिवृष्टिरनावृष्टिः शलभा मूषकाः शुकाः।
स्वचक्रं परचक्रं वा सप्तैता ईतयः स्मृताः॥. —

sū. 11. अवदीर्यमाणे ग्रामे वावसाने वाग्निशरणे वा सभायां (Cod. समथ्यां) वा गृहे वा प्राकारे वा...वातरक्षार्थं कर्म वक्ष्यामः. — sū. 12. पत्तने रक्षार्थान्युच्यन्ते. — sūs. 13–16. The rites described in these sūtras are valid for the दृंहणानि as well as the दृतिकर्माणि. Is दृतिकर्माणि at Kāuç. 38. 12 to be emended to दृढिकर्माणि? In describing the latter Keçava ends as follows: समाप्तानि दृढकर्माणि...गृहपत्तने ग्रामपत्तने कार्यदृढकरणे अवहरणरक्षार्थं. — sū. 17. विवादे जयकर्मणां विधिं व्याख्यास्यामः। ... ज्येष्ठोमधुमभिमंत्र्य (!) भक्षयति। ततः सभां प्रविशति अपराजितादिशात्। पर्षज्जयकर्म सभाजयकर्म समाप्तं. — sū. 18. विवादे जयकर्माण्युच्यन्ते। ... पाटामूलं मुखे प्रक्षिप्य तदनन्तरमपराजिताद्दिशादागच्छति. — sū. 19. पाटामूलं मुखे प्रक्षिप्यान्वाह. — sū. 20. ..पाटामूलं बध्नाति. — sū. 21. पाटापुष्पमालामभिमंत्र्य शिरसि धारयति।...पाटापालाशीः सप्तपलाशी (!) सप्तपर्णी (!) मालामभिमंत्र्य धारयति. — sū. 22. वृष्टिनिवारणं भक्षभोजने कर्म उच्यते।...भक्तमभिमंत्र्य भक्तं शाकादि (Cod. भक्त°) ततो भुञ्जीत। वृष्टिनिवारणं समाप्तं. — sū. 23. ब्रह्म जज्ञानमिति सूक्तेन प्रथमेन काण्डादिना सूक्तेन वेदं वा अनुवाकं वा सूक्तं वा कल्पं वा ब्राह्मणं वाध्ययनं कर्तुमिच्छति तदा-तदा सूक्तं जपित्वा ततः अध्ययनं कुर्यात्। कलहशमनं समाप्तं. — sū. 24. ब्रह्म जज्ञानमिति सूक्तं जपति विवादे जयार्थं. — sū. 25. ब्रह्म जज्ञानमिति सूक्तं जपित्वा मीमांसव्याकरणादिशास्त्रवादं करोति तदा जपित्वा करोति प्रतिवादिनं जयति. — sū. 26. विवादकर्म उच्यते। ... चाक्रिकस्य रज्जुमभिमंत्र्य धारयति हस्तेन ... इति विवादकर्म कर्तुर्वदने कलहो न भवति. — sū. 27. सभाजयकर्माण्युच्यन्ते। सभास्तम्भनं कर्म जयकर्म तदा सभासदधर्माधिकरणादि जायते...। क्षीरौदनं etc. भक्षयति. — sū. 29. यद्वदामीति ऋचं जपित्वा सभां वदेत्। ... निरीक्षते। ... अन्वाह। यद्वदति तत्र तथैव वदति यच्चक्षुषा पश्यति तद्वदन् विघातो न भवति. —

Kaṇḍikā 39.

sū. 1. ... तिलकमणिं संपात्याभिमंत्र्य पुण्याहान्ते बध्नाति। आत्मरक्षार्थमणिः। ... सर्वत्र प्रत्यभिचरणार्थी मणिं बध्नाति ... —

sūs. 5—12 ततः शान्त्युदकं करोति महाशान्तिधानं मातलीवर्जं कृत्वा दूष्या दूषिरसीति कृत्वा प्रतिहरणो गणः। ततो वास्तोष्पत्यमातृनामचातनशान्तिगणे (!) एते पञ्च गणाः (cf. Kāuç. 8. 23—9. 6) शान्त्युदकेन आवाप्यन्ते। ततो मातलीं कृत्वा शान्त्युदकभाजने चित्याद्या (cf. Kāuç. 8. 16) आदधाति। मन्त्रोक्तायां दर्भापामार्गसहदेवीआटरूषककाम्पीलशितीवारसदंपुष्पा एता मन्त्रोक्ता भाजने एता ओषधीः शान्त्युदके अवधाय ततः शान्त्युदकं करोति (Kāuç. 9. 8)। तेन शान्त्युदकेन प्रोक्षन्व्रजति... अतो रात्रौ इदं कर्म प्रमाणकं करोति। उपानहौ परिधाय उष्णीषं कृत्वा अग्रे भूत्वा कर्ता शान्त्युदकेन प्रोक्षति कृत्यास्थानं यावत् बालागमपात्रेषु कृत्यादिषु च सर्वेष्विदं कर्म भवति। अमित्रचक्षु (!) यदि कृत्या दुष्टा भवति ततो वक्ष्यमाणं कर्म करोति अथ न भवति तदा कुर्यात्। एवं बालागपात्रेषु कृत्यादिषु सर्वेष्विदं कर्म भवति। अमित्रचक्षुषा इत्यनेन मन्त्रेण कृत्यां (Cod. कृत्वा) निरीक्षते। स च निरीक्षते। कृतव्यधनि इत्यृचा कृत्यास्थानं अवेक्षते। कृतव्यधनि इत्यृचा कर्ता काण्डेन विध्यति आङ्गिरसकल्पविधानधनुषा। अथवा दर्भ्युषेण (!)... काण्डेन विध्यति. — sū. 15. मांसानि शकले निधाय कर्ता संदंशं गृहीत्वा चर्मणि बद्धा प्रैषकृत्परिक्रम्य बन्धान्मुञ्चति. — sū. 18. ... नवनीतेनाभ्यज्याक्षिणी वा अङ्क्ते. — sū. 20. ... अरण्ये गच्छन्ति. — sū. 27. ... वास्तोष्पत्यादयस्त्वारो गणा (! cf. under sūs. 5—12) उच्चैः पठन्ति. — sū. 28. कर्ता अभिचारकृतपुरुषस्य शान्त्युदकेन मर्माणि (Cod. क°) संप्रोक्षते। गार्हपत्यसभाआमपात्रकूपकुकुटइत्यादीनि (! cf. v. 31. 1—4) मर्माणि (Cod. क°) संप्रोक्षति. — sū. 29. कृत्यास्थानं कृष्णवृषभहलेन कर्षति. —

Kaṇḍikā 40.

sū. 1. अथ नदीप्रवाहविधिं वक्ष्यामः। नदीप्रवाहं खात्वा... प्रसिञ्चन्व्रजति... — sū. 2. ... काशमभिमंत्र्य तत्र खाते रोपयति। ... द्विविसेवालपर्णीमभिमंत्र्य (! for °शैवाल°?) रोपयति नदीप्रवाहे। ... वेधूकपाटरकं (! for °पटेरकं?) अभिमंत्र्य नदीमार्गे निखनति। ... वेतसशाखामभिमंत्र्य नदीप्रवाहने (!) निखनति. — sū. 6. ... उदकं ... मण्डूकस्योपरि निनयति. — sū. 7. पूर्वप्रवाहो न भवति अथ नवधा प्रवाहे इदं कर्म कुर्यात्। वरुणदेवतापाकयज्ञविधानेन आज्यभागान्तं कृत्वा यददः संप्रयतीरिति सूक्तेन त्रिर्विभज्य जुहोति। तत उत्तरतन्त्रं। कृष्णव्रीहिं कृष्णाया गोः पयः घृतं च वेतसकाष्ठासु च इन्धनं। वेतसपत्रैः स्तरणं पटेरकेण वा अस्मिन्तन्त्रे (!) सर्वं मारुतं कर्तव्यं। उदकप्रवाहे उदकप्रवाहभये नदीभये ग्रामे नगरे

वा। यत्र उदकनदीभयं भवति तत्र सर्वत्र वारुणो होमः कर्तव्यः — sū. 9. ... बलिं हरेत् ततः अति धन्वानीति द्वाभ्यां न भवति मन्त्रोदकं नदीप्रवाहे प्रसिञ्चन्व्रजति। समाप्तं नदीदूरगमनकर्म — sū. 10. यदि न वहति नदी तदा वक्ष्यमाणमिदं कर्म। यददः संप्रयतीरिति नदीं हन्ति। ...वेतसशाखामभिमंत्र्य नदीमवसिञ्चति। ...यदि दूरं गता पुनः निवर्तते तदा इदं कर्म एके आचार्याः। यददः संप्रयतीरित्यादि सर्वमेकं कर्म मन्यन्ते। अन्ये भिन्नानि कर्माणि मन्यन्ते। अन्ये प्रसिञ्चनकर्म हिरण्यमण्डूककर्म योगकर्म मन्थनकर्म पाणिकर्म एतेषां विकल्पं मन्यन्ते। समुच्चयो वा इति दारिलमतं समुच्चयः। समाप्तं अन्यप्रवाहे नदीकर्म — sūs. 11. 12. अथ अरणिसमारोपणकर्म। ... अरणिद्वयं प्रतापयति पाणी वा प्रतापयति। उत्थाय वा गृह्णाति। ततो ऽनेन विधानेन पथि गच्छतां दोषो न भवति — sū. 13. अथावरोहणमुच्यते ... — sūs. 14. 15. पुरुषस्य वीर्यकरणे विधिं वक्ष्यामः। कपिकच्छुमूलमोषधिवत्खात्वा ... सुरवालकमोषधिवत्खात्वा ... दुग्धे अर्पयित्वा उपविष्टं धनुरुत्सङ्गे कृत्वा ... दुग्धमभिमंत्र्य पाययति — sū. 16. Keçava divides this sūtra in his treatment, so as to join the words मयूखे मुसले वासीनो to the preceding practice, to wit: यां त्वेत्यृचा सुरवालकं दुग्धे क्वाथयति पीत्वा कीलके उपविश्य ... पिबति ... कपिकच्छुं ... मुसले उपविश्य ... पिबति। ... सूकरवालकं ... मुसले उपविश्य ... पिबति. Then a new practice is introduced with the words: शिश्नस्य स्थूलकरणमुच्यते, as follows: यथासित इति सूक्तेन एकशाखार्कमणिं संपात्याभिमंत्र्य अर्कसूत्रेण बध्नाति ... — sūs. 17. 18. यावदङ्गीनमित्यृचा कृष्णमृगचर्ममणिं ... बध्नाति। ... आ वृषायस्वेति सूक्तेन हरिणस्कन्धचर्ममणिं कृत्वा कृष्णवालेन बध्नाति। ...वीर्यकरणं उत्थापनं स्थूलकरणं च भवति रेतोनाशे च —

Kaṇḍikā 41.

sū. 1. अथ वृष्टिकर्मविधिं वक्ष्यामः ... — sūs. 2. 3. त्रयोदशे ऽहनि पाकयज्ञिकं तन्त्रं व्रतोपायनान्तं कृत्वा ततो देवस्य त्वा सवितुरित्यादि मरुद्भ्यो जुष्टं निर्वपामि मरुद्भ्यस्त्वा जुष्टं प्रोक्षामीति अनेन यजुषा तावत्समानं यावदाज्यभागौ ततः चोरौदनं जुहोति। समुत्पतन्त्विति सूक्तेन पञ्चभिर्ऋग्भिरेकामाहुतिं ततः पञ्चभिर्ऋग्भिर्द्वितीयां षड्भिस्तृतीयामाहुतिं जुहोति।ततः पार्वणाद्युत्तरतन्त्रं। पाकयज्ञिकं तन्त्रमाज्यभागान्तं कृत्वा ततः प्र नभस्वेति चीरौदनं एकामाहुतिं जुहोति। न घ्रंस्तताप्रेत्यृचा

(vii. 18. 2) द्वितीयामाहुतिं। युक्ताभ्यां तृतीयामाहुतिं। पार्वणाद्युत्तरतन्त्रं बर्हिर्होमे मरुतो गच्छतु हविः स्वाहेति। सर्वेषु वृष्टिकर्मसु कृष्णाया गोराज्यं कृष्णाया गोः पयः कृष्णा व्रीहिशालयः वेतसस्रुवः वैतसी समिदिन्धनं च. — sūs. 3. 4. ...काशदिविधुवकवेतसामिकत्र(!) कृत्वा . . . तत उदकमध्ये पात्रं अधोमुखं निनयति। ..उदके विप्लावयति. — sū. 6... कुक्कुरशिरमभिमंत्र्य उदके विप्लावयति। मेषशिरमभिमंत्र्य उदके प्रक्षिपति।... मानुषकेशजरदुपानहौ(!) वंशाग्रे प्रबध्य योधयति जपन्. — sū. 8. अर्थोत्थापने विघ्नशमनविधिं वक्ष्यामः।...अर्थकामोद्यमं यदा करोति तदा इदं करोति।... द्रव्यहस्त्यश्वरत्नहिरण्यधनधान्यादि एवंकामो यदोद्यमं वणिजादि करोति तदा इदं कर्म करोति। यस्मिन्नारम्भा गृहादि न सिध्यन्ति तदा इदं कर्म . . . — sū. 10. अथ द्यूतजयकर्म उच्यते . . . — sū. 11. उत्तराषाढनक्षत्रे संमिनोति (Cod. संभि°) पूरयति. — sū. 13. . . . त्रयोदश्यादयस्तिस्रो दधिमधुनि वासयित्वा (Kāuç. 7. 19) . . . अक्षान्वा कपर्दकान्वा . . . द्यूतं क्रीडां कुर्यात्. — sū. 14. अथार्थोत्थापनोद्यमकरविघ्नशमनकर्म उच्यते। . . . मरुतो यजते पाकयज्ञविधानेन यथा वरुणं मारुतं चोरौदनं मारुतशृतमित्यादि भवति (cf. sū. 3 fg. These performances as well as those following now are performed with each of the pratīkas mentioned in sū. 14)। एवमाद्या ओषधीः संपात्य अभिन्युब्जनं। विप्लावयति। श्वशिर एडकशिरः केशजरदुपानहौ युद्धउदपात्रकर्म (cf. sū. 6) एतानि अभिवर्षणानि कर्माणि भवन्ति एकैकस्य सूक्तस्य। एके आचार्या मारुतस्थाने मन्त्रोक्तदेवतायागं कुर्यात् यथा वरुणं। अथौषधिहोमसमानं वर्षकर्मणाम्. . .। उदकघटं संपात्याभिमंत्र्य तत आप्लावयति। . . . अवसिञ्चति (both performances are again prescribed with all the pratīkas of sū. 14) . . . विघ्नशमनकामः। समाप्तानि अभिवर्षणावसेचनानि कर्माणि. — sū. 15. वैश्वानरो रश्मिभिरिति सूक्तेन उदेहि वाजिन्निति विंशत्या ऋग्भिश्च (xiii. 1. 1—20) उद्यन्तमादित्यं स्नानं कृत्वोपतिष्ठते अर्थमुत्थापनकामः. — sū. 17. . . . वस्त्रं . . . ददाति। विद्रावणादिविषये शमनकामः। समाप्तानि विघ्नशमनकर्माणि. — sū. 18. अथ गोवत्सद्वेषोविरोधसांमनस्यमुच्यते. — sū. 19. . . . ततो वत्सं त्रिः परिभ्रामयित्वा . . . पानार्थं मुञ्चति. — sū. 20. . . . गवां वत्सेन सह विरोधि वत्सगोविरोधिसांमनस्यकर्म(!)।समाप्तं गोवत्सस्य विरोधि सांमनस्यं। अकरणे गौः पूर्वा विनश्यति अथ गोवत्सः . . . तदा राजा प्रजाः . . . — sū. 21. अश्वशान्तिविधिं वक्ष्यामः। . . . अश्वाः शान्तास्तेजस्विनो निरुपद्रवा वेगवन्त आरोग्या भवन्ति. —

Kaṇḍikā 42.

sū. 1. अथ प्रवासनद्रव्योत्थापनमुच्यते। ... प्रवासे गत्वा चौरभयं उदकभयं गमनविघ्नं न भवति। ... हविषामुपधानं कुर्यात्. — sū. 3. ... यदि यानेन याति तदा इदं कर्म. — sū. 4. वाणिजद्रव्यं वस्त्राश्वादि सर्वद्रव्यं... विक्रयार्थं नयति। यदा द्रव्यं गृह्णाति तदा इदं कर्म... — sū. 6. अथाभ्यागतपुरुषाणां सांमनस्यं क्रियते। यदा विशिष्टो गृहे आगच्छति तदा इदं मित्रीकर्म क्रियते। मित्रं त्वेषां दर्शने आगतानां। यदा गृहे आगच्छति तदा इदं कुर्यात् ... — sū. 7. ... हस्त्यादियानं संपात्याभिमंत्र्य तस्मिन्याने यस्य सांमनस्यं क्रियते... उपरि उपविशन्ति। सर्वे यानस्योपरि चटन्ति ततः पश्चिमदिशि ... गत्वा पुनर्गृहे आगच्छन्ति। ततः... ओदनमभिमंत्र्य सह भुञ्जन्ति मन्थं वा। समाप्तं सांमनस्यं। एकस्मिन्युद्धे क्रियमाणे सहागतस्य कर्म इदं कर्म अन्यस्य च साधारणमित्यर्थः। यो युद्धे साहाय्यत्वं करोति तस्येदं कर्म। प्रथमं पादौ प्रक्षाल्य ततः कर्म चेति। क्षत्रिययोरिदं कर्म मन्यन्ते केचित्. — sū. 8. अथ गृहे विरुद्धे सति सांमनस्यमुच्यते। कतारण्ये गत्वा समिधो गृहीत्वा तूष्णीं गृहमागत्य... गृहमनुष्याणां सांमनस्यं भवति कलहनिवारणं... — sū. 9. अथ मन्त्रब्राह्मणयोर्द्रव्यमिच्छति तस्येदं कर्म प्रतिगृहादि उच्यते।... वेदपाठेन शास्त्रपाठेन अर्थोत्थापनमिच्छन्निदं करोति। समाप्तं वेदेन अर्थोत्थापने विघ्नशमनं. — sū. 12—17. अथ परिमोचविधिं वक्ष्यामः। गोदानिकतन्त्रमाज्यभागान्तं कृत्वा ततः शान्त्युदकं कृत्वाभिमन्त्रयते। अपो दिव्या इति चतसृभिः। ततो ऽभ्यातानादि परिदानान्तं कृत्वा। केचित्परिदानान्ते ततो ऽभ्यातानं हुत्वा। तत इदावत्सरायेति कल्पजैश्चतसृभिर्ऋग्भिराज्यं जुहुयात्। ... समिध आदधाति। ... वेदव्रतं कल्पव्रतं मृगारव्रतं विषासहिव्रतं यमव्रतं शिरोव्रतं अङ्गिरोव्रतं इत्येवमादिषु (cf. Kāuç. 57. 32, note) ... इदावत्सरायेति व्रतविसर्जनं व्रतश्रावणं च करोति। ... यत्र क्वचिद्व्रतं वैदिकं लौकिकं च तत्र सर्वत्र व्रतादानं व्रतविसर्जनं च भवति विधानेन। शिरोव्रतादीनि नित्यानि ... कृच्छ्रचान्द्रायणादीनि काम्यानि स्मृतिपुराणशास्त्रवेदविहितानि ... तानि सर्वाणीत्येतेन विधानेन कर्तव्यानि. — sū. 18. परिमोचानन्तरं त्रिरात्रं स्नानव्रतं चरेत् ... — sū. 19. अथ पापलक्षणा स्त्री तस्याः शान्तिरुच्यते। ... स्त्रीमुखं प्रत्यृचं प्रक्षालयति तस्या मुखं हस्तयोर्मशकशिशुकशिरकौ (!) अस्थानतिलकं ह्रस्वकेशादिपापलक्षणं सामुद्रिके स्त्रीलक्षणं व्याख्यातं। ... स्त्रियं पापलक्षणामभिषिञ्चति दक्षिणात्केशादारभ्य यावदुत्तरपार्श्वं ततः पापलक्षणं विनश्यति. — sū. 22. अथ पापदर्शने शा-

न्तिरुच्यते ... दर्शनदोषो न भवति। ... पुरुषस्य भाग्यकाले हरिणा यान्ति प्रदक्षिणाः अप्रदक्षिणेषु हरिणेषु अयं जपः पक्षिषु च। ... श्वानरुदिते काकरुदिते काकमैथुनेषु पुरुषस्य मैथुनेषु श्येनमैथुनदर्शने नग्नस्त्रीदर्शने नग्नपुरुषस्य नपुंसकस्य दर्शने ... यत्र क्वचिदपशकुनाः पतिताः तत्र सर्वत्रायं जपः। शुचौ स्मृतौ पतिताः अद्रष्टव्यास्तेषां सर्वेषां दर्शने अद्भुतानां दर्शनेष्वयं जपः कर्तव्यः। लोके यद्विरुद्धं अन्वीक्ष्यं ... अयं जपः। अपशकुनजपः समाप्तः. — sū. 23. अथ पुरुषहवे अकार्यकरणेन विघ्नशमनकर्म उच्यते ... —

Kaṇḍikā 43.

sū. 1. पुनर्विघ्नशमनमुच्यते। ... पिशङ्गवर्णसूत्रे बद्धा ... अरलूमणिं संपात्याभिमंत्र्य बध्नाति। ... विस्कन्धविघ्नशमनो मणिः। स्पर्धमानस्य स्पर्धा विनश्यतीत्यर्थः। ... वेणुदण्डादीन्संपात्य ततः सूक्तेन विमृज्य धारयति ...। चित्रदण्डे ध्वजदण्डे चिह्नदण्डे ... लकुटादिदण्डं सर्वं संपात्य ... धारयति तस्य सर्पशृङ्गिदंष्ट्रादिविघ्नं न भवति। ...। आयुधं संपात्याभिमंत्र्य विमृज्य सूक्तेन धारयति। ... सर्वशस्त्रसंपातिते मायादिकं मायाजालयुद्धे निवारणं संग्रामे इन्द्रजालनिवारणं युद्धे विघ्नं न भवति शत्रुहवं निवारयति। शत्रवो गच्छन्ति। स्पर्धमानं शत्रुं जयति हवं विनाशयति. — sū. 2. ... विघ्नगृहीतं पुरुषं धूपयति ... यस्य आरम्भा न सिध्यन्ति. — sū. 3. अथ भूमिशुद्धिं गृहं करिष्यमाणस्तस्येदं करोति।. Then Keçava exhibits essentially the same text as the Ath. Paddh., ending with the following: अथवा नवे गृहे श्येनयागः कर्तव्यः विकल्प इति भाष्यकारः। प्रथमतो वा श्येनयागो नवे वा गृहे. — sū. 4. अथ गृहप्रवेश उच्यते। वास्तुसंस्कार उच्यते ... — sū. 5. ततः शान्त्युदकं करोति। मातलीं पूर्वं कृत्वा वास्तोष्पत्यादीनि चतुर्गणीं महाशान्तिं शान्त्युदके आवपते। ततो मातलीं कृत्वा ततः शान्त्युदकं समाप्यते (cf. Kāuç. 8. 23 fg.)। तेन भूमिं प्रोक्षयेत्. — sū. 7. .. अन्येषु स्थूणागर्तेषु पार्श्वे स्थितेषु प्रक्षिपति. — sū. 8. ... नीयमानां (!) शालामनुमंत्रयते. — sū. 11. ... दृढां कारयति शालाभूमिं. — sū. 13. .. द्वाभ्यां चरू जुहोति। केचिदस्मिन्तन्त्रे (!) यजूंषि यज्ञ इति etc., as at Kāuç. 23. 1 fg. — sū. 15. वृद्धस्त्रियो गीतमङ्गल्यादि कुर्वन्ति ब्राह्मणाः पुण्याहानि पठन्ति श्राद्धं च केचित्पश्चात्कुर्वन्ति। ... यत्र गृहं मण्डपं वा कुटीं वा चित्रशालां वा मठस्थानं वा ... देवगृहं वा अन्यं वा तृणमयं वा काष्ठमयं वा इष्टकामयं वा पाषाणमयं वा गृहादिकं करोति तत्रानेन विधानेन वास्तुयागः कर्तव्यः. — sū. 16. अथ क्रव्यादोपहतगृहे क्षेत्रे वान्यत्र गोष्ठे वा

यत्र क्वचित्तत्र शान्तिरुच्यते... क्रव्यादा प्रविष्टे गृहे कुमारा म्रियन्ते वत्सान् (!) वा किशोरान् (!) वा . . . धननाशो यत्र भवति तद्गृहं ग्रामं नगरं वा क्रव्यादोपहतं जानीयात् . . . — sū. 18. . . . पालाशसमिध आदधाति. — sū. 19. . . . कुमारवत्सगोमरणादि धनधान्यविनाशादि चिन्तितोद्वेगादि क्रव्यादचिह्नानि। क्रव्यादोपहतशान्तिः समाप्ता. — sū. 20. अथ क्रव्याच्छमनविधानमुच्यते । . . . लौकिके वाग्नौ गृहे वावसथ्ये वा शान्तिकपौष्टिकार्थं मन्थने वा यत्र वा क्रव्यादोपहतिर्दृश्यते तत्र सर्वत्र कुर्यात्. — sū. 21. अथ वशाशमनविधानमुच्यते। ये अग्नय इति दशर्चेन सूक्तेन वशामभिमंत्र्य ततो ब्राह्मणाय ददाति। यस्य गृहे वशा भवति जायते तद्गृहं दैवहतं विजानीयात्. —

Kaṇḍikā 44.

sū. 1. अथ वशाशमनविधानमुच्यते... — sū. 3. ... शान्त्युदकं करोति अन्वारब्धायै वशायै काष्ठेन तृणेन वा. — sū. 5. मातल्यन्तेन (xi. 6. 23) शान्त्युदकेनाचामयति च संप्रोक्षति च. — sū. 6. वशां कर्ता ऊर्ध्वस्थितः वास्तोष्पत्यादिचतुर्गणीं महाशान्तिं (cf. Kāuç. 8. 23. fg.) उच्चैस्तृतीयसवने जपति वशामभिमुखः स्थितः. — sū. 14. समस्येति (!) मन्त्रेण भूमौ कृत्वा तत उपरि वशां पातयति. — sū. 15. . . . निरुच्छ्वासं करोति मारयतीति. — sū. 17. यद्वशेत्यृचा कल्पजया आज्यं जुहोति. — sū. 19. . . . इति कर्ता ब्रूयात्. — sū. 28. शेषमुदकं पार्श्वदेशे निक्षिप्य ततोऽभ्यन्तरे प्रविश्य... — sū. 36. छेदनस्थानमभिघार्य. —

Kaṇḍikā 45.

sū. 3. अवदानानि पशोरेकादश गृह्णाति. — sū. 4. ततः स्विष्टकृदवदानानि गृह्णाति तानि त्रीणि दक्षिणो बाहुः वामजङ्घा च अन्त्रविभागं। एतानि त्रीणि भागानि. — sū. 6. ततो यद्दैवत्यः पशुस्तद्दैवत्यचरुः श्रपयितव्यः. — sū. 12. . . . वपाश्रपण्यौ द्वे सह जुहोति. — sū. 13. अथ पित्र्येषु काम्येषु विशेषः. . . — sū. 16. सम्राडसीति मन्त्रेणाज्यं जुहोति । सर्ववीरायेत्यादि चतस्र आहुतीर्जुहोति। . . . समाप्तं वशाशमनविधानं । दैवहतं तस्य गृहं यस्य गृहे वशा जायते तस्य धनादिनाशा भवति तस्माच्छान्तिः कर्तव्या. — sū. 17. अथ दुष्टे प्रतिग्रहे सौम्ये वा कृते याजने वा दक्षिणाप्रतिग्रहणे येन कर्मणा पापं विनश्यति तदुच्यते। . . . प्रतिग्रहं . . . प्रतिगृह्णाति। प्रतिग्रहदोषो न भवति . . . — sū. 18. सर्वाणि कर्माणि कृत्वा पुनर्मैत्विन्द्रियमित्यृचा कर्म समाप्य तत आत्मानमनुमन्त्रयते । सर्वकर्मसु भवति । इत्यात्मशान्तिः । संध्यावन्दने

आज्यतन्त्रे पाकतन्त्रे अस्मिन्कर्मणि नित्यनैमित्तिककाम्येषु पुनर्मैत्विन्द्रिय-मित्यृचा आत्महृदयमनुमन्त्रयते. — sū. 19. एतेन विधानेन पशवो व्याख्याताः...नित्यनैमित्तिककाम्याः...पैठीनसिना काम्याः पठिताः. —

Kaṇḍikā 46.

sū. 1. अथ अकृते पापे लोके पापवचनमुत्पद्यते तत्र शान्तिरुच्यते। ...सक्तुमन्थं ... भक्तमभिमंत्र्य ददाति। प्रथममग्रे कृत्वा अभ्याख्यातं गृहे प्रवेश्य कर्ता पश्चात्प्रविशति. — sū. 2. ...द्रुघणमणिं संपात्याभिमंत्र्य बध्नाति. — sū. 3. ...पालाशकाष्ठमणिं द्रुघणप्रतिरूपं कृत्वा ... अभिशस्ते बध्नाति। कृष्णलोहमणिं ... ताम्रमयद्रुघणप्रतिरूपमणिं ...हिरण्यमणिं द्रुघणप्रतिरूपं... बध्नाति। ... सर्वत्र कौशिके कर्मणां विकल्पः। एकस्मिन्विषये यत्र बहूनि कर्माणि पठितानि तत्रैकं कुर्यात्सर्वाणि वा तन्त्रविकल्पः. — sū. 4. अथ यागे क्रियमाणे येन कर्मणा विघ्नशमनं भवति तदुच्यते। ...ऋत्विजो यजमानश्चाशयन्ति(!) अविघ्नेन यज्ञसिद्धिर्भवति. — sū. 5. यागसमाप्तौ विघ्नशमनमुच्यते। सोमदेवत्यं चरुं ... जुहोति. — sū. 6. अथ धनधान्यादिप्रतिग्रहादियाचनामिच्छन्निदं कृत्वा याचितविघातो न भवति। ...याचितं न प्रतिषेधयति।... सारूपवत्सं पायसं संपात्याभिमंत्र्याश्नाति. — sū. 7. अथ कपोते उलूके वा गृहं प्रविष्टे अन्यत्राभीष्टदेशे ऽपि तत्र शान्तिरुच्यते।...शान्त्युदके आवपते ततो मातलीं (xi. 6. 23) कृत्वा शान्त्युदकं समाप्यते रात्रौ तेन शान्त्युदकेन तत्स्थानं प्रोक्षति यतार्ये इत्येतैर्मन्त्रैः (cf. Kāuç. 39. 9) कपोतोलूकस्थानं यावत्... — sū. 8... त्रिः शालां परिणयति कपोतस्थानं वा परिभ्रामयेत् ...। आरण्यके पक्षिणि प्रविष्टे इदं कर्म कुर्यात्। कपोतोलूके वा प्रविष्टे द्विपदचतुष्पदविनाशो वेदे श्रूयते तस्य दोषशमनं... — sū. 9. अथ स्वप्नाध्यायपठिते उग्रे स्वप्नदर्शने शान्तिरुच्यते। स्वप्नाध्यायपठितदुःष्वप्न्यं रुद्रभाष्यकारमतेन गृहीतव्यं(!)। पक्वमांसे प्रेतदर्शने परिष्वङ्गमर्कटे(!) दृष्ट्वा तैलाभ्यङ्गे नग्नपुरुषदर्शने नग्नस्त्रीदर्शने कालसूत्रेत्यादि(!) स्वप्नाध्यायपठिता अनेकशः। इति दुःस्वप्नदर्शने शान्तिरुच्यते। ... स्वप्नं कुत्सितं दृष्ट्वा मुखं प्रक्षालयति. — sū. 13. अथ पुनर्घोरदुःस्वप्ननाशनकर्म उच्यते। विद्मा ते स्वप्नेत्येकेन पर्यायेण दुःस्वप्नं दृष्ट्वा मुखं विमार्ष्टि।... पार्श्वेन द्वितीयेन भूयते। ... अन्नं स्वप्ने दृष्ट्वा निरीक्षते। ... मिश्रधान्यं पुरोडाशं जुहोति. — sū. 14. अथ आचार्ये मृते ब्रह्मचारी इदं करोति श्रेयस्कामः आचार्यदहने। अग्निर्भूम्यामित्यादि (xii. 1. 19) पञ्च सामिधेनीर्हुत्वा ततो दहनं त्रिर्भ्रामयित्वा तत नहि ते अग्ने तन्व इति सूक्तान्ते

पुरोडाशं जुहोति तस्मिन्दहने. — sū. 16. कौशिकसूत्रे शयनं न मन्यते च प्रेतादिभयात् तद्विघातशमनं. — sū. 17. अपो दिव्या इति चतसृभिर्ऋग्भिः स्नानं कृत्वा त्रिरात्रं गृहे आगत्य ततः शयीत इति कौशिकमतं। मृते आचार्ये इदं कर्म प्रायश्चित्तं कृत्वा ततः समावर्तनं कुर्यादित्यर्थः। अन्यं गुरुमुपासीत. — sū. 19. अथ ब्रह्मचारी स्त्रिया मैथुनसंयोगे इदं करोति। स अवकीर्णीत्युच्यते (Cod. साव°) तस्य प्रायश्चित्तमिदमुच्यते। ब्रह्मचारिणं दर्भरज्वा कण्ठे बद्धा . . . — sū. 22. अथ स्वयंप्रज्वालिते ऽग्नौ प्रायश्चित्तमुच्यते . . . — sū. 23. अथ अग्निशब्दकरणे शान्तिरुच्यते। . . . अग्निमुपतिष्ठते. — sū. 24. अथ संदेशे विस्मृते . . . अग्निमुपतिष्ठते। यदि ग्रामे वा गृहे वा संदेशं न कथयति तदा इदं प्रायश्चित्तं. — sū. 25. अथ पापनक्षत्रे जाते स्त्री वा पुरुषो वा यो जातस्तस्य शान्तिरुच्यते। . . . तस्य मुञ्जरज्वा कण्ठे पादे . . . बद्धा ततः प्रत्नो हीति सूक्तेन उदकघटं संपात्याभिमंत्र्य दर्भपिञ्जूलीर्घटे प्रक्षिप्य ततो ऽभिषिञ्चति। . . . ग्रीवापाशं नदीफेनेषु निदधाति। नदीनां फेनानित्यर्धर्चेन (vi. 113. 2ᶜ) कटिपाशं उदकमध्ये प्रक्षिपति। मातृपितृभ्रातृषु दोषश्रवणात्। तस्मात्पापनक्षत्रेण शान्तिः कर्तव्या। . . . मूलनक्षत्रे इदं कर्म क्रियते। यो नक्षत्रकल्पोक्तं कर्म कुर्यात् तदुच्यते। . . . प्रत्नो हीति सूक्तेन . . . क्षीरौदनं संपात्याभिमंत्र्याश्नाति। . . . एतस्मिन्तन्त्रे (!) समूलं बर्हि स्तृणाति समूलेध्मानुपसमाधाय एष विशेषः। नक्षत्रकल्पोक्तं। एषा नक्षत्रकल्पोक्ता शान्तिः। आप्लवनावसेचने च क्षीरौदनप्राशनं च एतानि त्रीणि। अथवा प्रत्नो हीति सूक्तेन उदकमभिमंत्र्य पापनक्षत्रजातमवसिञ्चति शिरसि। एतानि त्रीणि कर्माणि भवन्ति. — sū. 26. अथ ज्येष्ठे भ्रातरि जीवति विवाह आधानदीक्षां च करोति तस्य शान्तिरुच्यते... — sū. 28. उत्तरपाशं नदीनां फेनानित्यर्धर्चेन नदीफेने निदधाति। अधरपाशं...नदीमध्ये प्रक्षिपति। ततो बन्धनं कृत्वा ततो ऽवसिञ्चति. — sū. 29. . . . अपां सूक्तैर्घटं संपात्याभिमंत्र्य तत आप्लावयति। . . . अवसिञ्चति। परिवित्तिपरिवेत्तृप्रायश्चित्तं. — sū. 30. अथ मृते आचार्ये इदं कर्म... — sū. 33. अथ देवपितृवर्जितखदाशयनिहितस्य अन्नस्य याज्ञाकेन (!for याजकेन) येन कर्मणा भवति तदुच्यते। ...अनुवाकेन खदाशयादन्नादुद्धृत्य सेतिकामेकां जुहोति. — sū. 34. ...प्रायश्चित्तं. — sū. 35. ...खदाशयान्नसंस्कारशान्तिः समाप्ता. — sū. 36. अथ मृते धनिके ऋणकस्य ऋणदानशान्तिरुच्यते। अपमित्यमप्रतीत्तमिति त्रिभिः सूक्तैर्द्रव्यमभिमंत्र्य (vi. 117–119) पुत्राय ददाति। अनृणो भवति. — sū. 41. आकाशोदकेन शरीराप्लवने दोषो भवति तस्य शान्तिरुच्यते . . . — sū. 42.

दिवो नु मां बृहत इति सूक्तेन एकतैलं सर्वौषधिगन्धं हिरण्यं वा एतान्यभिमंत्र्य शरीरमुद्वर्तयेत्।... आकाशबिन्दुदोषोपशान्तिः समाप्ता· — sū. 43. अथ कुमारस्य कुमार्या वा यस्योत्तमदन्तौ पूर्वौ जातौ तत्र मातापित्रोर्मरणशङ्का भवति तत्र शान्तिरुच्यते ... — sū. 44. ... व्रीहियवतिलमाषानेकीकृत्याभिमंत्र्य उत्तमजातदन्ताभ्यां दंशयति· — sū. 47. अथ शिरसि अङ्गे वा काकोपविष्टदोषः श्रूयते तस्य शान्तिरुच्यते· — sū. 48. ... उल्मुकमभिमंत्र्य काकमुखेन अपमृष्टं पुरुषं पर्यग्नि करोति। उपरि भ्रामयित्वा दूरे निक्षिपति. — sū. 49. अथ संसर्गदोषशान्तिरुच्यते।...सर्वेषु रोगेषु शावदन्तादि कुनखिना बण्डेन ज्वरेणापामार्गादिरोगेषु संसर्गेषु सर्वदोषान्मुच्यते ... — sū. 50. अनृतमुक्त्वा आचमनं करोति। वणिजि अनृतं कृत्वा ... दोषो न भवति· — sū. 51. यत्र क्वचित्खनति तत्र सर्वत्र यत्ते भूम इति ... खननदोषो न भवति· — sū. 53. अथ शकुनशान्तिरुच्यते। ... अपशब्दं श्रुत्वा ... कपिञ्जलवाशितं श्रुत्वा ग्रामे अरण्ये पक्षिवाशितं श्रुत्वा वा स्वयं वा क्रुद्धभाषणं कृत्वा अन्यस्य वचनं श्रुत्वा ... उलूकवाशने कपोतवाशने पूर्वतो वा उत्तरतो वा लोके निन्दितः। यत्किंचिल्लोके विरुद्धं दृष्ट्वा श्रुत्वा सर्वत्र जपने स्वस्त्ययनं भवति· — sū. 55. आकाशे यदि स्वपिति अरण्ये वा शून्ये गृहे वा पर्वते वा तदातदा यो अभ्य बभ्रूणा (!) इत्यृचं जपित्वा स्वपिति· — Keç. has the following at the end of the adhyāya: समाप्तानि नैमित्तिकानि सर्वज्ञानप्रबोधार्थं ... दुष्टदोषविनाशनैमित्तिकानि। ... नैमित्तिकान्यवश्यं कर्तव्यानि। अकरणे धनधान्यपश्वादिविनाशः .... जरायुज इति दुर्दिनमायन्नित्यादीनि (Kāuç. 38. 1. fg.)। अथाद्भुतानि वर्षे यक्षेष्वादिनैमित्तिकानि (Kāuç. 93. 1 fg.) तान्यवश्यं कार्याणि· —

Adhyāya vi.

Kaṇḍikā 47.

Introduction. अथ क्रमप्राप्तो अथर्ववेदविहितो ऽभिचार उच्यते। मीमांसायामभिचारो निषिद्धः... मनुस्मृतौ च विहितो ऽभिचारः... — sū. 2. आङ्गिरसकल्पोक्ताः संभाराः प्रत्येतव्याः। दक्षिणस्यां दिशि मण्डपं कारयेत्तत्र यथोक्तविधिना गुरुः। पताकातोरणैर्युक्तं द्वारं ... स्मृतं· — sū. 9. तथा तदग्न इत्यादि स्मर्तव्यं सर्वत्र। अभ्यातानान्ते दूष्या दूषिरसीति सूक्तेन तिलकमणिं संपात्याभिमंत्र्य बध्नाति कारयिता कर्ता सदस्याश्च (cf. Kāuç. 39. 1 fg.) ... आत्मरक्षार्थं· — sū. 12. अधुना दीक्षा उच्यते शुक्लपक्षे त्रयोदश्यां पूर्वाह्णे अभ्यातानान्तं कृत्वा द्यावापृ-

थिवी उर्वन्तरिचमिति सूक्तं कर्ता कनकरजतेति सूक्त(?) द्वाभ्यां सूक्ताभ्यां वेणुदण्डं छिनत्ति· — sūs. 14–16. य इमां देवो मेखलामिति पञ्च चेति सूक्तेन (vi. 133; vi. 25) मेखलां संपात्य। अयं वज्र इति सूक्तेन दण्डं संपात्य। य इमामित्यृचेन मेखलां बध्नाति। वज्रो ऽसीति तृचेन सूक्तेन दण्डं गृह्णाति। नमो नमस्कृद्भ्य इति सप्तर्षिभ्य उपस्थानं करोति शालाया बहिः। ततः शालां प्रविश्य व्रतादानीयाः समिध आदधाति शान्ताः। व्रतश्रावणं तस्मिन्करोति। अभ्यातानाद्युत्तरतन्त्रं। दीक्षितस्त्रिरात्रमनशनं। त्रिरात्रे निवृत्ते कृष्णपक्षे प्रतिपदि कर्म भविष्यति· — sū. 17. आङ्गिरसदण्डवृश्चनसूक्तं प्रतिपादन उक्तं गृहीत्वा मेखलाया ग्रन्थिमालिम्पति आकृतास्रबिकृता इत्यृचा (vi. 133. 2). — sūs. 18–20. अयं वज्र इति तिसृभिर्ऋग्भिर्यदश्नामि यन्निरामि इति द्वाभ्यामृग्भ्यां भोजनं करोति यत्पिबामीत्यृचा उदकं पिबति। अमुष्यस्थाने शत्रुनामग्रहणं· — sū. 21. . . . फट्टुतो मङ्गमद इत्येतेन मन्त्रेण भोजनपात्रं भिनत्ति· — sū. 22. इदमहं मङ्गमदस्य तुरुष्कस्य मूतिकर्णपुत्रस्य प्राणापानावपयच्छामीत्यनेन मन्त्रेण मेखलां ग्रन्थ्या बध्नाति गाढं करोति· — sūs. 25–27. द्यावापृथिवी उर्विति सूक्तेन पर्शुवृक्षपत्रं च गृहीत्वा शत्रोर्दक्षिणा धावतः पदं ऋजुं छिनत्ति। तिरश्चीनत्रिकोणे एकैकं एवमष्टावरान् सूक्तावृत्तिः· — su. 28. तस्माच्छेदात्पांसुं च गृहीत्वा वधपत्रे (!for बधक°?) बद्धा . . . भ्रष्ट्रे न्यस्यति· — sū. 30. अथवा एतत् . . . अभिचारतन्त्रमुच्यते। पश्चादग्नेः करिष्वां (!) कुशुपस्तीर्णायां etc. . . . — sū. 31. . . . उदकं हस्ते कृत्वा दक्षिणामुखः प्रक्षिपति· — sū. 32. Keç. has nothing corresponding to this sūtra, but seems to connect directly with sū. 33. Later, however, after sū. 38, a passage corresponding to this sūtra appears, which contains nothing additional to the statement of Kāuçika. sū. 33. इदं च उष्णोदकं मध्ये अक्षितसक्तून् (!) प्रक्षिप्य पिबेत् अनालोडितानेकोच्छ्वासेन (अनालोडिता°, as though °नुपमथिता° stood in the text). — sūs. 34–36. त्रींस्त्रीन्मुष्टीं स्त्रिरात्रं द्वौद्वौ त्रिरात्रमेकैकं षड्रात्रे भुंक्ते आकृतास्रबिकृतेत्येवमादि (vi. 133. 2) स्मर्तव्यं (cf. sū. 17). — sū. 37. . . . ब्राह्मणान्परिचारकांश्च . . . भोजयित्वा पात्रस्थमुच्छिष्टमेकधा कृत्वा . . . बङ्गमत्स्ये गर्ते प्रक्षिपेत्. — sū. 38. यदि ते धावन्तो दृश्यन्ते ततो द्वेष्यो मृतो जानीयात्. — sūs. 39–42. द्यावापृथिवी इति सूक्तेन लोहितशिरसं शकशमाशयित्वा (!for शशक°?) प्रेतवत्कृत्वाभिमंत्र्य दहति (? Cod. ददाति)। ततः अग्ने यत्ते तप इति पञ्चभिः (ii. 19–23) सूक्तैरुपतिष्ठते (cf. sū. 8)। अन्यः कर्ता अभ्यातानान्तं कृत्वा…

कृकलासमष्टधा कृत्वा प्रत्यृचं जुहोति· — sū. 44 निवृत्य वेद्यामुपवेश्य . . . स्वेदाक्ताः शरभृष्टीः प्रत्यृचं जुहोति· — sū. 45. . . . शत्रुपदात्पांसुं गृहीत्वा पश्चादग्नेर्निधाय उदग्व्रजत्या स्वेदजननात् । निवृत्य स्वेदालंकृतान्पांसून् . . . जुहोति· — sū. 46—52. कृकलासशरीरे शर्करानवधाय विषमवधाय . . . बध्नाति पाशि स इति पादेन । आमुमित्यादन्ते । मर्मणि खादिरेण स्रुवेण गर्तं खनति अतीव य इति तत्र निदधाति· — sū. 53. संचित्य मृत्तिकोपरि निदधाति द्यावापृथिवी इति सूक्तेन जुहोति· — sū. 54. द्यावापृथिवी इति सूक्तेन आवलेखनीं हृदये विध्यति· — sū. 57. . . . शत्रुमारणकामः·

Kaṇḍikā 48.

sū. 1. अश्वत्थ . . . कृकलास . . . एरण्ड . . . श्लेष्मान्तक . . . खदिर . . . शरसमिध आदधाति· — sū. 3. . . . स्रुवाग्रे दण्डं बध्नाति . . . — sū. 4. . . . शत्रुमर्मणि निखनति· — sū. 5. तौ अश्वत्थशाखायां . . . प्रणुदति· — sū. 6. . . यावन्तः सपत्नास्तावन्तः (!) पाशान् . . . उदके प्लावयति· — sū. 7. . . . शत्रुं क्रोशन्तमन्वाह । मरणं भवति· — sū. 8. . . उपसमाधानं । . . . स्रुवग्रहणं । . . . जुहोति· — sū. 9. . . कृकलासकर्म शरभृष्टिकर्म सपत्नक्षयणीयकर्माणि षट् ग्राममेत्य च कर्माणि षट् मणिकर्म पाशकर्माणि त्रीणि विकङ्कतस्रुवकर्म एकोनविंशति तन्त्राणि भवन्ति· — sū. 10. . . . सर्पकृत्त्वं चूर्णयति· — sū. 11. . . गोहरणेऽभिचारः· — sū. 12. . . चौरानन्वाह (Cod. चौरन्वाह)· — sūs. 13-22. नैतां तेति सूक्ताभ्यां श्रमेण तपसेत्यनुवाकः सदा गोहरणमारणेषु . . . क्रियमाणेषु ब्रह्मचारी जपति । श्मशाने जपति । ऊबध्ये श्मशानमवधाय (!) ततो परिस्थितः श्रमेण तपसेत्यनुवाकं जपति । द्वादशरात्रं यावत् अहरहः ततः . . . मृतो द्वेष्य इति जानीयात् . . . — sū. 23. . . श्वेतमृत्तिकामभिमंत्र्य शुने प्रयच्छति· — sū. 24. . . पलाशमणिं संपात्याभिमंत्र्य बध्नाति· — sū. 25. . . इङ्गिडं जुहोति· — sū. 27. इदं तद्युज इति चितागन्यभिचारः· — sū. 28. इदं तद्युज इति सूक्तेन मध्यमपरिभवापर्णेन (!) फलीकरणाञ्जुहोति । यत्किं चासाविति सूक्तेन पञ्चर्चेन (vii. 70) मध्यमपलाशेन फलीकरणाञ्जुहोति· — sūs. 29—31. बर्हिर्लवनादिप्रतिष्ठापनान्तं कृत्वा तमग्निं स्फोटयति शर अन्यमग्निं प्रणयति । निरमुमिति सूक्तेन स्तरणं कृत्वा पुनर्मन्त्रेण स्तृणाति । निरमुमिति सूक्तेनाभ्यातानान्तं कृत्वा इङ्गिडं जुहोति· — sū. 32. . . वत्सखल्वायां कृत्वा तस्य वृषणैरपिधाप्य बाधकेन काष्ठेन हन्यात् . . . — sū. 35. . . शत्रुं दृष्ट्वा जपति· — sū. 37. . . विद्युद्धतवृक्षस्य समिध आदधाति· — sū. 38. . . ऊर्ध्वशु-

ष्कवृत्तसमिध आदधाति. — sūs. 41—43. असदन्गाव इति चारक्तो-शालिशकुनी (!) चीरौदनं पत्काभिमंत्र्य द्वेष्याय प्रयच्छति भचार्थं । . . . आमपात्रस्योपरि हस्तप्रचालनं करोति . . . —

Kaṇḍikā 49.

sū. 1. द्वेष्याभिमुखं विसृजति वृषोत्सर्गवत् (cf. Kāuç. 24. 19 fg.). — sū. 2. . . आश्वत्थीः स्वयंपतिताः समिध आदधाति. — sūs. 3—27. The treatment of the remaining sūtras of this kaṇḍikā by Keçava differs so much from Kāuçika's, especially in the arrangement of the sūtras, as to render it impossible to present extracts sūtra by sūtra. The entire passage, barring irrelevant matter, is here given: उदवज्राणां विधानमुच्यते । इन्द्रस्यौज इति दूर्वाभवैर्घटं प्रचालयति । जिष्णवे योगायेत्युत्तराभवैः षडुदकांसघटानुदकसमीपे निदधाति । इदमहं यो मा प्राच्या दिश इति अष्टर्चेन कल्पजेन सूक्तेन उदकमध्ये निदधाति घटं । इदमहमिति घटेनोदके इदमहमिति सूक्तेन घटमध्ये मुखं करोति । इदमहं यो मा प्राच्या दिश इति सूक्तेन घटमुदकपूर्णं कृत्वा अपक्रामति । इदमहमिति सूक्तेन उदकपूर्णं घटं मण्डपे स्थापयति एतदभिचारे उदकाहरणम् । येन विधानेन वज्रप्रहरणं क्रियते तदुच्यते । इन्द्रस्यौज इत्यादि सर्वं कृत्वा । इदमहमिति स्थापनान्तं कृत्वा अग्नेर्भाग इत्याद्यष्टभिर्ऋग्भिर्द्विधाकरणं (v. 5. 7 fg.) । अर्धं (Cod. अर्धौ) घटे कृत्वा अर्धं भाजने करोति भाजनमग्नौ तापयति । घटमन्यस्मै पुरुषाय प्रदाय अग्नेर्भाग इत्यष्टभिस्तापने मन्त्रः । बहिर्दक्षिणामुख उपविश्य भाजनमग्रे कृत्वा वातस्य रंहितस्य इति मन्त्रेण उदकं गृह्य । समम्नय इति सूक्तेन कल्पजेन सर्वेभ्यो भूतेभ्यो अभयवदनं (cf. sū. 12) । यो व आपो ऽपामिति etc. . . वज्रप्रक्षेपः । एतामनाधराच (!) पराच इति कल्पजया ऋचा (cf. sū. 6) भाजनमुदकं भूमौ निनयति । यं वयमिचि सूक्तेनैव अपामस्मै वज्र-मित्येकया एवमेव । इन्द्रस्यौज इत्यादि कर्तव्यं । तत्र रुद्रकृताः श्लोकाः ।

प्रचालनं तथा योगो अप्सुपात् (!) निधापनं ।
अपोहनमनेनैव तन्निवेद्य पात्रपूरणं ॥ १ ॥.

Here two more çlokas are given, which are however too corrupt for reproduction. Then the text continues as follows: विष्णोः क्रमो ऽसीति द्वादशभिः प्रत्यृचं विष्णुक्रमान्क्रमते (cf. sū. 14) शत्रोरभिमुखं । सवविधानेन (cf. Kāuç. 60. 1 fg.) बृहस्पतिशिर-ओदनं द्वेष्याय ददाति । ममाग्ने वर्च इति (cf. sū 15) सूक्तेन तं पृषातके-

नोपसिच्य तस्यौदनस्येत्यर्थसूक्तेनाभिमंत्र्य (xi. 3. 1) ददाति। सूक्तेनाभिमृते सति सूक्तेन संपातवन्तं करोति . . . । उदेहि etc. . . नावं . . . द्वेषत्सु (!) अन्वाह (cf. sū. 18) । समिद्धो etc. . . (cf. sū. 19) शङ्कुसहितान्पाशानभिमंत्र्य अरण्ये निदधाति। . . . द्वेष्यस्य पदं वृश्चति (cf. sū. 20)। पाशान् . . . अग्नौ ऽभ्यस्यति (cf. sū. 21)। . . . आमपात्रस्योपरि द्वेष्यस्य हस्तप्रक्षालनं करोति (cf. Kāuç. 48. 43)। . . . वृषभं संपात्य उत्सृजति शत्रुगृहानभिसृजति (cf. sū. 1)। रक्तशालिक्षीरौदनं संपात्याभिमंत्र्य द्वेष्याय ददाति (cf. sū. 22)। शत्रुप्रकृतिं च मृन्मयां कृत्वा वेदिमध्ये ऊर्ध्वं स्थाणौ निबध्य . . . मूर्ध्नि संपातानानयति (cf. sū. 23) घृतेन पाचयति . . . । यस्मिन् षडुर्वीः पञ्च इति उदवज्रान्प्रहरति उक्तेन विधानेन (sū. 24)। यो ऽन्नादो ऽन्नपतिरित्यृचा द्वेष्यं मनसा . . . आचामति स्वयं द्वेष्यस्य मरणं भवति (sū. 25) । यस्य गां पदा स्फुरति ऋग्द्वयाधिकारः तृचेन द्वेष्यं दृष्ट्वा अन्वाह (sū. 26)। . . . अवभृथे स्नात्वा निर्दुर्मण्य इति सर्वौषधिभिरात्मानमभिमृशति। अभिचारं कृत्वा इमां कर्ता शान्तिं करोति. — The following is an extract from a longer statement of Keçava at the end of this adhyāya: समाप्ता अभिचारपद्धतिः। मरणं बन्धनं वा प्रणिपातो वा उन्मत्तभावो वा भवति।...भद्रमतेन भाष्यकारदारिलमतेन च एभिः त्रिभिर्भाष्यकारैः (!) कौशिको विचारितः तस्य तस्य एते पदार्था भवन्ति। ...ततः श्लोकाः। मरणं व्यसनं चैव बन्धनं च विशेषतः। प्रणिपातोन्मत्तं वा दैवोपहतिरेव च। ...उपाध्यायकवीश्वरेण नाम्नातो ऽभिचारः कृतः। तुरुष्कमङ्गमदस्योपरि (Cod. रुरुष्क°) कारितः। पृथिव्यां दुष्ट उत्पन्नः सर्वदा च विनाशयेत् । अधर्मसंभवो दुष्टः प्रजाहिंसनतत्परः। तुरुष्कनाम्ना (Cod. रुरुष्क°) पापिष्ठा देवब्राह्मणहिंसकाः। पृथिव्यां श्रीभोजदेवधर्मसंरक्षणाय च।देशे तु मालवके उत्पन्नः श्रीराजगृहेषु च।...—

Adhyāya vii.

Kaṇḍikā 50.

sū. 1. स्वस्त्ययनकर्मणां विधिं वक्ष्यामः । यदा ग्रामे गच्छति तदा आचमनं कृत्वा... प्रथमं दक्षिणेन पादेन प्रक्रामति अध्वानं. — sū. 2.. गृहे वा क्षेत्रे वान्यत्र वा प्रक्षिपति। ...यत्र क्षिपति तत्राविनाशो भवति द्विपदचतुष्पदादीनां स्वस्त्ययनं भवति. — sū. 3. . . . दर्भादीनि तृणानि गृहे वा क्षेत्रे प्रक्षिपति। . . . इन्द्रमुपतिष्ठते . . . — sū. 4. . . . खड्गादिशस्त्रं संपात्य हस्तेन विमृज्याभिमंत्र्य धारयति। . . . रात्रौ

प्रयच्छति । सुखं भवतीत्यर्थः. — sū. 5. दिष्ट्या मुखं मीत्वा स्वपिति रात्रौ स्वस्त्ययनकामः। मध्यमाङ्गुल्याङ्गुष्ठाभ्यां प्रदेशन्यङ्गुष्ठाभ्यां । प्रादेशी दिष्टीरित्युच्यते (! for दिष्टिरि° ?). — sū. 6... प्रभाते निद्रां त्यक्त्वा... यदा उत्तिष्ठति तदा सूक्तं जपित्वा त्रीणि पदानि प्रक्रम्य तदा ... प्रयोजनार्थं गच्छति। ... गच्छतां स्वस्तिर्भवति. — sū. 7. सुप्त्वोत्थाय ... भूमौ तिस्रो दिष्टीर्मीत्वा ततो गच्छति प्रयोजनार्थं स्वस्त्ययनकामः। ... दिष्टोः प्रादेशमात्रीः. — sūs. 8—9. अथाध्वाने (!) गच्छतां कर्म उच्यते। पथि गच्छन्तं संबलं (! for शम्बलं?) सक्त्वादि प्रेतं पादावित्यृचाभिमंत्र्य ब्राह्मणाय ददाति स्वस्त्ययनकामः. — sū. 10. उपस्थास्त इत्यृचा ओदनसक्तून् वटकादीनि त्रीणि द्रव्याण्यभिमंत्र्य भूमौ निक्षिपति। त्रीणित्रीणि प्रसृतिर्वा(!) अञ्जलीर्वा मुष्टीर्वा। पथि ततो गच्छति। स्वस्तिर्भवति सर्वस्य अनेन विधानेन। एतदध्वानकर्म (!) समाप्तं. — sū. 11. अथ सर्वार्थस्वस्त्ययनकर्म उच्यते। ... गृहे वा अथवा अरण्ये वा भये ... समुपस्थिते स्वस्त्ययनं नित्यं ... कुर्वीत. — sū. 12. वणिक्कर्म लाभार्थमुच्यते। ... उत्थापयति विक्रययोग्यत्वात्। ... लाभो भवति स्वस्तिर्भवति. — sū. 13. ये ऽस्यां प्राची दिगिति सूक्ताभ्यां etc. ... आज्यादि त्रयोदश द्रव्याणि भवन्ति (cf. the extract from Keçava at the end of the sixth kaṇḍikā) पालाशादयो द्वाविंशतिं वृक्षाणां समिध आदधाति (cf. Kāuç. 8. 15)। ... यत्र समिध आदधाति तत्र सर्वत्र एते समुच्चिता वा विकल्पिता वा भवन्ति. — sū. 14. भवाशर्वौ मृडतमिति सूक्तेन (xi. 2) .. चरुं जुहोति।... रुद्रभूतप्रेतराक्षसलोकपालगृहदेवमहादेवगणाद्युपहताभिघाते(Cod. °देवगृह°) स्वस्त्ययनं। समाप्तं महादेवाभिघाते स्वस्त्ययनं. — sū. 15. अथ शीघ्रेण पुण्यमङ्गलकर्मकरणे स्वस्त्ययनमुच्यते। ... ब्राह्मणस्य शकृत्पिण्डान्पर्वस्वाधाय अग्रे भूत्वाभिमंत्र्य ततः प्रयच्छति ... किमद्याहरिति पृच्छति. — sū. 16. स च शोभनमद्याहः मङ्गलमद्याहरिति ब्राह्मणो वदति। ... यदा शीघ्रे प्रयोजने कार्ये कर्तुमिच्छति तदा इदं कर्म कृत्वा ततः शान्तिकर्म करोति ... — sū. 17. अथ सर्पादिस्वस्त्ययनमुच्यते। सर्पवृश्चिकद्विदंशकमशकभ्रमरभूमिकीटकृमयः। एतेषां भयं न भवति। ये ऽस्यां स्थेति सूक्तेन...प्राची दिगिति सूक्तेन (iii. 26; iii. 27: Keçava evidently construes the word युक्तयोः as दिग्युक्तयोः, contrary to the reading of all MSS.; cf. Kāuç. 14. 25; 50. 13) मा नो देवा इति सूक्तेन etc. ... सिकतामभिमंत्र्य शालां परितः किरति। ... शर्करामभिमंत्र्य शयने वा शालायां वा उर्वरायां वा गृहे वा वने वा ग्रामे वा तत्र परिकिरति (the emendation suggested in note 6, p. 146,

is thus rendered unnecessary, as Keçava's version of the passage seems a plausible one). — sū. 18. ये ऽस्यां स्थेति etc. (cf. Keç. at sū. 17) . . . तृणमालां युगच्छिद्रेण संपात्याभिमंत्र्य द्वारे बध्नाति . . . स्वस्त्ययनकामः । महानवम्यां दीपोत्सवे च शिष्टाचारः । . . . गजमार्गे बध्नाति . . . महानवम्यामिदं जयकर्म । . . . तृणमालां युगच्छिद्रेण संपात्य पथि वा पत्तनद्वारे वा गृहद्वारे वा बध्नाति । . . . अहिभये वृश्चिकभये मशकभये भ्रमरसंघे कृमिभये . . . — sū. 19. ये ऽस्यां स्थेति etc. (cf. Keç. to sū. 17) . . . शुष्कगोमयमभिमंत्र्य गृहे विसृजति . . . स्तृणाति — sū. 20. . . . गोमयमभिमंत्र्य पत्तनद्वारे गृहद्वारे . . . चैत्ये वा निखनति — sū. 21. . . . गोमयं . . . अग्नौ — sū. 22. ये ऽस्यां स्थेति etc. (cf. Keç. to sū. 17) . . . अपामार्गमञ्जरीमभिमंत्र्य संभिनत्ति . . . गृहे स्तृणाति । . . . अपामार्गप्रसूनमभिमंत्र्य द्वारे निखनति । . . . अपामार्गमञ्जरीं निखनति ग्राममध्ये । . . . गुडूचीमभिमंत्र्य नाना करोति . . . गृहे स्तृणाति । गुडूचीपादानभिमंत्र्य निखनति । . . . गुडूचीपादानग्नौ जुहोति . . . (no mention is made of anything corresponding to the पराचीनमूलान् of the sūtra) । . . . समाप्तानि मशकादीनां स्वस्त्ययनानि —

Kaṇḍikā 51.

sū. 1. अथ व्याघ्रचौरवृकचरकसिंहारण्यकादीनां भये स्वस्त्ययनान्युच्यन्ते । . . . गां पृष्ठतो गच्छति । कीलकं निखनन्नुद्घाटयन् गृहादरण्यं गच्छति व्याघ्रादिस्वस्त्ययनकामः — sū. 2. . . उदकघटमभिमंत्र्य गोमचारे (!) निनयति । ततः पांसुकूटं तन्त्रं कृत्वा अर्धं दक्षिणेन हस्तेन विक्षिपति । इन्द्राय पाकयज्ञविधानेन . . . — sū. 4. ये ऽस्यामिति सूक्तेन (iii. 26) प्रत्यृचमुपतिष्ठते — sū. 5. मध्ये पञ्च (!) बलिहरणं — sū. 7. पर्वतदेवतायै अरण्ये पाकयज्ञविधानेनाज्यभागान्तं कृत्वा ब्रह्म जज्ञानमनाप्ता ये सहस्रधारेति सूक्तेन (v. 6. 3) जुहोति । हिमवते त्वा जुष्टं निर्वपामि हिमवते त्वा जुष्टं प्रोक्षामि हिमवन्तं गच्छतु हविः स्वाहेति निकटं पर्वतं यजते । भवाशर्वौ मृडतमित्यर्थसूक्तेन चरुं जुहोति . . . भवाय जुष्टं निर्वपामीत्यादि — sū. 8. . . भवाशर्वादिभ्यो देवताभ्यो निर्वापं कृत्वा बृहद्भाण्डके श्रपणं । . . . एते सप्त पर्वतदेवताः । व्याघ्रचौरवृश्चिकहस्त्यारण्यकगर्वत्यादिभये स्वस्त्ययनं — sū. 9. गोष्ठकर्म व्याख्यास्यामः । गोशान्तिः पाकयज्ञं तन्त्रं कृत्वा इन्द्रदेवतायै ब्रह्म जज्ञानमनाप्ता ये सहस्रधार इति सूक्तेन . . . भवाशर्वौ मृडतमिति सूक्तेन चरुं जुहो-

ति। . . . रुद्रदैवस्य चरोः हविरुच्छिष्टं यजमानो ऽश्नाति· — sū. 11. प्रथमप्रसवे गवां शान्तिरुच्यते। ब्रह्म जज्ञानं etc. . . . वत्सस्य वा वत्सिकाया वा मुखं म्रचति स्वस्त्ययनकामः· — sū. 13. . . . शाखामुदकमभिमंत्र्य गोभ्यो बहिरुदकधारां निनयति . . . — sū. 14. अथ पत्तनग्रामस्य गृहस्य शान्तिरुच्यते। . . . गृहकोणेषु निखनति चतुरः एकं मध्ये एकं गृहोपरि निदधाति· — sū. 15. अथात्र स्वस्त्ययनमुच्यते· — sū. 16. . . . त्रीणि सस्यवल्ली (!) अभिमंत्र्य चेत्रमध्ये निखनति। समाप्तमन्नव्याधिरचास्वस्त्ययनं· — sū. 17. अथ मूषकपतङ्गशलभहरिणरुरुशल्यादीनि (Cod. ०रोरु०) सस्यविनाशकानि तेषां शान्तिरुच्यते। . . . अभिक्रामति मूषकादिस्थाने· — sū. 19. मूषकादिमुखं केशेन बन्धयित्वा . . . चेत्रमध्ये निखनति· — sū. 22. तस्मिन्नहनि मौनं कुर्यादस्तमयनं यावत्। . . समाप्तं मूषकशलभपतङ्गटिट्टिभकीटककोटिकाहरिणरुरुशल्यकगोसेधागोकूम्यादिस्वस्त्ययनं (Cod. ०रोरु०). —

Kaṇḍikā 52.

sū. 1. . . आज्यं जुहोति। . . . समिध आदधाति। पुरोडाशादि योज्यं सर्वत्र· — sū. 2. . . मन्थमभिमंत्र्य पथिकाय प्रयच्छति स्वस्त्ययनकामः। . . . भक्तमभिमंत्र्य भचयति . . .। समाप्ता ग्रामदूरगमनस्य शान्तिः। कलहदोषो न भवति· — sū. 3. पुरुषबन्धने मोचनशान्तिरुच्यते। . . . यस्मास्त इति चतुर्ऋचेन सूक्तेन येन बद्धः तत्सदृशं संपातवन्तं कृत्वा सूक्तसदृशं (! for मुक्त०?) द्वितीयं च संपातवन्तं करोति। यत्ते देवीति तृचेन सूक्तेन निगडयुगलद्वयं च संपातवन्तं करोति . . .। . . . विषाणा पाशानिति चतुर्ऋचेन निगडयुगलद्वयं संपात्य एकमुक्त(!) निगडं चर्ममयं वा लोहमयं वा येन बद्धस्तन्मयं कृत्वा अभ्यातानाद्युत्तरतन्त्रं। समाप्तं बन्धनमोचनं· — sū. 4. वाचा बन्धनस्य मोचनमुच्यते। . . . भूमिलेखां संपात्य तत उत्तरतन्त्रं। समाप्तं बन्धनस्वस्त्ययनं बद्धो अनेन कर्मणा कृतेन मुच्यते बन्धनात्· — sū. 5. अग्निदावरचार्थमुच्यते। . . . उदकमभिमंत्र्य गर्तें प्रचिपति . . . उदकपूरणं करोति· — sū. 6. . . शालामध्ये द्वयो (!) उदकमभिमंत्र्य गर्ते प्रचिपति। अग्निरचा भवति· — sū. 7. . . अग्न्युपसर्गे एतत्कर्म· — sū. 8. आयन इति सूक्तेन दिव्यमभिमंत्र्य गृह्णाति दिव्ये शुध्यति तप्तमाषके (! for मोषके?) दिव्ये· — sū. 9. . . . अङ्गदग्धं उदकमभिमंत्र्य प्रचालयति। अङ्गमारोग्यं भवति अङ्गे अग्निरचा। समाप्तानि अग्निदाहरचाणि — sū. 10. नावा (!) पेटकपट्टिकादि स्वस्त्ययनार्थो-

दकतरणार्थरचा उच्यते। . . . नावादि अभिमंत्र्य ततश्चटन्ति उपविशन्ति। न कदा चिन्मज्जति क्वचित्। उदकरचार्थे दूरदेशगमने. — sū. 11. Keçava's treatment of the following passage renders it probable that it contains two sūtras, the division being after संपातवतीं, as follows: ...तृचेन नावं संपात्य। तत उत्तरतन्त्रं। समाप्तं दूरदेशगमने एतत्कर्म।... तृचेन नौमणिं संपात्याभिमंत्र्य . . . नाविकेभ्यो बध्नाति। ये नावं चटन्ति तेषां बन्धनं. — sū. 12. अथ नष्टे द्रव्ये लाभकर्म उच्यते। . . . उत्थापयति नष्टनिरीक्षणार्थं. — sū. 14. . . . समाप्तं नष्टलाभकर्म. — sū. 15. नमस्कृत्य द्यावापृथिवीभ्यामित्येकां जपित्वार्थसूक्तं कुर्वीत स्वस्त्ययनकामः। केचित्स्वस्त्ययनकामोपस्थानं. — sū. 16. . . . सप्तप्रतीको अंहोलिङ्गगणः। एकैकस्य प्रतीकस्य होमः। त्रयोदशहविर्भिः प्रतीकविकल्पः। ...भोजनमभिमंत्र्य पाययति स्वस्त्ययनकामः। . . . भक्षं भक्षयति। . . . हविराज्यसमिधादि जुहोति। . . . आप्लवनावसेचनाचमनादीनि यथासंभवं कर्तव्यानि। पापसंसर्गे व्याधिसंसर्गे वर्णसंसर्गे अन्यस्मिन्पापि स्वस्त्ययनं। . . . अंहोलिङ्गेन विकल्पेन . . . हृदयमालभ्य जपं कृत्वा उपस्थानमादित्यस्य कुर्यात्। तेनैव सूक्तेन . . . अभिमर्शनं पुरुषस्य अन्यस्य वा . . . वृक्षगृहस्त्रीपुरुषादीनां स्वस्त्ययनं क्रियते। . . . अभिमर्शनं कृत्वा उपस्थानमादित्यस्य कुर्यात्. — sū. 17. . . . हविरभिमंत्र्य भक्षयति। . . . स्वयमभिमन्त्रणं करोति स्वयं हविषां भोजनमिति वचनात्। . . . यत्र क्वचिच्छान्तिः क्रियते तत्र सर्वत्र स्वस्त्ययनहोमं कुर्यात्। गृहे नगरे वा बहिर्वा पत्तने वा ग्रामे पुरे वा सर्वत्र . . .। समाप्तानि स्वस्त्ययनानि. — sū. 18. आयुष्यकर्मणां विधिं वक्ष्यामः. — sū. 19. . . . स्थालीपाकेन घृतपिण्डत्रयं कृत्वा संपात्याभिमंत्र्य घृतमश्नाति स्थालीपाकमश्नाति . . . — sūs. 20. 21. . . हिरण्यमणिं युग्मकृष्णलं . . . त्रिगुणं कृत्वा संपात्याभिमंत्र्य बध्नाति। ...स्थालीपाके स्थापयित्वा स्थालीपाकमश्नाति। ...केचित्स्थालीपाके संपातं न कुर्वन्ति। अथ क्रमेण यथा द्यौरित्यादि गोदानमध्ये पठितं प्रथमं व्याख्यायते।. Here follows an extended description of the performances indicated at Kāuç. 54. 11—12. —

Kaṇḍikā 53.

sū. 1. अथ गोदानं संवत्सरे . . . यथा कुलधर्मेण वा कुर्यात्. — sū. 8. मातन्यन्तेन शान्त्युदकेन त्रिरेवाग्निं etc. . . . — sū. 9. माणवकं . . . — sū. 13. . . . उत्तरसंपातान्दक्षिणतः सुहृदो हस्ते शकृत्पिण्डे आनयति. — sūs. 15. 16. उदपात्रे पोथिकां (!for पोतिकां) गुडूचीं च

प्रक्षिप्य ततः संपातः। शकृत्पण्डे दूर्वां कृत्वा ततः संपातः। शान्त्युदकमुष्णोदकं चैकधाराभिः (!) समासिच्य. — sū. 18. अदितिः श्मश्रु इति ओदनं (in this form the word occurs several times in the expanded treatment of the following sūtras).

Kaṇḍikā 54.

Introductory. अत्र ब्राह्मणवाचनं वृद्धस्त्रीभिर्गीतं च कारापयेत्(!). — sū. 1. अथ नापिताय प्रैषं ददाति . . . — sū. 3. . . क्षुरं मार्जयित्वा नापिताय प्रयच्छति पुनर्वपनार्थं. — sū. 8. . . . वेद्युपरि प्रदक्षिणमग्निमनुपरिणीय. — sū. 9. . . . उपरिततं वस्त्रं गृह्णाति कर्ता. — sū. 10. . . परिधानवस्त्रेण उपरि आच्छादयति माणवकं. — sū. 11. यथा etc. . . . इत्यादि प्रथमतो व्याख्यानं कृत्वा (cf. Keç. at Kāuç. 52. 20, 21, where the subject matter of this sūtra is treated expansively) ततो गोदानं प्रारब्धं। आयुष्यमन्त्रा आयुष्यकर्ममध्ये पठिताः (cf. Keç. at Kāuç. 52. 18 fg.) — sū. 12. . . आज्यं जुहोति। . . . समिध आदधाति . . . पालाशादयः। . . . पुरोडाशं . . . पयः . . . ओदनं . . . पायसं . . . पशुं जुहोति। . . . आवपति . . . — sū. 13. . . पितुर्मन्त्रः न मातुः — sū. 14. Keç. has at the end of this sūtra the परिदानानि, described in the same words as the Ath. Paddh. at Kāuç. 58. 17, note. Then: गोदानं समाप्तं। सप्तमे पञ्चमी कण्डिका (!). — sū. 15. अथ चूडाकरणमुच्यते। संवत्सरे द्विसंवत्सरे वा गोदाने कृते पश्चाच्चूडाकरणं कार्यं पूर्वतन्त्रं। शान्त्युदके तुभ्यमेवेति सूक्तमनुयोजयेत्। यत्र वपनं पठ्यते तत्र सर्वत्र गोदानविधानेन वपनं कुर्यादिति दारिलमतं . . . —

Kaṇḍikā 55.

sū. 1. . . गर्भपञ्चमे गर्भाष्टमे। वर्षे कुर्यादिति पैठीनसिः। वसन्ते ब्राह्मणमुपनयीतेति च मीमांसायां। . . . शान्त्युदके आ यातु मित्र इति सूक्तमनुयोजयेत्। ततो ऽभ्यातानानि। ततः आ यातु मित्र इति (iii. 18) आयुर्दा इति (ii. 13) केचित् सूक्तेन मूर्ध्नि संपातानानयन्ति। दक्षिणे पाणौ अश्ममण्डलवर्जं शान्त्युदकमुष्णोदकं कृत्वा तस्मिन्नुदपात्रे संपातानानयति। उत्तरसंपातान् स्थालरूपे आनयति. — sū. 4. वपनं करोति सकृद्दक्षिणे पिञ्जूलीवर्जं। एवमुत्तरे शिरःपार्श्वे. — sū. 8. ब्रह्मचारी (!)ब्रवीति। आह ब्रूहि. — sū. 10. तत आचार्यो ब्रवीति को

नामासि किंगोत्रमिति (!)। पुनर्ब्रह्मचारी ब्रवीति सोमदेवदत्तशर्मनामाहं अमुकसगोत्रो ऽहं यथासंख्यप्रवरो ऽहं· — sū. 11. पुनर्ब्रह्मचारी ब्रवीति … — sū. 12. पुनराचार्य आह … — sū. 13. .. उदकाञ्जलिमादित्याय ददाति ब्रह्मचारी· — sū. 14. . . दक्षिणं पाणिं गृह्णाति आचार्यः· — sū. 14. . . आदित्यं निरीक्षते· — sū. 16. . . पूर्वाभिमुखं ब्रह्मचारिणमुपवेश्य . . . नाभिदेशं संस्पृश्य संस्तभ्य· — sū. 17. . . . गणं जपति आचार्यः· —

Kaṇḍikā 56.

sū. 1. मेखलां प्रवरां चतुःप्रवरां वा . . . बध्नाति· — sū. 2. मित्रावरुणयोस्त्वेति श्येनो ऽसीति च सूक्तेन . . . ब्रह्मचारिणे प्रयच्छति· — sū. 3. . . . ब्रह्मचारी दण्डं गृह्णाति। पुनर्मैत्विन्द्रियमिति (vii. 67. 1) यज्ञोपवीतमभिमंत्र्य परिधत्ते मन्वादिविहितं। अहं रुद्रेभिरिति सूक्तं (iv. 30) प्रत्यृचं ब्रह्मचारिणं वाचयति· — sūs. 5-7. अथ व्रतग्रहणं करोति। ब्रह्मचारिव्रतं द्वादशवर्षिकं etc. (as in the other paddhatis) . . . यथास्मर्यमाणधर्मकं इत्याद्युक्तं आङ्गिरसकल्पे व्रतश्रावणं। अग्नये गुरवे च ब्रह्मचारिव्रतं निवेदयेत्। अग्ने व्रतपते इति प्रत्यृचं ब्रह्मचारी अष्टौ समिध आदधाति· — sū. 12. अथाचार्य आचारं कथयति।· The treatment of this sūtra is identical with that of the Daç. Kar., ending … मा यज्ञायं कुरु इत्येवमादि आचारान्कथयति· — sū. 13. अथैनं भूतेभ्य इत्यादिभिर्व्रीहियवशमीमभिमंत्र्य मूर्ध्नि दद्यात्. — sū. 16. . . ब्रह्मचारिणमात्मसंमुखं करोत्याचार्यः· — sū. 17. समिध आदधाति . . .। अभ्यातानानि हुत्वा वाताज्जात इति सूक्तेन (iv. 10) शङ्खमणिं संपात्याभिमंत्र्य बध्नाति। . . . उपनयनं समाप्तं· —

Kaṇḍikā 57.

sū. 21. मय्यग्र इति पञ्चभिः पञ्च समिध आदधाति। उपनयनाग्नौ नष्टे इदं प्रायश्चित्तं। अनेन विधिना पुनाराधानं ब्रह्मचारी करोति। इति ब्रह्मचारी (!) अग्निपरिग्रहः। द्वादशरात्रं . . . सावित्रीव्रतस्य न ग्रहणं नो दीक्षणं भवति द्वादशरात्रं पयाशी (!) भवति। त्रयोदशे ऽहनि वेदव्रतं ददाति व्रतग्रहणं व्रतादानीयाः भवन्ति· — sū. 22. सायंप्रातरग्निकार्यमुच्यते etc. as in Daç. Kar. — sū. 31. अथ ब्रह्मचार्युपनयनानन्तरं मेधाजननमन्त्रैरायुष्यमन्त्रैश्चाज्यं जुहुयात्। ये त्रिषप्ता अहं रुद्रेभिस्त्वं नो मेधे यात्र म इति (cf. Kāuç. 10. 1, 16, 20)। . . . मेधा संपद्यते . . . —

Kaṇḍikā 58.

